शास्त्रसंदेश-३३

# स्तोत्रसंदेशमाला

## श्रीआदिनाथजिनस्तोत्राणि

७



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३३

# स्तोत्र संदेशमाला-७

## श्रीआदिनाथजिनस्तोत्राणि

: સંપાદક - સંકલન :
પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન
शास्त्रसंदेश
C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૭

## श्रीआदिनाथजिनस्तोत्राणि


આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૬ + ૩૬૮

સ્તોત્ર : ૧૫૫ શ્લોક : ૨૩૪૧


**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.


ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...! અનુમોદનીય...! અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૭-૮ ના
## દ્રવ્ય લાભાર્થી



**શ્રી નવકાર આરાધના ભવન**
**શ્રી કોઠારી આરાધના ભવન**
**હાલોલ (જી. પંચમહાલ) જૈન સંઘે**

*જ્ઞાનદ્રવ્યથી કરેલ શ્રુતભક્તિની*
*શાસ્ત્રસંદેશ ભૂરિ ભૂરિ*
*અનુમોદના કરે છે.*
*ટ્રસ્ટીગણ ના અમો*
*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*





**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીઁકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

***આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.***

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | भव्याङ्गभृत्कोकिलपुण्डरीकं, | पू.आ.श्री सिद्धसेनदिवाकर | १ |
| २ | युगादिदेवाय युगादियोगिने | पू.आ.श्री रामचन्द्रसूरि | १ |
| ३ | जयश्रियं प्राप्य कुकर्म्मविद्विषां | पू.आ.श्री मुनिसुन्दरसूरि | ७ |
| ४ | जयश्रीसङ्गिनः पृथ्व्यां यस्याऽऽ | पू.आ.श्री मुनिसुन्दरसूरि | ११ |
| ५ | जयश्रियाऽऽढ्यो भरताधिनेता | पू.आ.श्री मुनिसुन्दरसूरि | १६ |
| ६ | श्रेयः श्रेणिनिदानं भवरिपुविज- | पू.आ.श्री मुनिसुन्दरसूरि | २० |
| ७ | जय श्रीमन्नाभिप्रभव ! भुवनत्रा- | पू.आ.श्री मुनिसुन्दरसूरि | २४ |
| ८ | जयश्रिया द्वैधरिपूत्कराणां जग- | पू.आ.श्री मुनिसुन्दरसूरि | २८ |
| ९ | जयश्रियामेकपदं यदीयं,बभूव | पू.आ.श्री मुनिसुन्दरसूरि | ३२ |
| १० | श्रेयसां पद ! जिनेन्द्र ! जय श्री- | पू.आ.श्री मुनिसुन्दरसूरि | ३४ |
| ११ | देव ! त्वदीयवदनं सदनं सुधा- | पू.आ.श्री कक्कसूरि | ३५ |
| १२ | श्रीअर्बुदाचलविभूषण ! दूषणा- | पू.आ.श्री सोमसुन्दरसूरि | ३६ |
| १३ | ॐकारः सकलत्रिलोककमला- | पू.आ.श्री सोमसुन्दरसूरि | ४३ |
| १४ | क्वाऽहं बुद्धिधनैर्हीनः, क्व च | पू.आ.श्री धनेश्वर | ४८ |
| १५ | आश्रित्य निश्चयनयात्मकमेकधै- | पू.आ.श्री उदयप्रभसूरि | ४९ |
| १६ | जय देवाधिदेवाऽऽधिव्याधि- | पू.आ.श्री देवेन्द्रसूरि | ५० |
| १७ | आदिनाथ ! जगन्नाथ ! शरणाग- | पू.आ.श्री कौस्तुभसूरि | ५१ |
| १८ | निरुपधि वैभवकर वै भवकर | पू.आ.श्री जयशेखरसूरि | ५३ |
| १९ | जय त्वं नाभिभूपालकुलपङ्कज- | पू. आ. श्री ऋषिवर्द्धनसूरि | ५४ |
| २० | मेरौ दुग्धपयोधिवाः-प्लवमि- | पू.आ.श्री जिनप्रभसूरि | ५६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २१ | अस्तु श्रीनाभिभूर्देवो विपन्नाश- | पू.आ.श्री जिनप्रभसूरि | ६२ |
| २२ | निरवधिरुचिरज्ञानं दोषत्रयवि- | पू.आ.श्री जिनप्रभसूरि | ६३ |
| २३ | त्वं देव परमानन्दमस्माकं | पू.आ.श्री जिनसेनसूरि | ६८ |
| २४ | स्वामी माणिक्यपूर्वस्त्रिभुवन- | पू. आ. श्री कल्याणसागरसूरि | ७१ |
| २५ | श्रेयोलतापल्लवनैकनीरदं | पू.आ.श्री जिनसुन्दरसूरि | ७३ |
| २६ | चञ्चत्पञ्चममुच्छुष्टकुन्तलततिः | पू.आ.श्री विबुधप्रभसूरि | ७५ |
| २७ | मुनीन्द्रैः सुरेन्द्रैर्नरेन्द्रैः सदा यः, | पू.आ.श्री विबुधविमलसूरि | ७९ |
| २८ | महिम्नः पारं ते परमलभमाना | पू.आ.श्री रत्नशेखरसूरि | ८६ |
| २९ | स्वामिन्! जिनाधीश! जगन्न- | पू.आ.श्री हेमचन्दसूरि | ९३ |
| ३० | त्रिभुवनप्रभुताभवनक्रमौ प्रस- | पू.आ.श्री हीरविजयसूरि | ९४ |
| ३१ | महाभाग्यसौभाग्यलक्ष्मीनिवासं | पू.आ.श्री भुवनसुन्दरसूरि | ९८ |
| ३२ | श्रीमच्चम्पकमुख्यपुष्पनिकरै- | पू.आ.श्री भुवनसुन्दरसूरि | १०१ |
| ३३ | तुभ्यं नमस्तीर्थनाथ! सनाथी- | पू.आ.श्री हेमचन्द्रसूरि | १०६ |
| ३४ | असद्भूतान् गुणान् जल्पन्, | पू.आ.श्री हेमचन्द्रसूरि | १०७ |
| ३५ | स्वामिन्! क्व धी-दरिद्रोऽहं, | पू.आ.श्री हेमचन्द्रसूरि | १०८ |
| ३६ | देवैरप्यपरिज्ञेयगुणं कः स्तोतु- | पू.आ.श्री हेमचन्द्रसूरि | १०९ |
| ३७ | अवज्ञायाऽज्ञतां स्वस्य, सर्वज्ञ! | पू.आ.श्री हेमचन्द्रसूरि | ११० |
| ३८ | त्वां जडोऽपि जगन्नाथ! युक्त- | पू.आ.श्री हेमचन्द्रसूरि | १११ |
| ३९ | अपि सर्वात्मना ज्ञातु-मशक्या | पू.आ.श्री हेमचन्द्रसूरि | ११२ |
| ४० | कुम्भैर्मानमिवाऽम्भोधेः स्तवनं | पू.आ.श्री हेमचन्द्रसूरि | ११३ |
| ४१ | त्वत्प्रभावात्स्तवीमि त्वामप्राज्ञो- | पू.आ.श्री हेमचन्द्रसूरि | ११४ |
| ४२ | गुणांस्तव यथाऽवस्थान्, वयं | पू.आ.श्री हेमचन्द्रसूरि | ११५ |
| ४३ | जयाऽखिल-जगन्नाथ!, जय | पू.आ.श्री हेमचन्द्रसूरि | ११६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४४ | मुदे वस्ताद्देवस्त्रिदिवयुवतीमौ- | पू.आ.श्री कुमुदचन्दसूरि | ११७ |
| ४५ | आदीश्वरं स्वतिशयालिविराज- | पू.आ.श्री चारित्रसुन्दरसूरि | १२३ |
| ४६ | जयानन्दलक्ष्मीलसद्वल्लिकन्दं | पू.आ.श्री जयानन्दसूरि | १२८ |
| ४७ | श्रीकुल्यपाकपुरभूमिशिरोवतंसं | पू.आ.श्री गुणरत्नसूरि | १३० |
| ४८ | सुषमाऽतिपुराणपुरे राणपुरे | पू.आ.श्री सोमदेवसूरि | १३४ |
| ४९ | कल्याणावलिवल्लरीवनसमुल्ला- | पू.आ.श्री जयचन्द्रसूरिशिष्य | १३६ |
| ५० | मनो हरन्तं जगतो निरन्तरं, | पू.आ.श्री माणिक्यसुन्दरसूरि | १४१ |
| ५१ | सुखकारणमुत्तमभं ऋषभं | पू.आ.श्री पार्श्वचन्द्रसूरि | १४३ |
| ५२ | श्रेयःश्रीविहिताश्रयं श्रितजना- | पू.पं. श्री नयविजय(?) | १४४ |
| ५३ | आदिजिनं वन्दे गुणसदनं, | पू.उपा.श्री यशोविजय | १४५ |
| ५४ | श्रीविमलाचलमंडण गतदूषण | पू.उपा. श्री यशोविजयगणि | १४६ |
| ५५ | श्रीमरुदेवातनुजन्मानं मानव- | पू.उपा.श्री विनयविजय | १४८ |
| ५६ | श्रीमदर्हं जिनं नत्वा ध्यात्वा | पू.उपा.श्री स्वरूपचन्द | १४९ |
| ५७ | सकलशारदचन्द्रनिभाननं, | पू.गणिवरश्री जयचन्द्रेण | १५६ |
| ५८ | वृषभजिनवन्दनं शिवपुरीस्य- | पू.मु.श्री देवविजयगणि | १५७ |
| ५९ | सदा चिदानन्दनिदानमद्वयं | पू.पं.श्री जिनमाणिक्यगणि | १६० |
| ६० | श्रीराणपुरविभूषणहारे श्रीमच्च- | पू.मु.श्री रत्नशेखरगणि | १६४ |
| ६१ | सुरासुरमहीनाथ-मौलिमाला- | पू.मु.श्री शुभशीलगणि | १६४ |
| ६२ | वाग् प्रसन्नमुखी भूया[त्] | पू.मु.श्री रविसागरगणि | १६५ |
| ६३ | श्रीमन्तमादीश्वरमादरेण तं | पू.मु.श्री सारोदयगणिकृतम् | १६८ |
| ६४ | शरच्छर्वरीशांशुराढावलक्षं | पू.उपा.श्री वरदराजगणि | १७३ |
| ६५ | जयकर जन्तुकृपालय ! पालय | पू.मु.श्री पण्डित भक्तिसागरगणि | १७५ |
| ६६ | जयश्रीनिवासैकगेहं स्तुवेऽहं, | पू.मु.श्री शिवमण्डनगणि | १७७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६७ | आनम्रकम्रामर पूर्वदेवः, स वः | पू.उपा. श्री भानुचन्द्रगणि | १८१ |
| ६८ | विनौति यो नो सकलानिकेतनं, | पू.मु.श्री समयसुन्दरगणि | १९२ |
| ६९ | प्राज्यां चरीकर्त्ति सुखस्य पूर्तिं, | पु.मु.श्री. धर्मवर्द्धनगणि | १९४ |
| ७० | लोके विश्वजनौघ वञ्चनपटून्, | पू.मु.श्री रङ्गविमलगणि | १९५ |
| ७१ | श्रीनाभिराजकुलनन्दनकल्पवृक्ष!, | | १९५ |
| ७२ | सिद्धा अनेके मुनयो धरेशे, | | १९६ |
| ७३ | अर्हन् श्रीआदिनाथः प्रथमजिन- | | १९९ |
| ७४ | पुरोगकान्तिकेतनं, सुशान्ति- | | १९९ |
| ७५ | अनन्तसिद्धसौधाय, परमान- | | २०० |
| ७६ | कञ्चनशैलशिखामुकुटं तं, | | २०० |
| ७७ | जयत्यादिमतीर्थेशः, त्रिलो- | | २०१ |
| ७८ | कर्मौघवारणविदारणहीरणारिं, | | २०१ |
| ७९ | प्रह्वीभवत्त्रिदशनाथकिरीट- | पू.मु.श्री अभयतिलकगणि | २०३ |
| ८० | सुरवरेशनरेशशिरोमणि प्रकट- | पू.पं.श्री देवधर्मगणि | २०५ |
| ८१ | नाभिनामनरनाथचन्दनं पाप- | पू. महोपाध्यायश्री हेमहंसगणि | २०६ |
| ८२ | सकलकमलदलकरपदनयन ! | पू.मु.श्री चतुरविजय | २०८ |
| ८३ | प्रीणन्तु जन्तुजातं, नखसुभगा | पू. मु.श्री जिनपतिविजय | २१० |
| ८४ | त्रैलोक्यलोककुलकच्छल्पतक- | पू.मु.श्री उदयसागर | २१३ |
| ८५ | जय त्रिभुवनाऽधीश !, | पू.मु.श्री भावदेवविजय | २१४ |
| ८६ | वृषभ चिरञ्जय रञ्जयः रञ्जयः | पू.मु.श्री सर्वविजय | २१६ |
| ८७ | श्रीसिद्धाचलमाश्रितस्य विल- | पू.मु.श्री ललितकीर्तिशिष्य | २१७ |
| ८८ | सकल मङ्गल मङ्गल मन्दिरं, | पू.मु.श्री कर्मचन्द्रविजय | २२० |
| ८९ | नमत मानववञ्छितदायकं, | पू.मु.श्री हंसचन्द्रशिष्य | २२१ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ९० | विश्वप्रभुं प्रणतनाकिकिरीटरत्न- | पू.उपा.श्री ज्ञानप्रमोदगणि | २२२ |
| ९१ | सर्वैश्वर्यमयार्यवर्यमहिमं(?) | पू.मु.श्री विनयहंसगणि | २२५ |
| ९२ | मतिरणुसममानामेतवादीशमे- | पू.मु.श्री विनयहंसगणि | २२७ |
| ९३ | वन्दे श्रीआदिदेवं तमणुतममर्ति | पू.मु.श्री विनयहंसगणि | २३१ |
| ९४ | यस्यां सस्थलशालिनः किल | पू.मु.श्री विनयहंसगणि | २३५ |
| ९५ | यदङ्गजोऽयं क्रमतश्चतुर्दशो- | पू.मु.श्री विनयहंसगणि | २४० |
| ९६ | यस्यां वश्या विशदविधिना | पू.मु.श्री विनयहंसगणि | २४६ |
| ९७ | देवेन्द्रैर्वन्दितं देवं, नाभिभूपति- | पू.मु.श्री श्रीकर्णविजयः | २४९ |
| ९८ | नत्वा निजगुरुचरणं शरणं | पू.मु.श्री सिद्धिसागर | २५१ |
| ९९ | सकलमङ्गलदं रुचिरच्छविं, | सा. श्री.मेरुलक्ष्मीगणिनी | २५२ |
| १०० | नत्वा श्रीगुरुचरणौ, स्मृत्वा | | २५४ |
| १०१ | लब्ध्वा मानुषजन्म जाति- | श्री गुर्जरेश्वरमहामात्यवस्तुपाल | २५५ |
| १०२ | जय देव ! जयाऽऽदिमप्रभो !, | कविश्री रुपचन्द्र | २५८ |
| १०३ | त्वं ब्रह्मा परमज्योतिस्त्वं | | २६१ |
| १०४ | जिननाथसंस्तवकृतौ भवतो | | २६६ |
| १०५ | जगत्स्रष्टारमीशानमभीष्टफल- | | २७३ |
| १०६ | श्रीकुल्पपाकपुरभूमिमृगाक्षिवक्षः- | | २७६ |
| १०७ | श्रीनाभिसम्भव ! विभो ! भुवन- | | २७८ |
| १०८ | श्रीमत्पदाम्बुजलुठद् भवभीरु- | | २८४ |
| १०९ | यो विश्वेषामभयजनकः | | २८५ |
| ११० | प्रकृष्ट-कृष्ट-लोकवृन्दसन्नत- | | २८७ |
| १११ | श्रीसोपारकपत्तनावनी वामा- | | २८९ |
| ११२ | महानन्दलीलासरो राजहंसं | | २९४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ११३ | श्रीमद् देववरानतोत्तमपदाऽ- | | २९५ |
| ११४ | श्रीसर्वज्ञ जगच्चन्द्र, श्रीदेवेन्द्र- | | २९७ |
| ११५ | आनन्दद्रुमकन्दलीसुचरित- | | २९८ |
| ११६ | देवः स वः शिवमसौ तनुतां | | ३०० |
| ११७ | आदिदेवेषु या भक्ति,-रादिदे- | | ३०२ |
| ११८ | भक्तार्त्तिनाशनकरं विशदप्रभावं, | | ३०३ |
| ११९ | शान्ताकारतया मुखाम्बुजविभा, | | ३०४ |
| १२० | भव्याम्भोज-विकास-वासरमणि | | ३०६ |
| १२१ | श्रीशत्रुञ्जयशैलभासुरशिरः- | | ३०८ |
| १२२ | ऋषभजिनेश ! महासुखदायक ! | | ३१२ |
| १२३ | शत्रुञ्जयक्षोणिधरावतंसः श्री- | | ३१२ |
| १२४ | विजयस्व जगन्नाथ ! परमात्मन् ! | | ३१४ |
| १२५ | आदिनाथ ! जगन्नाथ ! विमला- | | ३१५ |
| १२६ | सुवर्णवर्णं गजराजगामिनं, | | ३१६ |
| १२७ | प्रगे युगादौ देवेश ! सूरस्त्व- | | ३१६ |
| १२८ | जय देवाधिदेव ! त्वं जय | | ३१६ |
| १२९ | प्रणतनरामरभुजगेन्द्रमौलि- | | ३१७ |
| १३० | विशदगुणसंभृतं, परमपदशो- | | ३१८ |
| १३१ | जगज्जीवनं पावनं यस्य वाक्यं | | ३१८ |
| १३२ | जातनृपमुत्थितानलमधिगत- | पू.आ.श्री रामचन्द्रसूरि | ३२२ |
| १३३ | सिरिरिसहनाह ! तुह पयनहकं- | पू.आ.श्री देवेन्द्रसूरि | ३२३ |
| १३४ | नाभिमरुदेवितणयं कणयनिहं | पू.आ.श्री धर्मघोषसूरि | ३२४ |
| १३५ | विस्सेसरो भयहरो गयमोहजोहो, | पू.आ.श्री धर्मघोषसूरि | ३२५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १३६ | सिरिसिद्धचक्कनवपयमहल्लप- | पू.आ.श्री. रत्नशेखरसूरि | ३२५ |
| १३७ | जय जय भुवणदिवायर ! | पू.आ.श्री रत्नसिंहसूरि | ३२६ |
| १३८ | सयलभुवणिक्कबंधव-मसुरिंद- | पू.आ.श्री जिनवल्लभसूरि | ३२९ |
| १३९ | नमिय जिणमुसभमुभयंसदे- | पू.आ. श्रीजिनवल्लभसूरि | ३३४ |
| १४० | सुइकसिणचउत्थीए उत्तरसा- | पू.आ.श्री धर्मकीर्तिसूरि | ३३७ |
| १४१ | जय मोक्खपहपयासय ! जय | पू.आ.श्री शीलाचार्य | ३३८ |
| १४२ | सुहसामन्नपइन्नासमयसमारद्ध- | मु.श्री पू.धनेश्वरविजय | ३३९ |
| १४३ | जय जंतुकप्पपायव !, चंदायव | श्री धनपालपण्डितकवि | ३४० |
| १४४ | बालत्तणिमि सामिय सुमेरुसि- | | ३४४ |
| १४५ | भत्तिभरनमिरसुरिंदविंदवंदि- | पू.आ.श्री रत्नशेखरसूरि | ३४७ |
| १४६ | जस्स पय-पंकयं निप्पडिम | | ३४८ |
| १४७ | जयसि तुमं भुवणावलि-सरोज- | | ३४९ |
| १४८ | नियजंमु सफलु रावणहं सुयं, | पू.आ.श्री जिनप्रभसूरि | ३५० |
| १४९ | जय सुरअसुर नरिंदविंदवंदि- | पू.मु.श्री शुभसुन्दरगणि | ३५१ |
| १५० | श्रीसंघे **वर साकर** जय नृप- | पू.मु.श्री रविसागर | ३५५ |
| १५१ | अमर-नरनिकरकरमौलिसुह- | पू.मु.श्री कीर्तिमेरु | ३५७ |
| १५२ | असुरसुरखयरनरनमियपयपंकयं | | ३६१ |
| १५३ | नाभिनरिंदमल्हारु मरुदेविमा- | | ३६३ |
| १५४ | सुर-करि-खन्धुत्तिण्णएण वहु- | | ३६५ |
| १५५ | अल्ला ल्लाहि तुराहं, कीम्ब | पू.आ.श्री जिनप्रभसूरि | ३६७ |

पू.आ. श्री सिद्धसेनदिवाकरप्रणीतम्
श्रीसिद्धगिरिमण्डन-

# १. ॥ श्रीआदिनाथचैत्यवन्दनम् ॥

(उपजाति)

भव्याङ्गभृत्कोकिलपुण्डरीकं,
दुष्कर्मरुक् छेदनपुण्डरीकम् ।
पद्भ्यां पवित्रीकृतपुण्डरीकं,
नताखिलाखण्डलपुण्डरीकम् ॥ १

उन्मत्तमोहद्विपपुण्डरीकं,
बाल्ये कृतार्थीकृतपुण्डरीकम् ।
शिरस्तुषाराङ्धृतपुण्डरीकं,
त्वां स्तौमि चञ्चत् पदपुण्डरीकम् ॥ २

स मङ्गलं वो वृषभध्वजः,
कुर्याज्जटावलीसंवृतांशमण्डलः ।
यदीयमङ्गं किल सर्वमङ्गलाश्रितं प्रमोदाय न यस्य जायते ॥३
(वंशस्थ)

पू.आ.श्री रामचन्द्रसूरिविरचिता

# २. ॥ श्रीयुगादिदेवद्वात्रिंशिका ॥

(वंशस्थ)

युगादिदेवाय युगादियोगिने युगादिराजाय युगादिशिल्पिने ।
अपारसंसारपयोधिसेतवे नमो नमस्ते जिन ! मुक्तिहेतवे ॥ १

अलोकमाक्रामति यः सलीलया
विशीर्णसीमार्गलमेकझम्पया ।
स एव ते वृत्तविशेषवर्णनाविधानसंरम्भपरः परं नरः ॥ २

बलिं व्रजामः कतिशः स्वयं वयं
सुमेधसस्तस्य महेश ! वेधसः ।
भवद्गुणग्रामसमृद्धिशंसिनीं
चकार वाणीं विदुषां मुखेषु यः ॥ ३

अजानतां भेदमुषर्बुधाम्भसोः
स्वयं स येषामभवद् भवान् गुरुः ।
अशेषसम्पत्तिविलाससम्पदां
त्रिसन्ध्यमेषामहमानतस्त्रिधा ॥ ४

इमामशेषां प्रविभज्य काश्यपीं
यथायथं पुत्रशताय कल्पयन् ।
विधातुकामो विषयोपसंहृतिं
व्यधत्त भूम्ना विषयान् कथं भवान् ॥ ५

बभूव नैकोऽपि समुद्रमाश्रयन्नमुं प्रचेताश्च्युतपाशवैशसः ।
भवन्तमाराध्य समुद्रशेखरं पुनर्विपाशाः कति न प्रचेतसः ॥६

नमोऽस्तु तस्मै भुवनोपकारिणे मनःप्रयत्नाय यथाप्रवृत्तये ।
सदाऽप्यनासादिततत्त्वविप्रुषो
यतस्तवोक्तं स्पृहयन्ति जन्तवः ॥ ७

तपोभिरुग्रैः करणोपरोधनैरकृत्रिमैरादधतस्तव स्थितिम् ।
विपश्चितः के न भवन्ति हेतुना
सचेतसोऽपि प्रविलीनचेतसः ॥ ८

तमःप्रणष्टामलदृष्टिवर्त्मनि प्रबद्धमिधे (?) प्रभवद्धि कर्मणि ।
रवेरिवोन्मीलितभाववैभवस्तवावतारं जिन ! भारतेऽभवत् ॥९

तवाङ्घ्रिसेवारसिकैः कुटुम्बितामिह प्रपन्नैरवनौ सुरासुरैः ।
कृताश्चिरं यामिकमात्रदेहिनो-
(त)रसातलस्वर्गनिवासिनो ग्रहाः ॥ १०

अमुं प्रमथ्नन्ति न ये जडाविलं
तवाध्वमन्थेन भवोदधिं बुधाः ।
भवन्ति सर्वेन्द्रियशान्तवेधसो
न ते नवीनाऽमृतसम्पदां पदम् ॥ ११

निवासमर्हन्ति न ये महोदधे (?)
मलीमसा मुक्तिपुरे वपुःस्पृशः ।
कृता भवग्रामतलेषु ते त्वया
विपन्नृपाणां करदाः कुटुम्बिनः ॥ १२

महांहसां दुर्नयशूरचेतसां विमोहमूर्छालुदृशां च मादृशाम् ।
शरण्य ! को नाम सकर्णमानसो
ध्रुवं त्वदन्यः शरणं भवे भवेत् ? ॥ १३

बृहन्न किञ्चिद् गगनाङ्गणात् परं
न चाऽपरं मुक्तिपदात् प्रियङ्करम् ।
न बीजमन्यद् व्यसनस्य कामतः
परो न कश्चिद् भवतो यथार्थवाक् ॥ १४

अहंयवो ये किल रोषतोषजैः परे प्रबन्धै रिपुमित्रवर्द्धिभिः ।
उपासितैस्तैर्मनसापि मादृशाश्चिरं त्रपन्ते तव किङ्करा अपि ॥१५

वसुन्धरामश्नुवतां नृपार्चिता भवन्तु शास्त्रैरपि सन्तु विश्रुताः ।
सुखोन्मुखे चेत् पथि सोत्सवाः परे
तदा भुजिष्यैस्तव मादृशैर्जितम् ॥ १६

अखण्डिताखण्डलवन्दितश्रिया
त्वया त्यजन्तः सह साम्यविप्लवम् ।
सुधामयीं तामपि मुक्तिभूमिकां
मनीषिणो न स्पृहयन्ति चेतसि ॥ १७

त्रिलोकरक्षाभिरिहाभिमन्त्रितः
प्रियङ्कराभिस्तव सूक्तिपङ्क्तिभिः ।
दृढानुबन्धैरपुनर्ग्रहं ग्रहै-
श्चिरं गृहीतोऽपि न कोऽपि मुच्यते ॥ १८

व्रतं विहाय स्पृहयन्ति ये श्रियं
व्रजन्ति ते पूज्यतमां परे दशाम् ।
त्वया पुनर्देव ! विमुञ्चतां व्रतं
स्थितिः प्रक्लृप्ता मलिनानुरूपिणी ॥ १९

तदेव नास्त्यस्ति तदेव चेत्ययं चलाचलस्ते वचनस्य डम्बरः ।
शिवाय कस्याप्यशिवाय कस्यचिन्
मुदेऽथ कस्याप्यमुदेऽथ कस्यचित् ॥ २०

अमुत्र यत् किञ्चिदचिन्त्यवैभवं
सनातनं शर्म न तत्र साक्षिणः ।
इहापि गच्छंस्तव देव ! वर्त्मना
भवत्यवाच्यस्य न भाजनं जनः ॥ २१

गुणैकरूपा गमभङ्गशालिनी
चकास्ति येयं तव वाक्यवागुरा ।
स एव दूरं विनियन्त्र्यते न या
य एव बन्धैरचिराय मुच्यते ॥ २२

प्रसीद सीदन्तममुं जगज्जनं
नियोजय क्वापि महार्थकर्मणि ।
क्षमाभृति त्वय्यपि शासति प्रजा-
मजातदैन्याः कथमीश ! नाङ्गिनः ॥ २३

क्रतुक्रियाभिर्विषयोपदेशनां
निशम्य वाचो हृदयङ्गमा जनः ।
विरोधिनीर्वैषयिकस्य शर्मणः
क एव ते सूक्ष्मगिरोऽनुरुध्यते ॥ २४

विशृङ्खलैर्योऽमृतपोऽपि लज्जते
प्रियाप्रणामप्रमुखैर्विकर्मभिः ।
परां परेतैरपि यान्ति पूज्यता-
महो विमोहान्धलमानसं जगत् ॥ २५

प्रसादमासाद्य कुतीर्थिनां जनः
स लाघवोऽपि ध्रुवमेत्य गौरवम् ।
तव प्रासादा (न्) न पुनर्मुहुर्मुहुः
स गौरवोऽप्यञ्चति लाघवं परम् ॥ २६

अकल्पवृक्षा विबुधप्ररोहिणी
विशीर्णदोषा गुरुराजराजिनी ।
समुत्थितज्योतिरकृष्णवर्त्मिका
त्वयि प्रभो ! सारतभूरभूदियम् ॥ २७

शुभाशुभं बाह्यमथान्तरं भवत्प्रणीतसंवादि विलोकयन्नपि ।
प्रशान्तिवन्ध्यैर्ग्रहिलाभिरुक्तिभिः
प्रतार्यते पश्य परैः कथं जनः ॥ २८

सतां न तत् कौतुकमस्तु विप्लुते यदेष भूयांस्तव गौरवोदयः ।
कृपाद्विषः कामजुषः परां परे
यदश्नुवते यान्ति तदेव कौतुकम् ॥ २९

पटूनि चाटूनि कियन्ति कुर्महे महेश ! युष्माकमपारसम्पदाम् ।
विना न यः शर्म सतां सदोदयं
वचोभिरेभिः किल किं न पूर्यते ॥ ३०

विघटय कलुषाणि भूर्भुवः स्व-
र्घटय घटां शिवसम्पदामपाराम् ।
उपनय गुरुकर्म्ममर्म्मभेदं
नय भवभीतिमसम्भवामवस्थाम् ॥ (पुष्पिताग्रा) ३१

माहात्म्यं तव परिमातुमीहते यः
सख्यातुं जगदणुसञ्चयं स लोलः ।
साफल्यं तदपि सुमेधसः स्ववाचा-
माधातुं विदधति ते गुणप्रशस्तिम् ॥ (प्रहर्षिणी) ३२

तां पुण्यपापजयिनीं कनकाभिराम-
चन्द्रांशुपुञ्जविशदामधिगम्य भूमिम् ।
आत्यन्तिकीमनुभवामि यथा मुदं मे
श्रीनाभिनन्दन ! तथा प्रथय प्रसादम् ॥ (वसन्ततिलका) ३३

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

शत्रुञ्जयमण्डन-

## ३. ॥ श्रीआदिनाथ-जिन-स्तोत्रम् ॥

जयश्रियं प्राप्य कुकर्म्मविद्विषां
सङ्ख्याव्यतीता मुनयः समासदन् ।
यस्मिन्महानन्दपदे नगोत्तमे
शत्रुञ्जयेऽस्मिन् जिनमादिमं स्तुवे ॥ (उपजाति) १

प्रभूयते यत्र न वासवैरपि
स्तुतौ कुतस्तत्र मम प्रगल्भता ।
तथापि नाभेय ! वदन्निमां तव
स्वशक्त्यशक्ती न विचारयाम्यहम् ॥ (वंशस्थ) २

यतोऽर्चनं ते न न दर्शनं वा
न संस्तुतिर्वाऽपि शिवस्य हेतुः ।
किन्त्वद्भुता भक्तिरियं तु मेऽस्ति
शक्तेः प्रवृत्त्यैव च सा कृतार्था ॥ (उपजाति) ३

ततः स्वशक्तेरनुसारतोऽय-
मपि प्रवृत्तो भविता कृतार्थः ।
न सत्क्रिया ते स्तुतितः परा य-
च्छिवाय लेशोऽपि च सत्क्रियायाः ॥ (उपेन्द्रवज्रा) ४

पुराणमीशं परमार्थदेशकं परात्मरूपं परमेष्ठिनां परम् ।
युगादिदेवं विमलाचले स्तुवन्
भवेत्त्रिलोक्याः स्तवनीयतापदम् ॥ (वंशस्थ) ५

अनाद्यनन्तं मुनिभिः पुरातनैर्मितिव्यतीतैरभितः पवित्रितम् ।
यदेव तीर्थं भरतोत्तमं परं शक्राय सीमन्धरतीर्थकृज्जगौ ॥ ६
(उपजाति)

सङ्घाऽधिपत्यं विधिवत्प्रपद्य
यस्मिन् युगादीशजिनं सुभावात् ।
प्रणम्य भव्यो जिननायकत्वाऽ-
वधिप्रतिष्ठां लभते कृतार्थः ॥ (उपजाति) ७

असङ्ख्यतीर्थेश्वरपादपूतं सिद्धेः पथं मङ्गलक्ष्मिसद्म ।
समग्रपापक्षयकृत्प्रणौमि शत्रुञ्जयाह्वं तदनादितीर्थम् ॥ ८
(उपजाति)

चिरादवाह्यं सुवहं चकार कैवल्यमार्गं प्रथमं परं या ।
विश्वत्रयात्यद्भुतपुत्रऋद्ध्या द्विधा महानन्दसुखं प्रपन्ना ॥ ९
(उपजाति)

शक्तिं परां तां परमात्मरूपामरूपिणीं विष्टपकल्पवल्लीम् ।
अम्बां त्रिलोक्या मरुदेविनाम्नीं
युगादिनेतुर्जननीं प्रणौमि ॥ (उपजाति) (यु.) १०

अधर्म्मकालोरुनिदाघतापितं जगत्सुखाकर्तुमिहोत्तरोन्नतिः ।
ववर्ष तत्त्वामृतपूरमादिमं दयाम्बुधेरम्बुदवज्जगत्पतिः ॥ ११
(वंशस्थ)

कृत्वा कृतार्थानि जगन्ति यो विभु-
र्नीत्या पुमर्थत्रितयस्य शिक्षणात् ।
प्रसाधयामास चतुर्थमप्यमुं महामुनिर्ज्ञानतपस्क्रियाफलम् ॥१२
(उपजाति)

अतास्थपद्मस्य च शुद्धरत्नै-
र्विनिर्मितं लेप्यमयं च बिम्बम् ।
शैलेऽत्र चक्री भरतः स्तवीमि
तमादिमं तीर्थपतिं प्रणम्रः ॥ (उपजाति) (त्रिभि.) १३

यः पञ्चकोटीमितसाधुवृन्दैः समन्वितः केवलबोधमाप्य ।
चैत्रस्य राकादिवसे प्रपन्नः शिवश्रियं श्रीविमलाचलेऽत्र ॥१४
(उपजाति)

आदिप्रभोरादिमपुत्रपुत्रं गणाधिराजं प्रथमं प्रथाऽऽढ्यम् ।
जगत्प्रणम्यक्रमपुण्डरीकं
श्रीपुण्डरीकं मुनिमानमामि ॥ (उपजाति) (यु.) १५

यस्मिन् युगादीशजिनं स्मरन्तः
स्वःशर्म भेजुः पशवोऽपि हिंस्राः ।
मयूरनागप्रमुखा भजे तत्
स्वपापपिष्ट्यै विमलाद्रितीर्थम् ॥ (उपजाति) १६

इमं गरीयांसमपि क्षितिध्रं भव्याङ्गिनः स्वे हृदये दधानाः ।
तरन्ति संसारमहोदधिं द्रागहो ! अचिन्त्यो महतां प्रभावः ॥१७
(उपजाति)

जलधिर्न यथा दवाग्निभिर्न तमोभिश्च दिनेशमण्डलम् ।
विमलाद्रिमुपागतो भवी न तथा पापभरैः प्रलिप्यते ॥ १८
(ललिता)

न भियो भवशत्रुसम्भवाः खलु तस्य प्रभवन्ति भाविनः ।
विमलाचलमौलिमण्डनं श्रयते यः शरणं जगत्प्रभुम् ॥ १९
(ललिता)

तव नाथ ! गुणान्न कोऽप्यलं गदितुं संसृतिपारदायिनः ।
तदपीष्टसुखाप्तिहेतुके स्तवने ते रमतां मतिर्मम ॥ २०
(ललिता)

शस्यः क्षणोऽयं दिवसः कृतार्थः
श्लाघ्यः स पक्षः सफलश्च मासः ।
स हायनः पुण्यपदं जिनेन्द्र !
यस्मिन् भवेद्वन्दनमङ्गलं ते ॥ (उपजाति) २१

अभ्यर्थये तं दिवसं क्षणं वा संसारवासं जगदेकनाथ ! ।
स्याद्यत्र सद्भक्तिरसोर्मिधौत-स्त्वद्वन्दनान्दमहोत्सवो मे ॥ २२
(इन्द्रवज्रा)

त्रिलोकपूज्यौ भवभीतजन्तु-त्राणैकदुर्गौ सुलभापवर्गौ ।
जगत्त्रयीवाञ्छितकल्पवृक्षौ
पादौ जिनेन्द्रस्य मुदा प्रणौमि ॥ (उपजाति) २३

इमं स्तुवे चैत्यतरुं प्रियालुं सङ्घाधिपे दर्शितदुग्धवर्षम् ।
छायां सृजन् यो जिनपद्युगस्य
चिरं कृतां वक्त्यधुनाऽपि सेवाम् ॥ (उपजाति) २४

श्रीमद्युगादीशपदाब्जभक्तः श्रीसङ्घरक्षाकरणाभियुक्तः ।
सम्यग्दृशां मौलिमणिर्विमुद्रं
यक्षः कपर्दी वितनोतु भद्रम् ॥ (इन्द्रवज्रा) २५

एवमानुत युगादिजिन ! श्रीदेवसुन्दरतरान्तरभक्त्या ।
देहि बोधिकमलां विमलां मे स्याद्यतः सकलवैरिजयश्रीः ॥२६
(स्वागता)

एवं श्रीवृषभप्रभुं जिनवरं शत्रुञ्जयालङ्कृतिं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २७
(शार्दूलविक्रीडित)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

सोपारकतीर्थनाथ–

## ४. ॥ श्रीऋषभदेवस्तोत्रम् ॥

जयश्रीसङ्गिनः पृथ्व्यां यस्याऽऽसीत्पूतमंह्रिभिः ।
तीर्थं सोपारकं तत्र तं स्तुवे वृषभप्रभुम् ॥ (अनुष्टुप्) १

(वंशस्थ)

पुरेऽत्र चैत्ये भरतेश्वरः प्रभो !
स्वकारिते स्वर्णमये तवाकृतिम् ।
अतिष्ठिपज्जीवत एव यस्य तं
स्तुवन्निहामुत्र च संश्रये शिवम् ॥ २

विभाति काव्यं न सतामलङ्कृती–
र्विनाऽथ चासामुपमैव बीजति ।
न चास्ति सा नाथ ! जगत्त्रयेऽपि ते
तव स्तुतौ कः कवितागुणस्ततः ? ॥ ३

तव स्वरूपं न विकल्पयोनयः
स्पृशन्ति शब्दास्तु विकल्पनाऽतिगम् ।

अबोद्धृभिस्तस्य कथं कृतिः स्तुते-
र्न वीतरागः स्तुतिभिश्च तुष्यसि ? ॥ ४

तथाऽपि नाथौपयिकं न्यगाद्यदो
हितस्य सम्यग् मुनिभिर्हितैषिणाम् ।
निषेव्य चैतत्फलमप्यलम्भि तैः
फलानुवादेन च हेतवे स्पृहा ॥ ५

हितार्थिपङ्क्तावयमप्यतो जनः
प्रभो ! निषीदन् पथमेनमादृतः ।
सुनिश्चितार्थेऽनुगते च पूर्वजैः
पथि प्रवृत्तिर्न विचारमर्हति ॥ ६

मनांसि केषामपि न स्पृशन्ति ते
स्वरूपमेषा सुधियां मृषा नु गीः ? ।
अनन्तशर्मात्मनि यत्त्वयि स्थिता-
न्यमून्यमूदृंशि भवन्ति भाविनाम् ॥ ७

पुरेऽत्र नूनं सरसां मितिद्विषा-
मधीयतेऽम्बूनि सरोरुहाणि च ।
यशःसमूहाद्विमलत्वमंशशः
प्रभो ! गुणेभ्यस्तव सौरभं पुनः ॥ ८

त्वदीयभक्तेः फलदानकौशलं
समीहमाना विविधा लता द्रुमाः ।
ध्रुवं तदभ्यासकृते फलान्यवि-
श्रमं जनेभ्यो वितरन्त्यनेकधा ॥ ९

पतन्ति न क्षुद्रतनूभृतोऽत्र यत्
पुरे स्वयोनिष्वपि कीटकादयः ।
इति प्रभो ! तेऽतिशयान्मितेतरान्
न कोऽपि मूर्त्तेरपि वक्तुमीश्वरः ॥ १०

श्रीवज्रशिष्यात्किल वज्रसेनान्-
नागेन्द्रचन्द्रादिकुलप्रतिष्ठा ।
बभूव यस्मिन् भगवन् ! पुरस्ते
सोपारकं नन्दतु तीर्थमेतत् ॥ (उपजाति) ११

यथेष्टसंवत्सरदानकाले कल्पद्रुरत्नत्रिदशादिकेभ्यः ।
यमंशशोऽदा महिमानमुच्चैरेते तमद्यापि निदर्शयन्ति ॥ १२
(उपजाति)

मुग्धोऽसि नो तुष्यसि तीर्थिकेभ्यः
प्रौढैः स्तुवद्भ्यश्चरितैर्हरादीन् ।
ते वै जयस्तम्भनिभास्त्रिलोकि-
जैत्रस्य मोहस्य स चापि तेऽर्हन् ! ॥ (इन्द्रवज्रा) १३

त्यजन्नपि त्वां खलु गौरवं श्रियां
पदं परं प्रापयते मुनीश ! यः ।
सदा भजन्नप्यपरांश्च लाघवं
कलाऽस्य मोहस्य विमृश्यतां प्रभो ! ॥ १४

त्वयाऽपमानं गमितोऽपि मोहराड्
बभूव हेतुः शिवसम्पदाप्तये ।
भवार्त्तिजाताय परैस्तु सेवितोऽ-
प्यहो ! खलानां विपरीतवृत्तिता ॥ १५

कृपैकधर्मे वदसेऽङ्गिनोऽसुभि-
र्वियोजयस्येव बुधैश्च सेव्यसे ।
यथार्थवक्ताथ यथोक्तकृच्छ्रत-
स्तथापि विज्ञानमिदं तवाद्भुतम् ॥ १६

भजन्ति देवान् दितिजादिहिंसयोन्-
मदान् गुरुंश्च स्वकुलाभिमानिनः ।
स्वपक्षसिद्ध्यै विविधागमांश्च ये
शिवार्थिनस्तेऽपि न कस्य नर्म्मणे ? ॥ १७

भवाननाथोऽपि करोति निर्भयान्
प्रभूंस्त्रिलोक्याश्च जिन ! स्वभाक्तिकान् ।
परे सुनाथा अपि मोहतो जग-
ज्जयोन्मदा नित्यभयान् सुदुर्गतान् ॥ १८

भजन्ति यत्साम्यसमाधिजं सुखं
प्रशान्तदोषास्तव सेवका अपि ।
निजादिजानुग्रहविग्रहग्रहैः
सुदुःस्थिता नैतदपि प्रभो ! परे ॥ १९

कृपाङ्गभाजः सृजतां न दुःखिता-
न्न कर्म्मसापेक्षतया महेशता ।
न सक्रियत्वेन विमुक्तिरप्यतो
मुधाऽभिमानान्निपतन्त्यधः परे ॥ २०

न यस्य तस्यापि सृजन् जनुर्मृती
विमुच्यते कश्चिददृष्टबन्धनात् ।

विधंस्त्वदन्यो जगतोऽपि ते कथं
विमुक्तिकृत्स्वस्य परस्य वा ततः ? ॥ २१

ययाऽन्वकम्पि त्रिजगत्त्वया प्रभो !
न्यघानि भावारिगणश्च तज्जयी ।
विनैव तां साम्यकलां तव श्रियं
न विश्वसृष्ट्यादिभिरप्यगुः परे ॥ २२

सचेतसोऽपि स्तुतिकारिणो निजान्
शिवं प्रदायाऽपि करोष्यचेतसः ।
स्तुवन्ति युक्तं तत एव ते मुने !
पुनर्भवन्तं न परं च कञ्चन ॥ २३

तथाऽप्यसाधारणसद्गुणस्तुतौ
रसेन भक्तेस्त्वमसि स्तुतो मया ।
न चैव तुष्यामि फलादतस्त्वहं
स्वभावमेनं च न हातुमर्हसि ॥ २४

श्रीसोपारकतीर्थभूषणमणे ! श्रीमद्युगादिप्रभो !
भक्त्यैवं मुनिसुन्दरामरगुरुस्तुत्या मयाऽपि स्तुतः ।
त्वं कर्मारिजयश्रिया मम परं श्रेयः प्रयच्छाऽचिरा-
न्नित्यानन्दरमाविलाससुभगं विश्वेष्टकल्पद्रुमः ॥(शा.वि.) २५

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

वृद्धनगरालङ्कार-

## ५. ॥ श्रीऋषभदेवस्तोत्रम् ॥

(उपजाति)

जयश्रियाऽऽढ्यो भरताधिनेता यस्यादिमो लेप्यमयीं सुतोऽत्र ।
प्रातिष्ठिपज्जीवत एव मूर्त्तिमादिप्रभुं वृद्धपुरे स्तुवे तम् ॥ १

व्युत्पत्ति-मेधा-प्रतिभादयो गुणा
न हेतवस्ते व्यभिचारिणः स्तुतेः ।
भक्तिस्तु हेतुस्तदतः प्रवृत्तिमान्-
न मादृगप्यत्र विभोऽपराध्यति ॥ २

आनन्त्यभाजामपि ते गुणानां
स्तुतावशक्तिं न च नाथ ! मन्ये ।
अनन्तविज्ञानबलस्वरूपो
धत्से स्वयं येन हृदा ममैक्यम् ॥ ३

यदस्ति गम्यं तदचेतनं न चेत्-
समोहमन्यच्च पथे न चेतसः ।
अमोहविज्ञानमयस्ततः कथं
स्तुतेः पथं यासि स मोहसंविदः ? ॥ (वंशस्थ) ४

तथापि भक्त्या स्तुतयस्त्वयीरिता
भवन्त्यभीष्टार्थफलाय भाविनाम् ।
पयोदवृन्दान्तरितेऽपि भास्वति
प्रजाभिरर्घाञ्जलयः कृता इव ॥ ५

अनन्तकालप्रवरैरनन्तै-
रपीश ! शब्दैर्न हि वाच्यरूपः ।
स्तुत्योऽसि विश्वैरपि चेति वाच्या-
वाच्यं स्वरूपं भवतो गृणन्ति ॥ ६

समग्रतीर्थातिशयर्द्धिवृद्धात्तीर्थात्तवेदं पुरमन्विताह्वम् ।
चतुर्युगेऽप्याचमनाद्यवर्णैः ख्यातं चतुर्भिर्भुवि नामभिर्यत् ॥ ७

स्तुवे पुरस्यास्य भुवं त्वदंह्रिसंस्पर्शपूतां किल यत्र धर्म्मम् ।
उपादिशश्चैत्यपदे युगादौ त्वं देशनाधाम्नि कृते सुरेन्द्रैः ॥ ८

संस्थापितायास्तव नाथ ! मूर्त्तेरिहाऽभवत्सागरकोटिकोटिः ।
चिरत्नतीर्थं तदिदं न कांस्कान् स्वसेवकांस्तारयते भवाब्धेः ॥९

मूर्त्तिस्तवान्तर्गतसारकाष्ठा बहिः सलेपाऽपि हरत्यजस्त्रम् ।
दुष्कर्मलेपं भविनामियं तद्-
बाह्याद्बलीयान् विधिरन्तरङ्गः ॥ १०

वीरात्त्रिनन्दाङ्कशरद्य ९९३ चीकरत्
त्वच्चैत्यपूते ध्रुवसेनभूपतिः ।
यस्मिन् महैः संसदि कल्पवाचना-
माद्यां तदानन्दपुरं न कः स्तुते ?॥ (इन्द्रवंशा) ११

स्तुवेऽनुकम्पां तव सर्वगोचरां
प्रसूतिहेतुं सकलेष्टशर्म्मणाम् ।
सर्वार्थसिद्धिं स्वयमास्थितोऽपि सन्
ययाऽत्र विश्वोपचिकीरवातरः ॥ १२

सनाभिरिन्द्रस्य स नाभिभूपतिः
कथं भवेद् यत्प्रभवस्य तेऽर्हतः ।

बिडौजसः सर्वसुराऽसुरान्विता
दधुश्चतुष्षष्टिरपीश ! दासताम् ॥ (वंशस्थ) १३

अदीपयस्तास्त्रिजगत्प्रकाशिनी-
र्विभो ! युगादाविह वाणिदीपिकाः ।
असङ्ख्यकालप्रचितं तमऽभितो
निरस्य या धर्म्मपथानपुस्फुटन् ॥ (वंशस्थ) १४

स्वमांसदानैरपि मोहविप्लुता-
शयैर्विधातुं शकिता न या परैः ।
त्वयोपदेशैरपि सर्वजन्तुषु
व्यधायि सर्वार्थविदा कृपा परा ॥ (वंशस्थ) १५

क्लेशान्विचित्रान् जननादिकान् परैः
स्वयं प्रपद्याऽपि न यत्सुखाकृतम् ।
तदव्ययब्रह्मसमाहितात्मना
गिराऽपि चक्रे सुखितं त्वया जगत् ॥ १६

(वंशस्थ)

न नित्यरूपे जननाद्युपाधयः
कुतः कृतार्थस्य कषायविप्लवः ।
न विश्वतः कर्म्मवशो विशिष्यते
समञ्जसाऽन्येषु न कल्पनाऽपि तत् ॥ १७

तथाऽपि धर्मार्थ्यपि ते मतं त्यजत्
प्रवर्त्तते यत् कुपथेष्विदं जगत् ।
न तत्र हेतुस्त्रिजगद्विडम्बना-
निबद्धसन्धात् खलु मोहतः परम् ॥ १८

दधत्परब्रह्ममयैकरूपता-
मपि त्वमेको बहुधा प्रकल्पितैः ।
श्रितोऽसि रूपैरपि नामभिः परै-
रिवाब्दवाः कूपजलाद्युपाधिभिः ॥ १९

चिरादविज्ञानतमस्तिरोहितं
निसर्गदोषव्रजगर्तदुर्गमम् ।
विना त्वया सर्वदृशा प्रभो ! पथं
शिवस्य सम्यग् न हि कोऽप्यदीदृशत् ॥ २०

प्रकाशिते केवलभास्वता त्वया
जगत्यशेषेऽपि समं गवां गणैः ।
उदीयतेऽद्यापि यदिन्दुभानुभि-
स्तदीश ! तत्तेऽभ्यसितुं नु कौशलम् ॥ २१

कलिस्त्वदाज्ञावशवर्त्तिनां सतां
न धर्म्मलक्ष्मीं जिन ! हर्तुमीश्वरः ।
यतो नदीमातृकदेशवर्त्तिना-
मवग्रहः सस्यरमां न शोषयेत् ॥ २२

जगत्त्वदाज्ञां व्यजहात्कुकर्म्मभि-
स्त्वयीश ! माध्यस्थ्यमुपास्थिते ततः ।
अनीश्वरं दुर्मततस्करैः कलौ
कदर्थ्यते तद्भवचारकस्थितम् ॥ २३

बिभेमि तन्नाथ ! समीक्ष्य साम्प्रतं
ततो निलीनोऽस्मि तवैव शासने ।

तदाश्रितं पालय मां निजं भव-
भ्रमोद्भवक्लेशततेः कृपां कुरु ॥ २४

अनादिमध्यान्तमगम्यमभ्रमं
यदर्थयन्ते मुनयः समाहिताः ।
त्वदेकनिष्ठं परमीश ! तन्महस्-
तवैव तेनोक्तिषु सुस्थिता बुधाः ॥ २५

एवं श्रीऋषभेश ! वृद्धनगरालङ्कारचूडामणे !
स्तुत्वा त्वां गुरुसोमसुन्दरयशस्त्रैलोक्यकुक्षिम्भरे ।
ज्ञानादित्रयशुद्धिमेव ! भगवन् याचे यतोऽन्तर्द्विष-
च्चक्रस्याप्तजयश्रिया तव समां लक्ष्मीं लभेयाऽचिरात् ॥ २६
(शा.वि.)

एवं यो मतिमान् स्तुते जिनवरं श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमाम्भोरुहम् ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो-
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २७
(शा.वि.)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्
अर्बुदगिरिमण्डन-

## ६. ॥ श्रीऋषभदेवस्तोत्रम् ॥

श्रेयः श्रेणिनिदानं भवरिपुविजयश्रियाऽऽप्तशिवसौख्यम् ।
अर्बुदगिरिवरमुकुटं श्रीऋषभं प्रभुमहं स्तोष्ये ॥ १

(रथोद्धता)

स्तोत्रमर्हति गुणी न कल्पितैर्नापि सद्भिरपरैः समैर्गुणैः ।
किन्तु सद्भिरसमैः स तु त्वमेवेति वीतभव भूयसे मया ॥ २

सोद्यमैः प्रकृतितस्तव स्तुतिः
सर्ववाञ्छितकरीति सूत्र्यते ।
तां विधाय च करोति कोऽपि
नो कस्यचित् पुनरतोऽलसैरपि ॥ ३

वेद्मि गौरवकृतो महर्षिभिर्न स्तुतस्य तव मादृशोक्तयः ।
तोष्यते ह्यपि कराहतैः शिशोरम्बिकेति सफलस्त्वयं श्रमः ॥४

कोऽप्यरोपि जिनधर्म्मपादपो दुःषमावधिजयी त्वया विभो ! ।
वाञ्छितोपनतया फलश्रिया यः सुखाकरति विष्टपत्रयम् ॥५

भीतिमर्बुदमिमं क्षमाभृतं संश्रिता न दधतेऽरिचक्रतः ।
स्वां तदेतदुपरि क्षमाभृतं संश्रितस्य मम का भवारिभीः ? ॥६

शक्तितो दितिसुतादिघातकैर्धिक्कृता सकलदैवतान्तरैः ।
यत्त्वदेकशरणाऽभवत्कृपा
त्वां कृपैकविषयः श्रितोऽस्मि तत् ॥ ७

स्पर्द्धते महिमतस्त्वयाऽत्र यः पातयन्ति तमधः स्मरादयः ।
त्वं तु तानपि निहंसि निर्ममो नाथ ! केयमकृतज्ञता तव ? ॥८

निर्वहन्ति भविनो यतोऽखिला मोहमेनमपि हंसि सेवकम् ।
धर्ममेककरुणं च भाषसे विश्वसन्ति बहवो न तत्त्वयि ॥ ९

न स्पृशन्ति तव शासनं भिया
बालिशास्तदिति नातिचित्रकृत् ।

साधवोऽपि मदनादिसेवकान्
घ्नन्ति यत्र जगतां प्रियानपि ॥ १०

श्लाघ्यते स विमलोऽर्बुदाधिपो योऽम्बिकावरमवाप्य सन्मतिः।
भाविनीमवगणय्य सन्ततिं त्वद्विहारमिममाश्वचीकरत् ॥ ११

लल्ल एष कलिमल्लजित्वरः कस्य न स्तुतिपदं स वीजडः ।
उद्धरन् स्वमिव यो भवावटाच्चैत्यमेतदुददीधरत्तव ॥ १२

स्तौमि तान् जिनपते ! मृगानपि श्रीमदर्बुदगिरीन्द्रवासिनः ।
ये दरीषु रममाणकिन्नरीगीतमुज्ज्वलयशः पिबन्ति ते ॥ १३

पक्षिणोऽपि जिन ! संस्तवीमि तानर्बुदाद्रिशिखरप्रचारिणः ।
भव्यलोचनचकोरचन्द्रिकां ये पिबन्ति तव मूर्त्तिमक्षिभिः ॥१४

यः समत्सरमतिस्त्वयि प्रभौ श्रेयसां न स विलासमीक्षते ।
यस्य भास्वदुदये तमोदृशोर्नैष यज्जलरुहां विकाशदृग् ॥ १५

रोषकल्मषमधारि न त्वया नापि शस्त्रकटकादिडम्बरम् ।
किङ्करीकृतजगत्त्रयस्तथाऽप्यान्तरो रिपुगणो न्यहन्यत ॥ १६

त्वन्मते तमबला अपि स्थिता घ्नन्ति मोहनृपतिं समाहिताः ।
यो विडम्ब्य हरि-शम्भुवेधसो दैवतत्वपदतो व्यदूरयत् ॥१७

नाऽवधीः कमपि दानवादिकं रोषतोषविवशोऽपि नाऽभवः ।
आज्ञयैव त्रिजगत् सुखाकृतं यत्त्वयेति विभुता तवाद्भुता ॥१८

यासु नाथ ! पतयोऽपि नाकिनां कम्पमेव दधते हतौजसः ।
ता जनिव्ययजरादिकापदस्त्वत्परो न हि निहन्तुमीश्वरः ॥ १९

ताभिराहितभृशव्यथस्ततस्-
त्वां श्रितोऽस्मि शरणं जगत्प्रभुम् ।
तत्प्रसीद भगवंस्तथा द्रुतं
हन्मि ताः स्व-परयोर्यथाऽखिलाः ॥ २०

त्वां विहाय जगतां हितं परान्
ये भजन्ति कुधियः शिवश्रिये ।
स्नान्त्यतीत्य जिन ! मानसं सरः
शुद्धये मरुमरीचिकासु ते ॥ २१

त्रैधदुःखविषमामयोच्चयो
येन शाम्यति भवोद्भवोऽखिलः ।
तत्त्वदागमरसायनं मम श्रीजिनाऽस्तु सुलभं भवावधि ॥ २२

श्रेयसामसि निधिः किलाक्षयो भाविनामुपचिकीरिह स्थितः ।
तान्यसङ्ख्यभविनां प्रणेमुषां यद्ददासि न च हानिमिय्रति ॥२३

सर्वप्रशस्यफलदः परमोन्नतिश्रीः
सद्वंशभूः श्रितवतामविताऽरिचक्रात् ।
तीर्थोत्तमः प्रहतपङ्कसरस्वतीको
जीयाज्जिनादिम ! भवानयमर्बुदश्च ॥ (वसन्ततिलका) २४

एवं श्रीमुनिसुन्दरस्तुतिपदं त्वां श्रीयुगादिप्रभो !
स्तुत्वा भूधरनायकार्बुदशिरश्चूडामणेऽभ्यर्थये ।
मोहारातिजयश्रियाऽतिसुभगां श्रेयोरमां तां मम
ब्रह्माद्वैतमयीं प्रदेह्यनुभवो यस्यास्तवैवाऽर्हतः ॥(शा.वि.) २५

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्
इलदुर्गालङ्कार-

## ७. ॥ श्रीऋषभदेवस्तोत्रम् ॥

(शिखरिणी)

जय श्रीमन्नाभिप्रभव ! भुवनत्राणशरण !
प्रदेलप्राकारक्षितिधरशिरोमौलिभवन ! ।
प्रभो ! भक्त्यायत्तीकृतशिवपदानन्दमहस-
स्तव स्तोत्रे यत्नं किमपि विदधे भक्तिविवशः ॥ १

गुणानामानन्त्यात्क्रमनियमतश्चापि वचसां
न शक्ताः स्तोतुं त्वामपि हरि-हर-ब्रह्म-गुरवः ।
अवैमीति स्तुत्यां तव तदपि यत्नोऽयमुचितो
विचारं भक्तानां तिरयति विभौ भक्तिरिह यत् ॥ २

मम ज्ञानं नास्ते करणरहितं त्वं च किमपि
स्वरूपं धत्सेऽर्हन् ! वृषभ ! करणातीतममलम् ।
कथाऽपीति स्तुत्यां क्व तव तदपि स्तोत्रपदवीं
लभे यस्या भक्तेरहमपि नवीमीशितरिमाम् ॥ ३

भवापायैस्तप्तं स्पृहयति जगन्निर्वृतिपदं
समग्रापायानां व्यपहृतिपटुश्चासि जगतः ।
फलावाप्तिर्दूरे तदपि किल यामेव हि विना
भवत्वेका सैव प्रथमजिन ! भक्तिस्त्वयि मम ॥ ४

विशुद्धा चेद्भक्तिर्भवति भवति प्रेष्ठफलकृत्
तदा किं स्यात्कृत्यं यम-नियम-दानप्रभृतिभिः ।
नृणां चिन्तारत्ने करतलगते नो यदुचिता
धनप्राप्त्यै नानौपयिकजनितक्लेशनिवहाः ॥ ५

योगाभ्यासे निबिडजडिमा धीप्रवेशो न शाब्दे
ब्रह्मण्यात्मन्यपि न च लयो नानुभूतिस्तपस्सु ।
येषां दानाद्यपि न विदितं त्वत्पदद्वन्द्वभक्त्या
तेऽपि ज्योतिर्जिनवर ! परानन्दरूपं लभन्ते ॥(मन्दाक्रान्ता) ६

त्वद्भक्त्या यद्भवति भविनां मर्त्यनाथामरेन्द्रा-
द्यैश्वर्याप्तिः स्पृशति हृदयं कस्य नेतस्तदेतत् ।
ज्योतिः किञ्चित्परममुनयोऽप्यर्थयन्ते तपोभि-
र्यद्योगाद्यैरपि तदपि यत्स्यात्करप्राप्तमस्याः ॥(मन्दाक्रान्ता) ७

कुमारो भूपोऽभूज्जगदनुपमप्रौढिचरितो
भवेनैकेनैवामृतपदगमी यत्सुरभवात् ।
अणोरेकस्यैतत्तव जिन ! विभो ! भक्तिनिचये
न केषामाश्चर्यं जनयति फलं विश्वविदितम् ॥ ८

अरीन्निर्ज्जित्योदध्यवधि भुवमात्मैकपतिकां
निवार्यानार्येष्वप्यखिलतनुमद्घातमनघाम् ।
मणीचैत्यैरुच्चैः सुभगवपुषं च व्यसनहृत्
स राजा त्वद्भक्त्याऽधिगतविभवो नाथ ! कृतवान् ॥ ९

स गोविन्दः सङ्घाधिपतिरमलैश्वर्यविभवो
न केषां श्लाघाया व्रजति विषयं शुद्धमनसाम् ? ।
तव प्रासादस्योद्धृतिकृतिमिषाद्येन कृतिना
समुद्दध्रे स्वात्मा भवजलधिपातोद्भवभयात् ॥ १०

परं श्रेयः प्राप्य त्वमसि कृतकृत्यः स्वयमिदं
परेषां दातुं च प्रभवसि तदर्थाश्च कृतिनः ।

भजन्तेऽतस्ते त्वां मुदितमनसः स्वार्थरसिका
जिनोपेयं शुद्धौपयिकवशतः स्याद्विसद सत् ॥ ११

प्रगल्भन्ते दोषैः कलुषमतयः सिद्धिविभवं
न भोक्तुं दातुं वा न च विरहितस्तैस्त्वदपरः ।
वृथा तत् क्लिष्यन्ते स्तवनविधिभिस्तस्य कुधियः
फलं नेष्टं यत्स्यात्सुलभमनुपायप्रणयिनाम् ॥ १२

परानन्दास्वादे रसिकमनसः शुद्धमतयः
स चादृष्टप्लोषादयमपि च तत्त्वाधिगमतः ।
स सम्यक् सिद्धान्तादयमुदभवच्चाखिलविद-
स्त्वमेवाद्यश्चैषामिति तव नुतौ बोधिद ! यते ॥ १३

जगत्प्राणिग्रासाऽऽतुरवदनमृत्योर्भयजुषां
परब्रह्मानन्दामृतरससतृष्णैकमनसाम् ।
व्यतीतक्लेशौघः परमपुरुषार्थाधिगतिमान्
सतामेकस्त्राणं त्वमसि शरणं चापि भगवन् ! ॥ १४

परं ज्योतिः किञ्चित्सकलविषयव्यापृतिमुचो
भवक्लेशावेशापरममतयः प्राप्तधृतयः ।
विकल्पातीतं यत्परममुनयो ध्यानपदवीं
नयन्त्यस्मिन् रूपे तव जिन ! धियो मेऽस्त्वनुभवः ॥ १५

जगन्नानाऽवस्थास्थपुटितमिदं यत्परिणते-
रुदग्रक्लेशानां सहति भववासावधि ततीः ।
निहत्यादृष्टारिव्रजमिममवापि त्रिभुवन-
प्रभुत्वश्रीस्त्रातस्त्रिजगदुपचक्रे च भवता ॥ १६

प्रभुत्वं यत्पृथ्व्याः स्फुरति गतशत्रुव्यतिकरं
यदिन्द्राद्यैश्वर्यं यदपि शिवशर्मावधि फलम् ।
तदेतत्सर्वं ते क्रमयुगसपर्या प्रददती
स्पृहां स्वस्मिन् केषां सृजति न यतीनामपि विभो ! ? ॥ १७

कृपैव श्रेयःश्रीसमधिगतिकृत्तत्र भ च सा
भवेद्यत्रारम्भोऽनुचरति स च ग्रन्थमुभयम् ।
ततो युक्तं त्यक्त्वा जलधिरसनां राज्यकमलां
प्रपन्नो नैर्ग्रन्थ्याश्रमममममधीस्त्वं शिवमगाः ॥ १८

हरि-ब्रह्मेशेन्द्रादिषु विजयिनो यस्य विशिखा
गताः कुण्ठत्वं नो न च समभवन्नेष्टफलिनः ।
विपद्वल्लीकन्दस्त्रिभुवनजनत्रासजनको
हतो मोहः साम्यादपि रिपुरयं नाथ ! भवता ॥ १९

समत्र्यामर्त्येन्द्रं जगदपि नयद् ग्रासविषयं
मम स्वामिन् ! भीतिं जनयति कृतान्तस्य वदनम् ।
त्वमेवातस्त्राता त्रिभुवनगुरुस्तेन शरणं
श्रितस्त्वामेवाहं कुरु गतभयं मां करुणया ॥ २०

अनादौ संसारे बहुलतमसा लुप्तमतिना
मया निन्द्यं कर्म्म व्यरचि बहुधा क्लेशजननम् ।
इदं तत्सर्वं मे ऋषभ ऋषभेतीश ! जपतः
प्रणाशं यातु द्राक् शिवपदरमा च श्रयतु माम् ॥ २१

न कामः कल्पद्रौ न च सुरमणौ नाऽमरघटे
न विद्यायां मन्त्रे न हि न च सुराऽऽराधनविधौ ।

त्वमेवैकस्त्राणं त्वमसि शरणं त्वं गुरुरतो
भवापायत्रस्ते मयि कुरु कृपार्द्रां जिन ! दृशम् ॥ २२

नमस्तुभ्यं देवा-ऽसुर-मनुजनेत्राब्जरवये
नमो लोकालोकाकलनकुशलज्ञाननिधये ।
नमस्तुभ्यं सर्वेहितसुखकृतिप्रीतिजगते
नमो विश्वापायव्यपनयविधिव्यग्रमनसे ॥ २३

स्तुत्वेत्यादिमदेव ! सुन्दरतरां भक्तिं दधत् त्वां मुदा
श्रीज्ञानाम्बुधिसूरिभिः स्तुतपदं ज्ञानाणुनाऽप्यन्वितः ।
याचेऽहं गुरुसोमसुन्दरगुणव्याप्तत्रिलोकोदर-
द्वैधद्वेषिजयश्रिया जिनपते ! श्रेयः श्रियः शास्वतीः ॥ २४
(शा.वि.)

एवं श्रीइलदुर्गभूषणमणिं श्रीमद्युगादीश्वरं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २५
(शा.वि.)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्
देउलाविभूषण-

## ८. ॥ श्रीऋषभजिनस्तोत्रम् ॥

(उपजाति)

जयश्रिया द्वैधरिपूत्कराणां जगत्प्रसर्पत्प्रभुताप्रतापम् ।
श्रीमद्युगादीशजिनेन्द्रचन्द्रं स्तवीम्यहं देलउलापुरस्थम् ॥ १

त्वयि प्रभौ चेतसि संस्थिते स्युर्न रोगशोका दुरुपद्रवाश्च ।
नो भीतयो व्याधय आधयो
वा तनूमतां दुःखकृतः कदाचित् ॥ २

विचित्रदुष्टज्वरकुष्ठकास-श्वासाक्षिशीर्षोदरकर्णरोगाः ।
भगन्दराद्याश्च गदाः समग्रास्-
त्वन्नाममन्त्रात् प्रलयं प्रयान्ति ॥ ३

ग्रहाः प्रसत्तिं दधते समग्राः
सुराश्च सुर्यश्च वरप्रदाः स्युः ।
वशा नृपाद्याः प्रहताः खलाश्च
श्रीमद्युगादीश ! तवांह्रिभक्त्या ॥ ४

भूतप्रेतव्यन्तरक्षेत्रपालाः सीकोतर्यः शाकिनी डाकिनी वा ।
व्यन्तर्याद्या अप्यधीश क्षमन्ते
त्वद्भक्तं नो बाधितुं लेशतोऽपि ॥ (शालिनी) ५

तवांह्रिभक्त्याऽर्थितदारसार-समृद्धिपुत्राद्भुतराज्यलक्ष्म्यः ।
द्विषज्जयः सन्ततभोगयोगा
जिनेश ! पुण्यैः सुभगा नृणां स्युः ॥ (उपेन्द्रवज्रा) ६

निरन्तरारोग्यमहप्रतापयशः-प्रतिष्ठाप्रभुतोर्ज्जितानि ।
सुदीर्घमायुःसुभगत्वसारकला लभन्ते जिन ! तेंऽह्रिभक्ताः ॥७

इहाप्यभीष्टानि सुखानि भुक्त्वा युगादिनेतर्भवतोऽर्च्चनाद्यैः ।
भव्या भवन्ते किल चक्रिशक्राऽ-
हमिन्द्रदेवाव्ययशर्मलक्ष्मीः ॥ ८

रणे जयं सम्पदमाशु दुस्था बद्धा द्रुतं बन्धनमोक्षमीश ! ।
नृपावरुद्धाश्च नृपावदानं भक्ता लभन्ते ऋषभप्रभो ! ते ॥ ९

द्विधाऽऽमयैर्नाथ ! कदर्थितस्य मे
द्विधा च दोषैः सकलार्त्तिलोलवैः ।
त्वमेव नेता जगतां पिता हिता-
ऽऽवहः शरण्यः शरणं भवाधुना ॥ (वंशस्थ) १०

नवप्रभावेषु सुरान्तरेष्वहो !
त्वमेव गर्ज्जस्यतिशीतिभिः कलौ ।
ग्रीष्मे हि शुष्यन्ति जलाशयाः परे
प्रवर्द्धते वारिनिधिस्तु वारिभिः ॥ ११

जगत्त्रयीरक्षणदक्षिणे प्रभौ
त्वयि प्रपन्ने शरणं शरीरिणाम् ।
यथेह नश्यन्ति भियो द्विषां त्रिधा
परत्र सांसारिकदुःखजास्तथा ॥ (वंशस्थ) १२

अयं जनः कैरपि कर्म्मभिः कृतैः
पराभिभूतो भवते पदे पदे ।
ततो विपन्नोऽप्यमितार्त्तिभिः प्रभो !
प्रमोदते त्वामधिगत्य तायिनम् ॥ (वंशस्थ) १३

दुष्पक्षदुःखाद्वयगर्त्तपातिनो
देवान्तराद्यात्मकुशावलम्बिनः ।
अयं तवाज्ञापवियष्टिमाश्रितः
स्वमक्षरं श्रीपद एव मन्यते ॥ १४

विचित्रदुःखानलतापिताः परे
श्रयन्ति का नौपयिकेन तृष्णिकाः ।
अयं तु ते ध्यानसरोऽधिगत्य तान्
समीहिताऽऽप्त्या मुदितोऽनुकम्पताम् ॥ (वंशस्थ) १५

यथाऽसि देवान्तरदूरितानां ज्ञानादिकानां शरणं गुणानाम् ।
समग्ररोगादिभयाकुलानाम-पीश ! नाभेय ! तथा त्वमेव ॥१६

देवान्तरापास्तनया गुणानां ज्ञानादिकानां शरणं यथाऽर्हन् ।
समग्ररोगादिविपत्प्लुतानां त्राता तथैवासि विभुस्त्वमेव ॥१७

त्वयि प्रभो ! देलउलापुरेशे यथाऽर्चिते द्राग् विपदः क्षयन्ति ।
नानाभवोपार्ज्जितसम्भवानि तथैव कर्माण्यपि नाभिसूनो ! ॥१८

संवर्मितानां भवदाज्ञया यथा जगद्द्विषो न प्रभवन्त्युपद्रवाः ।
तथा कषायादिभटोत्कटौजसः
शरीरिणां पापमहारयोऽपि च ॥ १९

किं कामकुम्भैर्मणिभिः सुराणां मरुद्गवीभिः सुमनोद्रुमैर्वा ।
हृदि स्थितिं देलउलावतंसः सतां यदि श्रीऋषभो विधत्ते ॥२०

अनन्तचिद्दर्शनवीर्यशर्म्मणे जगद्विपद्व्याहननैककर्म्मणे ।
युगादिदेवाय हताखिलार्त्तये नमो नमो देलउलार्च्यमूर्त्तये ॥२१
(वंशस्थ)

समग्रभक्तेहितशर्म्मदायिने समग्रभीत्या जगदेकतायिने ।
स्थितिप्रदायांह्रिजुषोऽपुनर्भवे
नमोऽस्तु मे श्रीऋषभाय शम्भवे ॥ २२
(वंशस्थ)

वशीकृतिर्वाञ्छितसर्वसम्पदा-मुदग्रमुच्चाटनमापदां ततः ।
प्रवासदात्री निखिलांहसां द्रुतं-
ममास्तु भक्तिर्वृषभप्रभौ परा ॥ (वंशस्थ) २३

तरीमिवाश्रित्य तरन्ति वारिधि-र्भवाह्वयं ये नृसुरासुरादयः ।
भजेयमाज्ञामृषभप्रभोरिमां
भवन्तु पुण्यानि च मे तदाऽऽप्तये ॥ (वंशस्थ) २४

बहुविधबहुकर्म्मजैः कुतर्कै-
र्निहतिधियां कति नैव दैवतानि ।
निरुपधिसमताविचारिणां तु
त्वमसि विभो ! ऋषभैक एव देवः ॥ (पुष्पिताग्रा) २५

एवं देलउलापुरे सुविदितं श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतिस्फूर्जत्प्रमोदाद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २६
(शा.वि.)

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## ९. ॥ श्रीयुगादिदेवस्तवनम् ॥

(उपजातिः)

जयश्रियामेकपदं यदीयं,बभूव राज्यं जगतां सुखाय ।
विमुक्तये च व्रतकेवलश्रीः श्रीमद्युगादीशमिमं स्तवीमि ॥ १

हितानि कुर्वन् पितरत्यनिन्दितो,
य एव धर्मो जगतामपि स्फुटम् ।

सूतेरमुष्यापि च यः पितामहो,
मतः पुराणं पुरुषं स्मरामि तम् ॥ २

यतः स्म सर्वाः प्रभवन्ति नीतयो,
जनानुगा मुक्तिपथानुगा अपि ।
घनाघनौघादिव सर्वतो लता-
स्तमादिमं देवमुपास्महे विभुम् ॥ (उपेन्द्र वज्रा) ३

गृहीतिनां कर्मसु न स्फुटेष्वपि,
स्वभावशुद्धाऽऽर्जवभक्तिशालिनाम् ।
बभूव शास्ता वृषभप्रभुः पुरा,
येषां स्तुमस्तानपि युग्मिनो जनान् ॥ ४

(वंशस्थ)

अयं विवर्त्तोऽस्ति यदेकहेतुकः,
शरीरिणां क्लेशविचित्रतामयः ।
निरस्य यो मोहतमस्तदप्यगात्,
पदं परं तं वृषभप्रभुं भजे ॥ ५

उपाधिजान् यः प्रविधूय विप्लवान्,
सदोदितब्रह्मतनुःसुयोगिनाम् ।
निरिन्धनो वह्निरिवावभासते,
निरञ्जनं तं पुरुषं स्मराम्यहम् ॥ ६

प्रभुः प्रजानां प्रथमं जिजीविषू-
र्नियोजयन् कर्मसु ता बभूव यः ।
क्रमात् प्रबुद्धः परमार्थदेशना-
त्तथैव तेभ्यश्च वियोजयन्नपि ॥ ७

युगादिमं देवमनन्तवेदसं,
प्रवर्त्तकं सत्पुरुषार्थसम्पदाम् ।
प्रणौमि तं बोधिपदाप्तयेऽखिल-
द्विषो व्यतिक्रम्य जयश्रियेऽपि च ॥ ८

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## १०. ॥ श्रीयुगादिदेवस्तवनम् ॥

(स्वागता)

श्रेयसां पद ! जिनेन्द्र ! जय श्री-नाभिनन्दन ! जगत्त्रयबन्धो !।
भव्यलोचनसुधारसवर्षिन्, हर्षतः स्तुत ! नरेशसुरेशैः ॥ १

संस्तुतिस्तव विभो ! नृपताद्याः, सम्पदो वितनुते कियदेतत् ?।
तां त्रिलोकविभुतामपि दत्ते, याऽनुभूतिविषयो हि तवैव ॥ २

एकशोऽपि जिन ! यत्र पुष्करा-वर्त्तवृष्टय इवाभवंस्तव ।
सुप्रसादमधुरा दृशो भवेत्, तत्र शस्यकमलोद्भवश्चिरम् ॥ ३

(रथोद्धता)

संस्थिते त्वयि हृदीश ! नराणां,
दूरमेव विपदः खलु यान्ति ।
किं हि तिष्ठति सुते विनतायाः,
मन्दिरे फणभृतो विलसन्ति ? ॥ ४

त्वं पिताऽथ जननीगुरुरेक-स्त्वं प्रभुर्मम तथा जगतोऽपि ।
त्वां ततः शरणमेकमुपेतः, किञ्चिदस्मि भगवन्नभिवाञ्छन् ॥५

ज्ञानदर्शनचरित्रसमृद्धिः, प्राग् न मेऽस्ति विशदा सति चैवम् ।
यो भवेत् तव मतः सदुपाय-स्तेन मां शिवरमां नय नाथ ! ॥६

पू.आ.श्री कक्कसूरिविरचितम्
श्रीनाभिनन्दनोद्धारप्रबन्धगतम्

# ११. ॥ श्रीनाभिनन्दन-अमृताष्टकम् ॥

(वसन्ततिलका)

देव ! त्वदीयवदनं सदनं सुधायाः,
संवीक्ष्य दृष्टिविषभाग् भुजगी ममैषा ।
मिथ्यात्वमोहगरलं विरलं विधाय,
सम्प्रत्यमन्दमदसम्मदमाससाद ॥ १

देव ! त्वदास्यशशिनोऽमृतमुख्यकुण्डात्,
सज्ज्ञानिबद्धवचनं वचनं सुधामुक् ।
प्राप्तं निपीय भवदावभवं स्वदाहं,
सन्त्यज्य निर्वृतिमना अधुनाऽस्मि जातः ॥ २

देव ! त्वदीयशय एष विशेषपुष्यत्-
पीयूषवर्षसम तं मदमादधाति ।
मन्ये त्रयो रति-कुदृष्टि-विकारदोषा,
यातास्ततो जिन ! सुदर्शनतां गतोऽस्मि ॥ ३

देव ! त्वदीयमिह भालतलं विलोक्य,
शुद्धाष्टमीकरसुधाकरसन्निकाशम् ।
तत्कान्तिवीचि चयपुष्टमहो मदीयं,
चक्षुश्चकोरयुगमद्य बभूव सद्यः ॥ ४

देव ! त्वदीयपुरेतदगण्यपुण्य-
सम्भारसम्भृतमनन्तशुभस्य हेतुः ।
दत्तेऽमृते शिवसुखं विमुखं भवानां,
भव्याङ्गिनामपि निरीक्षितमेकवारम् ॥ ५

देव ! त्वदीयरसना रसनायकस्य,
वाक्यामृतस्य सरसी सरसैर्यदेषा ।
स्वस्पन्दसम्भववचोनिचयप्रपञ्चैः,
शीतीकरोति सततं वपुरस्मदीयम् ॥ ६

त्वल्लोचने जिनपतेऽमृतसिन्धुनीमे,
सम्पेतुषी वपुषि विश्वभवे भवेताम् ।
सञ्जायतेऽत्र भवसम्भवदुःखदाह-
दाहोपशान्तिरखिलेऽपि यथा जिनेश ! ॥ ७

देव ! त्वदीयचरणौ शरणं भवेतां,
शोणच्छवी लवणिमामृतलक्षिताङ्कौ ।
संसारमारवपथभ्रमणातुराणां,
संसारिणां सुकृतवारिविवर्जितानाम् ॥ ८

इत्यमृष्टाकसंस्तवसंस्तुत ! परमप्रमोदतो नाथ ! ।
श्रीनाभिनन्दनजिन ! प्रसीद देह्यमृत-सौख्यानि ॥ ९

पू.आ.श्री सोमसुन्दरसूरिविरचितम्

## १२. ॥ अर्बुदस्थश्रीऋषभजिनस्तवनम् ॥

(वसन्ततिलका)

श्रीअर्बुदाचलविभूषण ! दूषणाली-
वन्ध्यार्जुनाभविभ ! नाभिभवाऽऽद्यदेव ! ।
स्वामिँस्तव स्तवपथे पथिकीकरोमि,
वाचं शुचीकरणकारणतोऽहमर्हन् ॥ १

कौतूहलान्न न च काव्यकलावलेपान्-
नामुष्मिकैहिकफलाऽऽप्त्यभिलाषतो वा ।
किन्त्वीश ! ते स्तुतिविधावधियामधीशो-
ऽप्यस्मिन् प्रवृत्तमतिरस्मि भवाभिभूत्यै ॥ २

वेगादगं जिगमिषामि तदङ्गपङ्गु-
र्गत्या जिगीर्गगनगप्रबलानिलस्य ।
मातुं मरुत्पथमथो विदधे तदिच्छां,
मित्स्यामि चान्तिमसमुद्रजलं पलैस्तत् ॥ ३

स्प्रष्टुं करेण तरणिं स्पृहयामि वाऽहं,
सर्वोर्वरामपि पदैर्यदि वा पिधित्स्ये ।
यत्सर्वथाऽमितिकथापथहृद्गुणस्य,
स्तुत्यां यतेऽहमिह ते सहसा किलैवम् ॥ (युग्मम्) ४

शक्तिं निजामनवधार्य तथापि कार्ये-
ऽमुष्मिन्नुपक्रमवतो भवतः प्रसादात् ।
कर्मक्षयैकफललाभमभीप्सतो मे,
नूनं जिनेश ! सफलो भविता श्रमोऽसौ ॥ ५

नानाभवोपजनितं भविनामनन्तं,
वश्यं कथापि वितथाकुरुतेऽघसङ्घम् ।
निर्णिक्तभक्तिभरजस्य महामहिम्नो,
देव ! स्तवस्य तु तवात्र विधौ कथा का ? ॥ ६

नो मत्सरः स्फुरति कोऽपि परामरेषु,
चेतोऽनुरागवशगं त्वयि देव ! नैव ।

सन्तस्तथापि निबिडाद् गुणपक्षपातात्,
त्वामेव सेवकतया प्रभुमभ्युपेताः ॥ ७

स्वामिन्नसङ्ख्यसुखदं भवभीभिदं त्वां,
हित्वाऽऽरिरात्स्यति सुरानपरान् नरो यः ।
विश्वोत्तमामृतरसं सरसं व्यपास्या-
सन्तोषमेष विषमं विषमापिपासेत् ॥ ८

रागोऽङ्गनाङ्गपरिषङ्गविधिप्रसिद्धः,
क्रोधोऽपि हेतितितिसङ्गतिबुद्धिबोध्यः ।
मोहोऽट्टहासनटनक्रिययाऽवसेयः
कामं कमण्डलुधृतिप्रथितं ह्यशौचम् ॥ ९

स्फाराक्षसूत्रकरधारणलिङ्गगम्य-
मज्ञानमप्यखिलमातृमुखैरपीक्ष्यम् ।
मूर्त्तिष्वपीति भगवन् ! भवतः परेषां,
हा हा ! महानिबिडदोषविडम्बनैव ॥ (युग्मम्) १०

दूरादपास्तवनितातनुसङ्गशस्त्राऽ
द्यङ्काभिशङ्क्यमदनादिकविक्रियायाम् ।
शान्ताकृतौ प्रतिकृतावपि ते यतीन्द्र !,
नीरागतैव जगताऽपि विभाव्यतेऽलम् ॥ ११

आस्तां भवान् भुवननाथ ! दृषन्मयीयं,
त्वन्मूर्त्तिरप्यसुमतां तनुते प्रमोदम् ।
साक्षादवेक्षितवपूंष्यपि सौख्यदानि,
न स्युर्नृणां मतिमतां परदैवतानि ॥ १२

दूरेऽथवेन्दुरुदकप्रतिबिम्बताऽपि,
तन्मूर्त्तिरेव तनुते मुदमीश ! यद्वत् ।
तद्वद्विलोकितविभास्वरमण्डलाऽपि,
किं तारकावलिरलं प्रमदप्रदाने ? ॥ (युग्मम्) १३

एकान्तशान्तरससागरमग्नमूर्त्ते-
र्या ते जगत्त्रयपतेऽद्भुतसाम्यमुद्रा ।
रोषादिदोषकलुषीकृतविग्रहाणां,
क्व स्यादसौ हरिहरप्रमुखामराणाम् ? ॥ १४

विश्वत्रयातिशयिविस्मयकारिरूपं,
देवं भवन्तमवलोकयतोऽपि न स्यात् ।
यस्याऽऽस्यमुल्लसितलोचनयुग्ममीश !,
काष्ठं पशुः किमथवा दृषदेष साक्षात् ॥ १५

यन्न प्रसीदसि विभोऽद्भुतभक्तिभाजि,
निन्दापरे च नरि नैव करोषि रोषम् ।
त्वां लक्षणेन खलु विश्वविलक्षणेनाऽ-
नेनैव दैवतधिया मुनयः प्रपन्नाः ॥ १६

देवाऽन्यदैवतगणादगुणान् नृणां या,
सामान्यसत्त्वसदृशत्वभृतोऽमृतेच्छा ।
साऽत्यन्तनिर्धनजनादतिभूरिभूति-
प्राप्तावतीव महती मनसः समीहा ॥ १७

विश्वत्रयप्रकटदैवतचेष्टितं ये,
देवं मदादपवदन्ति भवन्तमेतम् ।

ते सूरबिम्बमभि रेणुभरं किरन्ति,
दन्तैरदन्ति गिरिसारभरं च दर्पात् ॥ १८

त्वं देव ! मोहितजगत्त्रयमानसोऽपि,
मिथ्यादृशो ददसि नो मनसः प्रमोदम् ।
आप्यायिताखिलमहीतललोचनोऽपि,
किं कोकलोकमुखमुज्ज्वलयेत् ? कलावान् ॥ १९

योऽनेकशोपि ददृशे न भवान् दृशेश !,
स्यादस्य देव ! परतीर्थकरेऽनुरागः ।
आजन्मतोऽप्यनवलोकितरत्नजाते-
श्चेतोरतिर्भवति हि प्रति काचखण्डम् ॥ २०

देवान्तरस्य भगवँस्तव चान्तरं यो,
नो बुध्यते विबुध बोधकबुद्धिवन्ध्यः ।
निम्बाम्रकाचमणिसर्षपमन्दराद्रि-
भावोत्करे किमु भिदां स विदाङ्करोतु ? ॥ २१

देवाः परे परमडम्बरधारिणोपि,
नो लेशतोऽपि तिरयन्ति तव प्रभावम् ।
खद्योतका द्युतिततिं दधतोऽपि किं वै,
वैवस्वतं मुकुलयन्ति किल प्रतापम् ? ॥ २२

नैकप्रकल्पितविकल्पज्ञ(श?)ता अपि स्यु-
र्जोषं जुषः सदसि ते जिन ! तेऽन्यतीर्थ्याः ।
किं घोरघूत्कृतिपरा अपि नैव घूका,
मूका भवन्ति सवितुर्महसां समूहे ? ॥ २३

ये त्वन्मतामृतरहस्यरसैकचित्ता,
नूनं मतिर्न रमतेऽन्यमतेषु तेषाम् ।
आस्वादितामृतरसस्य नरस्य किं स्यात्,
पातुं स्पृहापि सलिलान्यपि पङ्किलानि ? ॥ २४

चेत्कस्यचिद् गतमतेर्न मतं मतं ते,
स्यादस्य विश्वमहितस्य ततः क्षितिः का ? ।
रुच्या न चौरजनचेतसि चन्द्रिका चे-
च्छोच्या भवेत् किमियतापि जगत्प्रियेयम् ॥ २५

पश्यन्त्यभव्यभविनो नहि दूरभव्या-
श्चाशेषविश्वविदितं भगवन् ! भवन्तम् ।
किं वा जगत्प्रकटमम्बुजबन्धुबिम्ब-
मालोकयन्ति जनुषान्धजनाः कदाचित् ? ॥ २६

मिथ्यात्वमोहविषमाहिमहाविषेण,
ग्रस्तस्य विश्वजगतो गतचेतनस्य ।
अस्य प्रबोधनविधावनुपाधिशुद्धं,
न त्वन्मतामृतमृते ह्यपरोऽस्त्युपायः ॥ २७

तप्तं तपो न विततं न जपोऽपि जप्तः,
क्लृप्ता न दैवतशतक्रमपर्युपास्तिः ।
नानाक्रिया अपि कृता नहि मुक्तये स्यु-
स्त्वच्छासनं जिन ! विना भविनां कदाचित् ॥ २८

तप्त्वा तपांस्यपि परैः शरदां शतानि,
या यत्नवद्भिरपि सम्पदवाप्यतो नो ।

चित्रं जना जिनपते ! त्वदुपज्ञपुण्या-
दन्तर्मुहूर्तविहितादपि तां लभन्ते ॥ २९

त्वद्दर्शनं जगति न प्रतिभाति किञ्चि-
दन्तर्गतं तव यदीश ! न शासनस्य ।
किं सम्भवेदिह भवेऽपि महन्महस्त-
दन्तर्भवेन्न यदहर्पतिकान्तिपुञ्जे ! ॥ ३०

या वागगोचरसुरासुरसौख्यसम्पद्,
या मानुषा सुखसमृद्धिरतिप्रवृद्धा ।
मोक्षैकमुख्यफलभृद्भवदीयभक्तेः
प्रासङ्गिकं फलमिदं प्रवदन्ति सन्तः ॥ ३१

स्वामिन् श्रीगुरुदेवसुन्दरगुणास्त्वय्यैव सर्वे व्यधुः,
स्थाने(नं) नूनमशेषदोषनिवहाश्चान्येष्वथो नाकिषु ।
तन्मा भूज्जननान्तरेऽपि हि कदाप्येतेषु देवत्वधीः,
स्वप्नेऽपि प्रतिजन्म सम्भवतु मे नित्याऽऽप्तबुद्धिस्त्वयि ॥३२
(शा.वि.)

एवं सर्वान्यदेवानधिगतमहिमश्रीसमालिङ्गिताङ्गः,
श्रीनाभेयो जिनेन्द्रोऽर्बुदगिरिशिखरोत्तंसभूतोऽभिनूतः ।
भक्त्युत्कर्षात् सहर्षं तनुतरमतितोऽप्याभवं मेऽव्ययश्री-
कैवल्यातुल्यमोदोदयसुखनिधये बोधिलाभाय भूयात् ॥ ३३
(स्रग्धरा)

पू.आ.श्री सोमसुन्दरसूरिविरचितम्

# १३. ॥ श्रीयुगादिजिनस्तवनम् ॥

(शार्दुलविक्रीडितम्)

ॐकारः सकलत्रिलोककमलास्वीकारलीलाविधौ
ह्रींकारः कलिकालकल्मषमलप्रक्षालनाकर्मणि ।
सत्यङ्कार उरुप्रसिद्धमहिमश्रीमत्परब्रह्मणः
श्रीनाभेयजिनेश्वरक्रमनमस्कारः श्रिये स्तान्मम ॥ १

सच्चारित्ररमा विवाहसमये यद्देहगेहाङ्गणे
वंशप्रांशुभुजाग्रजाग्रदतुलस्कन्धद्वयव्यापिनी ।
यत्ते मङ्गलकृन्नवाङ्कुरयवश्रेणीव वेणी जटा
स श्रीनाभिभवः श्रियेऽस्तु विभवः सम्प्राप्तसद्वैभवः ॥ २

शुक्लध्यानजलैः शशाङ्कविमलैर्मुक्तार्गलैः शीतलै-
राकण्ठं परिपूरितात् प्रतिदिशं यन्मानसान्मानसात् ।
कल्लेवर्हि.......रुज्झिता शितितरा रेजे रजःशैवल-
श्रेणीवांसजटा स टालयतु वो विघ्नान् युगादीश्वरः ॥ ३

यस्यान्तःकरणाम्बुजान्मुकुलितान्मायातमायाविशा-
दिव्यज्ञानसहस्रदीधितिकरप्राग्भारविस्मेरीतान् ।
मिथ्यानल्पविकल्पकोटिपटलीभृङ्गावलीवाद्ययौ
स्कन्धालञ्छिजटाछ्लेन ऋषभः सोऽस्तु श्रिये भाविनाम् ॥ ४

सन्धिं कारयितुं यदीयवचसा पीयूषयूषस्य किं ?
माधुर्येण निराकृतस्य भयतः पातालमासेदुपः ।
तत्कुण्डाधिकृताः फणाभृत इमे प्राप्ता जटाकैतवात्
कर्णाभ्यर्णमसौ स सौख्यमखिलं दद्याद्युगादीश्वरः ॥ ५

श्रीमद्भिर्भुवनानि भासुरतरैस्तेजोभिराभासयन्
श्रीनाभेः कुलदीप उत्तमगुणस्थानैकपात्रे स्थितः ।
दग्धानङ्गपतङ्ग उज्ज्वलदिशासङ्गः सुरङ्गज्जटा-
प्रोन्नीद्राञ्जनरेख एष ऋषभस्तत्त्वप्रकाशी द्रवः ॥ ६

स्वामिन् ! मां निष्कलङ्कां परिहरसि किमु स्नेहलां कर्तुमेवं
विज्ञप्तिं राज्यलक्ष्म्याऽनुनयनिपुणया दूतिके प्रेषिते किम् ? ।
दीक्षायां यस्य शस्यश्रुतितटजटयोः कैतवाद्वैतदम्भात्
स श्रीनाभेयदेवः प्रथयतु भवतां संहतीरिहितानाम् ॥ ७

(स्रग्धरा)

यद्वक्रेण जिता पयोजपटली नंष्ट्वाऽम्बुदुर्गं श्रिता
तत्रापि व्यथिता मरालविहगैः कीर्तेः सुहृद्भिस्ततः ।
तन्मा.....ऽम्बुजिनीव सन्धिविधये यत्पृष्ठिलग्नाऽभ्रमत्
प्रेङ्खत्कुन्तलमालिकाकपटतः सोऽस्तु श्रिये नाभिभूः ॥ ८

स्वामिंस्त्वन्मुखमत्सरान्मम पतिर्जातः कलङ्की ततः
कारुण्यैकनिधे ! प्रसीद न पुनः सेर्ष्यो भविष्यत्यसौ ।
कर्णाभ्यर्णमिवाययाविति तमी विज्ञिप्सुरिन्दुप्रिया-
व्याजात् स्कन्धजटावलेः स भवतां श्रीआदिदेवः श्रिये ॥ ९

सौभाग्यैकनिधिर्जरोपधिलुलन्नीलालिमालोदधि-
र्दारिद्र्यप्रलयः प्रभारुणनखप्रेङ्खत्प्रवालालयः ।
निर्वाणैकफलः कराङ्गुलिदलश्च्छायाश्रिया मांसलः
कल्पद्रुर्वृषभः करोतु स शुभश्रेणीं सुवर्णप्रभः ॥ १०

उद्यद्ध्यानदवानलोच्छलदुरुज्वालावलीप्रज्वलत्-
दुर्वारस्मररागरोगविषयाऽहङ्कारकान्तारतः ।

धूमश्रेणिरुदुल्ललास किमसौ यन्मौलिदेशे जटा-
व्याजेन त्रिजगत्प्रभुः स जयतात् श्रीआदितीर्थङ्करः ॥ ११

यस्मिन् श्रीसदने विभावि भुजयोर्युग्मं बृहत्तोरणं
स्तम्भद्वन्द्वनिभं सपूर्णकलशं पीनांसयोर्दम्भतः ।
खेलत्केकिकलं तदूर्ध्वमतुलं रेजे जटामण्डलं
देवः सेवकवत्सलः स जयताच्छ्रीमारुदेवश्चिरम् ॥ १२

धर्मद्रोहणलम्पटं जितवतोर्मोहं जगत्कण्टकं
स्वामभ्यर्णमवाप्तयोः सबलयोः सुध्यानयोर्वीरयोः ।
मुक्तेः खड्गलते इव प्रबभतुर्यत्के जटासन्तती
स श्रीआदिजिनस्तनोतु विजयं स्वर्भूर्भुवोनायकः ॥ १३

सोल्लासं परिरब्धयोः सुचरणज्ञानश्रियोः सन्ततं
दिव्यन्नीलमणीघृणीविलुलिते.........वेणीदृशोः ।
यस्यांसस्थलयोर्विलोलनलिनीनीलीदलश्यामले
भ्रातः कुन्तलमालिके स जयतु श्रीनाभिजन्मा जिनः ॥ १४

नाभेः सम्भवमाप पापशमनः स्रष्टा च वेदस्थितेः
सम्प्राप्तः परमेष्ठिनां वरचतुर्वर्णव्यवस्थाकरः ।
यो ब्रह्मा जनकश्चतुर्मुखधरः स ब्रह्मरूपः सतां
लोलन्नीलजटावलिः कलिमलं भिन्द्याद्युगादीश्वरः ॥ १५

शुक्लध्यानानलेन प्रसृमरमहसा देहमूषान्तराले
जीवद्रव्यात् सुवर्णादतिमलिनतमाद्यैश्च सन्ताप्यमानात् ।
रागद्वेषादिकिट्टिप्रकर इव बहिः कुन्तलालीछलेन
जातः सज्जातरूपद्युति ऋषभजिनः स श्रिये भूर्भुवःस्वः ॥१६

(स्रग्धरा)

स्पर्द्धा सार्द्धं त्वया यत्प्रतिहतमतिभिर्निर्मिता कल्पवृक्षै-
र्हानिस्तेषां ततोऽभूद्भुवि भवति शुभं स्पर्द्धया किं महद्भिः ।
स्वामिंस्तेभ्यः प्रसीद त्वमिति कथयि तत्प्रियाकल्पवल्ल्यः
प्रापुर्दम्भाज्जटानामुपयदमृषभः श्रेयसे वः स भूयात् ॥ १७

.....युगलस्वभावसरले लावण्यपुण्यामृता-
द्यस्य प्राणिगणैः स्वलोचनपुटैः पेपीयमानात्स्ववा ।
तद्बिन्दुप्रकरैः पतद्भिरुदगुर्दूर्वाङ्कुरा अंशयो
र्लोलत्कुन्तलकैतवात् स भवताच्छ्रीनाभिभूर्भूतये ॥ १८

सौभाग्यैकनिधानयोर्नयनयोर्यस्य प्रशस्यश्रियो
रक्षाधानकृतावधानमुरुगद्वन्द्वं घनश्यामलम् ।
पीनस्कन्धतरा विलम्बितजटाव्याजात्तनु भ्राजते
श्रेयः श्रेयगुणाश्रयः स वृषभस्तन्यात् सुभव्यात्मनाम् ॥ १९

चक्रेऽस्माभिस्त्वदीये नहि खलु विषयग्रामभङ्गादिराज्ये
तस्मात् कस्मादकस्मात् प्रभुरधिगतवानस्मदुच्छेदकर्त्रीम् ।
दीक्षामेतामितीवाऽनुनयनविधये मोहराजस्य दूतो
यत्कर्णाभ्यर्णमाप्तौ चिकुरततिमिषात् स श्रिये नाभिसूनुः ॥२०

(स्रग्धरा)

पावित्र्योज्ज्वलतादिकान् गुणगणान् गङ्गापगाया इव
त्वं मह्यं जिन ! देहिदेहिपटलीवाञ्छासुपर्वद्रुम ।
एवं प्रार्थनयेव सूर्यतनया यस्याऽन्तिकं सङ्गता
दम्भात्कुन्तलसन्ततेः स तनुतां श्रीआदिदेवः श्रियम् ॥ २१

सम्यग्ज्ञानसमुज्ज्वलस्थिरजलः सत्कज्जलश्यामलो-
न्मीलत्कुन्तलपारिजातकदलप्रोल्लासितांसस्थलः ।
कल्याणद्युतिमञ्जुलः पथि दृशोः प्राप्तः फलन्मङ्गल-
श्रेणीभिर्वृषभः स पूर्णकलशः सौख्यानि पुष्णातु वः ॥ २२

यस्यास्येन्दुमरीचिवीचिनिचयैरत्युल्लसद्भिः पुरो
द्वैधीभावमवापितेव तमसां श्रेणी स्थिता पार्श्वयोः ।
नीलीश्यामलकान्तिमांसलकलस्फूर्जज्जटायामल-
द्याज्यात्सोऽस्यतु नाभिभूर्जिनपतिर्मन्मानसात्तानसम् ॥ २३

गाङ्गेयच्छायकर्णद्वयरुचिररुचिप्रेङ्खदैरम्मदश्री-
दन्तज्योतिर्बलाकावितितिपरिगता मेघमाला विशाला ।
व्याख्या गम्भीरनादैरिव सपदि जिता कुन्तलालीछलेन
प्राप्ता यत्सेवनार्थं प्रथमजिनपतिः सोऽस्तु शस्यश्रिये वः ॥२४
(स्रग्धरा)

रूपातीतपदस्थितोऽपि भगवान् बाह्यैर्विकल्पैरसा-
वेवं ध्यानपथं कथञ्चन मया नीतो युगादिप्रभुः ।
ज्ञात्वा बालकचापलं तदपि मे कारुण्यपुण्यार्णवः
कुर्याच्छ्रीगुरुसोमसुन्दरपरब्रह्मैकलीनं मनः ॥ २५

श्रीशत्रुञ्जयमहात्म्ये पू.आ. श्री धनेश्वरसूरिप्रणीतम्

## १४. ॥ श्रीआदिजिनस्तोत्रम् ॥

(अनुष्टुप्)

क्वाऽहं बुद्धिधनैर्हीनः, क्व च त्वं गुणसागरः ।
तथापि त्वां स्तवीम्येषस्त्वद्-भक्तिमुखरीकृतः ॥ १

त्वया हतास्तपोऽस्त्रेण, सर्वथाऽन्येन दुर्जयाः ।
रागाद्या रिपवः स्वामिन्नात्मनः स्वार्थघातकाः ॥ २

रागाद्यै रिपुभिर्देवाभासा अन्ये विडम्बिताः ।
पश्यन्ति ते बहिः शत्रून् विहायान्तर्निकर्तिनः ॥ ३

अनन्तज्ञानमाहात्म्य-वारिधे ! चतुर ! प्रभो ! ।
जगत्प्रदीप ! भगवन् ! नाभेय ! भवते नमः ॥ ४

अष्टाङ्गानि तथा नाथ ! भवान् योगस्य निर्ममे ।
यथा तानि प्रवर्तन्ते कर्माष्टकनिपिष्टये ॥ ५

शत्रुञ्जयशिरोरत्नं, श्रीनाभिकुलभास्करम् ।
स्वर्गापवर्गव्यापारनिदानं त्वां विभो ! स्तुमः ॥ ६

रत्नेन काञ्चनमिव तेजसैव नभोमणिः ।
अलङ्कृतं त्वया नाथ ! तीर्थं शत्रुञ्जयं हृदः ॥ ७

नाभ्यर्थये स्वर्ग-सुखं न मोक्षं न नरश्रियम् ।
सदा त्वत्पादपद्मानि वसन्तु मम मानसे ॥ ८

पू.आ. श्री उदयप्रभसूरिविरचितम्

## १५. ॥ श्रीमरुदेवीस्तोत्रम् ॥

(उपदेशमालाकर्णिका-अन्तर्गतम्)

(वसन्ततिलका)

आश्रित्य निश्चयनयात्मकमेकधैव,
मार्गं शिवस्य लघु सिद्धिपदं गतायाः ।
द्वेधा क्षमाधिपतिषु प्रथमस्य मातु-
स्त्रेधा प्रणौमि मरुदेवि ! पदद्वयं ते ॥ १

मातस्त्वया त्रिभुवनाभरणैकरत्नं,
पुत्रं प्रसूय मरुदेवि ! युगादिदेवम् ।
चक्रे चिरादुपचितस्य मदस्य भङ्गो,
भूमेः सरोहणगिरीन्द्रभुवो वराक्याः ॥ २

विघ्नस्त्वदासनपवित्रितकन्धरस्य,
किन्दध्नतामनुपमस्य न कुञ्जरस्य ।
आरुह्य यत्र भुवनाऽग्रगताऽपि मुक्ति-,
रालिङ्गिता प्रियसखीव सुखं त्वयाऽम्ब ! ॥ ३

दृग्युग्मनीलिमकृता सह कर्मणैव,
त्रस्तानि केवलविलोचनदूषकाणि ।
कर्माणि देवि ! तव युक्तमुदग्रकर्म-
निर्मन्थविस्तृतनयं तनयं दिदृक्षोः ॥ ४

व्याख्याध्वनौ स्फुरति मोहनिशावसान-
तूर्योपमे प्रथमतीर्थपतेः सुदूरात् ।

अभ्युद्ययौ नयननिर्मलताऽरुणश्रीः
प्राच्यां त्वयीह जिनमातरि केवलार्क्कः ॥ ५

त्वत्सूनुना जननि ! सञ्जनिताद्यथोक्त-
चारित्रतो महसि केवलनाम्नि जाते ।
त्वं सप्तरज्जुमिषतः किल सप्ततूली-
राक्रम्य साधु मरुदेवि ! मुदं तनोषि ॥ ६

कर्तुं स्वयं प्रगुणतामिह सिद्धिसौध-
प्रावेशिकप्रकृतकौतुकमङ्गलानाम् ।
शङ्के सुतस्य भुवनाधिपतेर्मुमुक्षोः,
पूर्वं गताऽसि मरुदेवि ! भवं विमुच्य ॥ ७

इत्थं तव स्तवनतः सुकृतं कृतं यत्,
तेनाम्ब ! तीर्थपतिशासनमेतदुच्चैः ।
सूर्योदयप्रभववास्तवदीप्रतेजः -
स्मेरस्य पुष्यतु सरोजवनस्य लक्ष्मीम् ॥ ८

पू.आ.श्री देवेन्द्रसूरिविरचितम्

## १६. ॥ श्रीयुगादिजिनस्तवनम् ॥

(अनुष्टुप्)

जय देवाधिदेवाऽऽधिव्याधिवैधुर्यनाशन ! ।
सर्वदा सर्वदारिद्र्यमुद्राविद्रावणक्षम ! ॥ १

अगण्यपुण्यकारुण्यपण्यापण ! वृषध्वज ! ।
जय सन्देहसन्दोहशैलदम्भोलिसन्निभः ॥ २

स्फुरत्कषायसन्तापसन्तापशमनामृत ! ।
जय संसारकान्तारदावपावकपावन ! ॥ ३

सदा सदागमाम्भोजविबोधनदिनप्रभो ! ।
नत्वा न त्वा भवे भावि भाविनः पतनं खलु ॥ ४

ये देवदेव ! गम्भीरनाभे ! नाभेय ! भूरिभिः ।
त्वद्गुणैः स्वं नियच्छन्ति ते मुक्ताः स्युर्महाद्भुतम् ॥ ५

देव ! त्वन्नामसन्मन्त्रो येषां चित्ते चकास्ति न ।
मोहसर्पविषं तेषां कथं यातु क्षयं क्षणात् ? ॥ ६

परिस्पृशन्ति ये नित्यं त्वदीयं पदपङ्कजम् ।
तेषां तीर्थेश्वरत्वादिपदवी न दवीयसी ॥ ७

नमः सद्दर्शनज्ञानवीर्यानन्दमयाय ते ।
अनन्तजन्तुसन्तानत्राणप्रवणचेतसे ॥ ८

एवं युगादितीर्थेशं ये स्तुवन्ति सदा नराः ।
देवेन्द्रवृन्दवन्द्यास्ते प्राप्नुवन्ति महोदयम् ॥ ९

पू.आ.श्री कौस्तुभसूरिविरचितम्

## १७. ॥ श्रीआदिनाथस्तोत्रम् ॥

(अनुष्टुप्)

आदिनाथ ! जगन्नाथ ! शरणागत-वत्सल ! ।
नमामि नाथ ! सर्वज्ञ ! भूयो भूयो नमाम्यहम् ॥ १

आर्त्तानां भुवि लोकानां, भक्त्याऽऽधीनस्त्वमत्र वै ।
सन्ततं कृपया स्वामिन् ! प्रादुर्भवसि भूतले ॥ २

तत्त्वतो रादिरेव त्वं, लोकाऽनुग्रहकाम्यया ।
आदिनाथाऽभिधो लोके, मारुदेवीसुगर्भजः ॥ ३

नाभिराजसुनो ! देव ! ख्यातो जन्मी महागुरुः ।
लीलया दर्शयन् सर्वं, लोकानन्ते त्वमेव हि ॥ ४

सर्वदा विद्यमानस्सन्, केवली नामतो ननु ।
मिथ्या-ज्ञान-विनाशाय, भगवन् ! त्वं करुणां कुरु ॥ ५

मुक्तये जगतां नाथ ! जगत्यां भवतारक ! ।
नानानामधरो देव ! त्वमेव पूज्यसे जनैः ॥ ६

सुभक्त्या तव लोकानां, विचित्राश्चित्त-वृत्तयः ।
अतो नेकस्त्वमेकोऽपि, भज्यन्ते यत्र कुत्रचित् ॥ ७

भेद-भावं परित्यज्य, ये जनाः पर्युपासते ।
त एव सफला नित्यं, कृतकृत्यास्त एव हि ॥ ८

मङ्गलं मङ्गलार्थी च, जयार्थी लभते जयम् ।
कामार्थी लभते कामान् तत्तदर्थी मनोगतम् ॥ ९

विद्यार्थी लभते विद्यां, धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रं, मोक्षार्थी लभते गतिम् ॥ १०

जपेद् वृषभसुस्तोत्रं, षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च, लभते नाऽत्र संशयः ॥ ११

श्रीहीरसूरिकुलकौस्तुभसूरिवर्य्य,
श्रीमद्धिमाचल-सतीर्थ्य-गुमाननूत्या ।
पूत्यासदा पठितया ननु 'भव्य' वाण्या,
सुप्रीणितो जगति सत्वरमादिनाथः ॥ (वसन्ततिलका) १२

पू.आ.श्री जयशेखरसूरिविरचितम्
पञ्चाक्षरयमकमयम्

## १८. ॥ श्रीआदिनाथस्तोत्रम् ॥

(आर्या)

निरुपधि वैभवकर वै भवकर वैरिच्छिदे युगादीशम् ।
विगतघनमोहमाये नमोहमाये शिवस्य रसिकस्ते ॥ १

वाणी वरला भवतो वरला भवतो विशुद्धगतिचरणा ।
गुण-गण-सज्जनकमऽलं, सज्जनकमलं विभूषयति ॥ २

तव पुरतः केवलिनः केवलिनः कामकारणं विषयाः ।
यत्त्वं वाक्-पर महसा परम हसाऽर्हं व्यधामोहम् ॥ ३

धृतिपरमोदकसरसा मोदक सरसा गमोर्मि(र्भ)भृता भवता ।
विघटितमानसमस्तं मानसमस्तं मलमनायि ॥ ४

यदि दित परमतमोहं परमतमोहन्तृ ते श्रुतं वचनम् ।
तन्मे न व्याकरणे नव्याकरणेऽपि भारते प्रीतिः ॥ ५

विदलितमाय तवेडातमाप्य तवेडातमाप्य तरति जनः ।
विपुलायामां तरसा यामान्तरऽसार भव सरितम् ॥ ६

दूरितराजसभावं राजसभावन्द्य ते श्रुतमधीत्य ।
अपृणामाऽशान्त रसा शान्त रसास्वादने सुचिरात् ॥ ७

यर्हि तमोऽसमवासर ! समवासरदुपपुरं भवाँस्तर्हि ।
यामाप मुदं भरतोऽदम्भरतो वेदकोऽन्यस्ताम् ॥ ८

अपवारण सङ्गरतो रण सङ्गरतो जनस्त्वया शममितः ।
तत्संसदि चतुरानन ! चतुरा न न वर्णयन्ति त्वाम् ॥ ९

नोद्धरसि किमु निरञ्जन ! मुनिरञ्जन ! मां भवाऽटवी(वटे)पतितम्।
असदुन्मादेकमना देकमना यत्त्वयि जनोऽयं ॥ १०

भयभित् ! तव प्रसादा तवप्रसादाद्वशेऽस्य शिव-नगरी ।
शमरसतोऽतनुललना तनुललना दजनि यो विमुखः ॥ ११

परिचित संवरदारा वरदाराः श्रीपतिरपि प्रकृति लोला ।
तच्चेतो मे धावति मेधावति सुरमणौ भवति ॥ १२

श्रीशत्रुञ्जयशेखर-जयशेखरसूरिणा सदेष्येत ।
तव निर्मल रुचिरायतिरुचिरा यतिवल्लभासेवा ॥ १३

पू. आ. श्री ऋषिवर्द्धनसूरिरचितम्

## १९. ॥ श्रीऋषभदेवस्तवनम् ॥

(अनुष्टुप्)

जय त्वं नाभिभूपालकुलपङ्कजभानुमान् ! ।
[श्री] आदिदेवदेवेश ! स्थिरतामेरुसानुमान् ! ॥ १

तव सेवां समीहन्ते नायका नाकिनामपि ।
वार्ता मनुजमात्राणां का ? च [त]दनुजन्मनाम् ॥ २

यथा मुग्धहृदो मातुस्त्वयाऽ-[र्पि]तं शिवं सुखम् ।
तथा ममाऽपि देहि त्वं वीतरागोऽसि चेद् विभो ! ॥ ३

रागद्वेषादयो विश्वविश्वोच्चाटकराः कथम् ।
त्वया हता द्विषस्तातोपायं ज्ञापय मेऽपि तम् ॥ ४

पिता त्वं च मे माता शिशुस्तेऽहं च सेवकः ।
मुक्तिकन्याविवाहं मे कारयाऽऽशां च पूरय ॥ ५

धनी दाता दयालुस्त्वं प्राप्तोऽस्यद्य कथञ्चन ।
निर्लज्जो याचकोऽहं त्वं [प्रयच्छ हि] म[द]र्थित [म्] ॥६

भ्रामं भ्रामं भवाम्भोधिं मया लब्धोऽसि पोतवत् ।
पारं नय निमज्जन्तं मा मां मुञ्च कृपां कुरु ॥ ७

अनुभूतं पुरा दुःखं भवभ्रमणजं स्वयम् ।
जानन्नु[पेक्षसे किं] मां ततः सदय ! मोचय ॥ ८

भृत्यचिन्तां विधायैव सुखं भुङ्क्ते सुठक्कुरः ।
प्राप्तोऽपि शिवसाम्राज्यं चिन्तां किं कुरषे न मे ? ॥ ९

यद्रागद्वेषमोहाद्यैः कृतं [हि दुष्] कृतं मया ।
त्वन्नामस्मरणेनाऽऽशुप्रलयं यातु तन्मम ॥ १०

देवस्त्वमेव च गुरुस्त्वमेव त्वदुदीरितः ।
धर्मो मे शरणं स्वामिन् ! भूयाज्जन्मनि जन्मनि ॥ ११

तव नामाङ्घ्रिध्यानानां मज्जिह्वाभालचेतसाम् ।
मा भूदत्र परत्रापि विरहः स्पृहयाम्यदः ॥ १२

पाहि मां पाहि मां तात ! पाहि मां पाहि मां प्रभो ! ।
सेवकः सेवकोऽहं ते सेवकः सेवकोऽस्मि ते ॥ १३

राज्यादिभिर्न मे कार्यं तव सेवैव मे प्रिया ।
वासवा अपि दासन्ति सेवाहेवाकिनां हिते ॥ १४

इति स्वप्नानुसारेण ऋषिवर्धनसूरिभिः ।
स्तुतः श्रीऋषभस्वामी सर्वसिद्धिं प्रयच्छतात् ॥ १५

पू.आ.श्री जिनप्रभसूरिविरचितः

## २०. ॥ श्रीयुगादिदेवस्तवः ॥

[शार्दूलविक्रिडीतः]

मेरौ दुग्धपयोधिवाः-प्लवमिषाज्जन्माभिषेके ध्रुवं
यत्कीर्त्तिप्रकराः प्रसस्नुरभितो लोकत्रयीं लङ्घितुम् ।
नैव क्वापि कदापि युष्मदपरं स्वामी करिष्याम इ-
त्यङ्गस्पर्शनतः प्रणीतशपथास्तं नाभिसूनुं स्तुमः ॥ १

पुण्यश्रीसुरभेरभीप्सिततरां चारिं प्रदातुं किमु ।
प्रत्याग्राहरितालिकाङ्कुरततिर्न्यस्ता तपः सम्पदा ।
यस्यांशस्थलयोश्चकास्ति चिकुरश्रेणी कृपाणी रुचिः
स श्रीमानृषभप्रभुः प्रभवतु प्रद्रोग्धुमेनांसि नः ॥ २

वस्तु प्राप्य किमप्यपूर्वमनघा दद्युर्गुरुभ्योऽङ्गजाः
प्रागित्यार्यकुलक्रमानुसरणाद्योऽनर्घरत्नोपमम् ।
मात्रे कौशलिकां व्यधत्त विविधक्लेशार्जितं केवलं
सद्यः सद्यतु नाभिनन्दनविभुर्विद्यामविद्यां मम ॥ ३

मामेवैक्षत पूर्वमस्य जननी स्वप्ने गजादीन् पुनः
पश्चादित्यभजद् भवन्तमृषभः सौभाग्यदर्पा ध्रुवम् ।
जातस्थामतया धुरन्धरतया गत्याजितस्त्याजिता-
हङ्कारः शरणीचकार भगवंस्त्वामेव चाङ्कच्छलात् ॥ ४

त्वां वीक्ष्योभयलोकभोग्यफलदं स्वं चैहिकर्द्धिप्रदं
पङ्क्तिः कल्पमहीरुहास्तव गुणाधिक्येन सम्प्रेरिताः ।

एकैकं निजपल्लवं नखमिषात् कुत्वार्चनं त्वत्पदो-
र्मोघं मन्यतया जिन ! त्वदुदये जग्मुः किलादृश्यताम् ॥ ५

त्वत्सेवां विनमेर्नमेश्च करतोः पातालपातालस-
त्तोषः खेचरचक्रितां निरवपद्यस्मादसौ निश्चितम् ।
त्वां साक्षात्तदसिद्धयेप्युभयतः सङ्क्रान्तमेक्ष्यानुमां
हद्या धत्त यदादिमध्यनिधने स्वाम्येव सेव्योऽनयोः ॥ ६

श्रेयांसप्रतिलम्भितैर्गजपुरे पीयूषपूरोपमै-
श्चोक्षैरिक्षुरसैर्भरेण भरिते नाथ ! त्वदीयाञ्जलौ ।
चण्डांशुःप्रतिबिम्बितः करतलं प्राप्तः प्रभो ! केवला-
लोकः पारणयोद्धृते वपुषि ते द्योति स्म सोसूच्यते ॥ ७

यत् सर्वं महतां महद्वच इदं सत्यापयन् वत्सरं
मानः संज्वलनोऽपि बाहुबलिनः पक्षायुरप्यस्फुरत् ।
तत्रास्कन्ददमूढलक्षतरता सार्वज्ञभाजस्तवो-
पेक्षापारमितैव हेतुपदवीं कालादिसाचिव्यभाक् ॥ ८

आषाढे त्रिदिवादभूदवतरस्तिथ्यां चतुर्थ्यां शिता-
वष्टम्यां बहुले मधोस्तव जनुर्दीक्षा क्षणो जज्ञतुः ।
कृष्णे फाल्गुनिकस्य तीर्थपतिथावेकादशे केवलं
देवैभिस्तु पवित्रतां नवमहैर्नीता विनीतापुरी ॥ ९

पूर्वाह्णे तपसस्त्रयोदशतिथौ शित्यां नगेऽष्टापदे
प्रायैः षड्भिरभीचिभे व्रतभृतां पङ्क्त्या सहस्रैः समम् ।
पर्यङ्कासनि तस्थिवानुपगतस्त्वं पूर्वलक्षा चतु-
र्युक्ताशीतिमितायुरव्ययपुरश्रीभर्तृभावं विभो ! ॥ १०

जित्वा वा लवणोदधिं निजवपुर्लावण्यलक्ष्मीभरै-
र्ज्योतिर्ज्योतिभुजाचतुष्टयचतुश्चक्रीपदेशेन या ।
तस्माद्दण्डपदेऽग्रहीद् ग्रहपुषानुच्चैश्चतुः संख्यकान्
सा त्वद्भक्तिकृतो भनक्ति विपदां चक्राणि चक्रेश्वरी ॥ ११

मामेकाक्षमुदाहरन्ति मुनयः कस्मादितीव क्रुधा
रक्तं लोलतरालितारमुदयच्चक्षुःसहस्रं नृणाम् ।
रक्ताशोकतरुः प्रसूननिकरव्याजेन सन्दर्शया-
मास व्याहरतो वृषं हतनतारिष्टोपरिष्टात्तव ॥ १२

नाहारस्तव संस्कृतोऽजनि गुणैरध्यूषुषो मन्दिरं
व्याहारस्तु सुसंस्कृतोऽजनि गुणैर्गेहे यतित्वेऽपि च ।
किन्तु द्वावपि मार्दवेन सहितौ सौहित्यदौ द्वावपि
द्वावप्यर्पयतः स्म चामृतसुखास्वादं सदा सेवितुः ॥ १३

दिग्यात्रासु चलद् यदीयपृतनोत्सर्पद्रजोगुण्डितं
स्फूर्जत्तूर्यरवाकुलीकृतचतुःसिन्धूच्छलद् वारिभिः ।
द्यौरव्यन्तिकवर्तिभास्करकरोत्तप्तैः स्वमक्षालयन्
स श्रीमान् भरतस्त्वदंह्रिकमले भक्त्यालिलीलां ललौ ॥ १४

द्रष्टव्यान्तररामणीयकमुदत्क्षेडापहारि स्फुरत्
सौन्दर्यामृतपूर्णयोर्भुजशिरः सौवर्णसत्कुम्भयोः ।
स्निग्धश्यामलकान्तिपन्नगपुगं रक्षाधिकारे त्वया
वेल्लन् कुन्तलवल्लरीद्वयनिभान्मन्यामहे स्थापितम् ॥ १५

आदौ शिल्पशतं द्विसप्ततिकलाः षष्टिश्चतुर्भिः समा-
युक्ताः स्त्रैणगुणाः प्रजाहितकृते नाथस्त्वयाविष्कृताः ।

उत्पन्ने सति केवले तु सुधियां रत्नत्रयं देशिनं
स्वार्थश्चेतसि गौण एव महतां मुख्यः परार्थः पुनः ॥ १६

आरूढ-स्तप-कुञ्जरं शुचिलसज्ज्ञानक्रियाचामरो
भावारींस्तरसा विजित्य शिरसिच्छत्रं त्वदाज्ञां दधत् ।
शिष्याणूस्तव पुण्डरीकगणभृज्जीयात् क्षमाभृत्पतिः
श्रीशत्रुञ्जयभूमिभृद्विरचितो येन स्वनामाङ्कितः ॥ १७

मारिर्वारिहुताशनो द्विरसनः पञ्चाननः काननं
शाकिन्यः पलभुक्कुलं परबलं पाटच्चरः सिन्धुरः ।
कारागारगरग्रहामयमहीपालाः कराला अपि
त्वत्पादस्मृतिमादरान् परवशं नेतर्न नेतुं क्षमाः ॥ १८

त्वद्देहप्रभया विजित्य कनकं रम्यत्ववादस्थले
वर्णाधिक्यचिराधिरूढमिव तत् पानीयमुत्तारितम् ।
नूनं निष्कमिति प्रथां तदगमल्लोकेऽमुना हेतुना
कं पाथः समुदाहृतं तदभितो निष्क्रान्तमस्मादिति ॥ १९

दीप्राक्षीयितनिश्चयव्यवहृतिर्भाति क्रियाज्ञप्तिस-
दंष्ट्राढ्यो नयकेसरप्रसरवान् स्याद्वादपुच्छच्छटः ।
प्रोद्यद्युक्तिनखः कुतीर्थिकरिणां जैत्रः स्फुरद्देशना-
जिह्वः सूरिमतिस्थलीषु विचरन् सिद्धान्तसिंहस्तव ॥ २०

दिव्यालङ्कृतिभूषितं द्युपतिना क्लृप्ताभिषेकोत्सवं
त्वां वीक्ष्योद्गतविस्मयैर्मिथुनकैर्न्यस्तानि हस्तद्वये ।
पादावेव तवासिचन् पुटकिनी पत्राणि वा पूरिता-
न्याकारैक्यजपङ्कजभ्रमभुवः सा जात्यरागादिव ॥ २१

यद्राज्यं भरतेश्वराय ददुषी मह्यं तु निर्ग्रन्थतां
तुष्टिस्ते ननु वल्लभोऽस्मि तव तन्मन्ये सुतादप्यहम् ।
सारं वस्तु विभुः प्रियाय हि दिशेद्राज्यं स्वसारं यत-
स्तत्त्यक्त्वा तृणवद्भवानचकलन्नैर्ग्रन्थ्यमेव स्वयम् ॥ २२

सान्द्रामोदविलासवासितदिगाभोगा नभोगामिभि-
र्मुक्तासुस्मितपुष्पवृष्टिररुचद्व्याख्यानभूमौ तव ।
त्वत्सन्त्रासजुषः प्रसूनधनुषः स्रस्तेव हस्तोदरात्
प्रासूनीशरसंहतिस्त्रिभुवनं चक्रे यया प्राग्वशम् ॥ २३

वाच्यावाच्यसदृग्विरूपसदसन्नित्यक्षयित्वात्मकं
सद्द्रव्यास्तिक-पर्ययास्तिकनयस्याद्वादमुद्राङ्कितम् ।
विश्वं वस्तुनयप्रमाणघटयोत्पादव्ययध्रौव्ययुक्
त्वं ब्रूषे स्म सतां यथा कुनयिभिः स्वप्नेऽपि नाप्तं तथा ॥२४

यद्भानुर्दिनमात्रदीप्तिकलिता नक्तंदिवं द्योतिना
स्पर्द्धा बन्धमयं व्यधत्त भगवन् ! सार्द्धं प्रतापेन ते ।
गुप्तं गुप्तिगृहे व्यधारि विबुधैर्भास्वन्मणीकुट्टिम-
व्याख्योर्वीप्रतिबिम्बकैतवधरस्तेनागसा मन्महे ॥ २५

त्वामुच्चैरनमाननक्रमकरं शौर्याश्रयं मत्सर-
त्यक्तं सज्जनदत्तरङ्गमुदयन्मुक्तालयश्रीजुषम् ।
त्राणार्थं भुवनेश्वरं बहुलहर्यन्वास्यमानं जिना-
हार्यापत्शतकोटिपानचकितोऽभ्येति क्षमाभृद्गणः ॥ २६

मुक्ताहारतया तवाब्दमधिकं योऽभूद्विहारः क्षितौ
मुक्ताहारतया सहृद्युपदधे चारित्रलक्ष्म्या निजे ।

दुर्मेघान्यपि वत्सरेण भवता... जन्मदानैकधी-
रादाने पठिनीकृतो निजकरो दानप्रवृत्त्यै सताम् ॥ २७

प्राप्तः पाणिरयं प्रतिग्रहमहाविद्याब्धिपारं प्रभो-
रद्येति प्रमदप्ररूढपुलकाङ्कूराङ्गशृङ्गारिभिः ।
भावत्कादिमपारणावधिदिने भक्त्यासुरैर्भासुरैः
प्रादुर्भावितपञ्चदिव्यमिषतश्चक्रेऽत एवोत्सवः ॥ २८

भेजुर्भद्रकतां भृशोऽपि भवतो यन्मौनिनोपीक्षणा-
द्वीजाधानमभूच्च तेषु भवतः सद्देशनां भो विना ।
सर्वोप्येष तवैव दैवतन्कृतश्लोकत्रिलोकप्रभो-
माहात्म्यातिशयः सुधारसमयः प्रध्वस्तपापोदयः ॥ २९

त्वच्चैत्यप्रणिनंसया तव पदन्यासैः पवित्रस्य ये
देवाष्टापदभूभृतोऽष्टपदिकाः क्रामन्ति पद्धयां नराः ।
अष्टानामपि कर्मणां ददति ये पादं शिरस्सु ध्रुवं
जायेरन्नचिराच्च निर्वृतिपुरी साम्राज्यलक्ष्मीभुजः ॥ ३०

निर्वेदोऽ[प्य]सि नाभिभूः स्मरहरोऽप्यालम्बसे नोग्रतां
कंसं नो पुरुषोत्तमोऽपि कलयस्यार्योऽपि नार्यादृतः ।
त्वं सोमोऽपि यमी कृतान्तजनकः श्रीदोऽपि वित्तापहृत्
जायास्तीर्थपते ! चिरायवि[ग]तच्छद्मापि मायानिधिः ॥ ३१

श्रीनाभेय ! विभुं पदाननदृभुं त्रैलोक्यरक्ष्णे प्रभुं
नीरन्ध्रावृजिनप्रभुं कृतशुभं श्रेयः श्रियो वल्लभम् ।
स्तुत्वेत्यादिकृतं मयार्जिसुकृतं यत्तुङ्गताऽलङ्कृतं
भव्यानामसमः समुज्ज्वलतमस्तेनास्तु सौख्यद्रुमः ॥ ३२

सुधीजनश्रोत्रसुधासुगन्धः शार्दूलविक्रीडितवृत्तबन्धः ।
सतामयं भावरिपुद्विपेषु शार्दूलविक्रीडितमातनोतु ॥ ३३

(उपजाति)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## २१. ॥ श्रीयुगादिजिनस्तवनम् ॥

(अनुष्टुप्)

अस्तु श्रीनाभिभूर्देवो विपन्नाश(त्त्रास)नकर्मठः ।
पवित्रःपोषयन्नाकं सुधर्माधिपतिः श्रिये ॥ १

जाड्यखण्डनपाण्डित्यप्रौढो जगति विश्रुतः ।
हिनस्तु वस्तमःस्तोमं पावको नाभिनन्दनः ॥ २

सूर्यानन्दी महोध्यासी संयमन्यायधीश्वरः ।
समवर्ती जगन्नेता जीयादादिजिनेश्वरः ॥ ३

सनाकीनादृतो दद्याद् वृषभो निर्ऋतिर्मुदम् ।
योऽदोषाचरणप्रीतिरनिकारे शिवे स्थितः ॥ ४

असंस्तुतो जडैर्बिभ्रदपाशं सर्वदाशयम् ।
नाभेयःश्रेयसे भूयादपूर्वो भुवनेश्वरः ॥ ५

पायादनलसख्यातिबन्धुरो हरिणादृतः ।
अहिंसोल्लासमातन्वन् श्रीनाभेयो महाबलः ॥ ६

न सेवितः किम्पुरुषैः सर्ववित्तापवर्जितः ।
भवद्वेषी च ऋषभः श्रीदो जयति नूतनः ॥ ७

चन्द्रावदातदेहश्री वृषभासनतत्परः ।
शिवालयमितः पायादीशानः प्रथमो जिनः ॥ ८

क्षमाप्राग्भारधर्तारं यं श्रीमान् श्रयते हरिः ।
बिभ्राणः कमलं शुभ्रं सोऽनन्तः पातु नाभिभूः ॥ ९

स्वयम्भूर्ब्रह्मलोकेशः शुक्लपक्षसमाश्रितः ।
सकलं कमलासीनः कुरुतामृषभः सुखम् ॥ १०

एवमादिममुनेः स्तवनं यः पापठीति शठतामपहाय ।
विघ्नघातनविधौ पटिमानं
तस्य बिभ्रति दशापि दिगीशाः ॥ (स्वागता) ११

पू.आ.श्री जिनप्रभसूरिविरिचितम्

## २२. ॥ श्रीऋषभदेवस्तवनम् ॥

(आर्या)

(अष्टभाषामय)

संस्कृतभाषा

निरवधिरुचिरज्ञानं दोषत्रयविजयिनं सतां ध्येयम् ।
जगदवबोधनिबन्धनमादिजिनेन्द्रं नवीमि मुदा ॥ १

कस्तवमिति द्विषोलं वदितुं परितो गुणान् गुरुनिभोपि ।
चुलुकैः प्रमित्सति वा क इव जलं चरमनीरनिधेः ॥ २

तदपि त्वद्भक्तिभरप्रतरलितो वच्मि तावकगुणाणुम् ।
चापलनुन्नो स्फुटमपि लपन् शिशुर्वा निरपवादः ॥ ३

ज्ञानप्रदीपजमिव स्निग्धाञ्जनमुपहितं चरणलक्ष्म्या ।
सद्ध्यानदृगञ्जिताय चिकुरचयस्ते स यो रुरुचे ॥ ४

प्राकृतभाषा.

तमकसिण सप्पक्खयमोर, मोरउल्लाहुते किलिम्मंति ।
तुह सासणापिधं जे कुणंति विविहे तव किलेसो ॥ ५

तज्जिय कल्लाणसिरि, पिदे वकल्लाणसिरिविलासगिहं ।
तुह वंदे देहमहं विलसिरमोहंपि हयमोहं (यु.) ॥ ६

तुह मुहरन्नासयला, रविंदलच्छी मरट्टफुसणेणं ।
जं विजितुं हिमरस्सी नियकंती निवहसुहडेहिं ॥ ७

असइं तमभि भवभरं सुसिरिउं पहु ससंकोसो ।
दुग्गं खुर इय घणपरि, हिदंभओ परनिसेहट्टा ॥ ८

मागधी भाषा.

तुह शुस्तिदैवभाव, स्तं गदपञ्ञे शमयपथमचञ्ञें ।
ते यिण कुमदलकशव, शिमिश्चादिस्टी पददि भवे ॥ ९

तमवय्यवय्यिदमिधं, आचिक्खिद शुस्टु मोस्कपुलमग्गं ।
काला चिष्टामि हगे, हलिशभले पिस्किदुं धञ्ञे ॥ १०

केलीहलाहगुणहं, हलिञ्ञकशवस्टलायि किलणाह ।
तुह अपुलभवत्तिलसं, वंदामु हगे शलीलाह ॥ ११

संयणिदधञ्ञकमले, ये पष्कालिदमहंदपंकमले ।
धिदपलमहिमशलूवे, ययदु भवं शे शदा कोहे ॥ १२

पैशाची भाषा.

विबुधान राचिञानत, अनञ्ञ सामञ्ञ वुञ्ञ तिसपञ्ञं ।
रंतून हितपके मे, कतसिद्धीकुतुंबिनी पनय ॥ १३

भत्तिभरातो दूरे चिष्टति यो तुह रमिय्यतेनेन ।
कसटभरे चरणसुधा विहितसिनातो न सो भोति ॥ १४

युम्हातिसेवि तेदे अपुरवसुरपात वे सतय्येव ।
कीरतिनो येन रती स कथं वपते सुकतबीजं ॥ १५

नत्थून तुरितरिपुनो भववं तिट्ठे तुमं मिमलरूपा ।
विलसिर पमतच्छीजल, पक्खालितका इवागता ॥ १६

चूलिका पैशाची

काठं सिनेहफलिता तुह वतनं सेवते लमा अनखं ।
हानून फंकुरकुनं पोमं सकलंकमपि च विथुं ॥ १७

चलथलमंटलपटिमा चिकुराली शोफते तवंसयुके ।
चलनसिरिरितितसथेनू चलनायल तच्च नव तुव्वा ॥ १८

तुच्छंसकिलितटे फुल, ति मवख नालिव्व मंचुकचलाची ।
गतरुचकपोलतलरुचि, फासुर सोतामिनीतामा ॥ १९

लिसफसुमक्कानाविल चनपरिहिन संखनीरवाहखटा ।
पथसं फुवि सव्वकला नयनी ती तंसिया तुमए ॥ २०

शौरसेनी.

कुमुद मकय्यनिदाणं ताइध भवमाणविज्जदे भगवं ।
चिंदाविदाव नय्ये, व भो दि यावाणनाध इमा ॥ २१

कडुय अलं हरिपदविं कडुय अलं वा महत्त विसयसुहे ।
खलु लहिय अपुरवपदं पणइजणं पाविदूण खलु ॥ २२

दव्वादु वि रागमिदो पय्यत्तं णेग छत्तरज्जेणं ।
नवरि तुह भत्तिपथि माजिणरायं फुरदु हि दयम्मि (यु.) ॥२३

हीमाणहे भवादो चकिदोहं अम्महे यदिट्ठावो ।
णं ता यध तायध मं ससेवगं सामिआ तत्तो ॥ २४

॥ समसंस्कृतम् ॥

हेमसरोरुहभासं कलिमलकमलालिमंथहिमभासम् ।
भवभयधूलिमहाबल नाभेय भवन्तमभिवन्दे ॥ २५

तव चरणोभयजलरुह पालीसेवापरायणादेव ।
विन्दन्ति नरालिगणा वरसिद्धिरमामकरन्दलयम् ॥ २६

महिमधरं तमसमहिम, विमलं वरधी सरोरुहेविमलम् ।
समयदयारससुगमं चरणं सेवे तवासुगमम् ॥ २७

तव नामधेय चिन्ताबद्धरसा भुवि नरावली धत्ते ।
संरुद्धारिनरामरभं, दरमालिङ्गकेलिरसम् ॥ २८

॥ अपभ्रंशभाषा ॥

तउ रेहइ अलिसामलि बिहुउरावलि भुयपिट्ठि ।
निज्जियरिउबलमृणे दुग सुहडन असिलट्ठि ॥ २९

हदु मिल्हि विसहजट्ठि, यावट्टुद्दिय जणववहार ।
पइं कायहि मुणियहं, सुफरुसब्भिय करणपयार ॥ ३०

तास्व महाभवजलहिज, लिनरु निवडइ हुहुरुत्ति ।
जास्वन पास्विय तुध्र प, हुसारुणनावझडत्ति ॥ ३१

सुकटु कहं तिहु ता सुथ, इ॰कहंत मुसभलउजम्मु ।
दिविदिवि जीवाजुन कर, दि पइं वुत उजिणधम्मु ॥ ३२

भ्रूवे हि कुतित्थियजं, वयणू अवरुप्य रयइं विरुट्ठु ।
तं नेरसिवपंडिय त, इं जि देवु प्रमाणेहिं सुरिट्ठु ॥ ३३

इकासि तेहा भाव विणु छुडुपणमिय तुह पाय ।
भुंजिज्ज हि ता सुर रहइं करिविणु दुक्खविघाय ॥ ३४

मज्झ कहंतिहु भावरि, उ दडवड तण उद्द वेक्कू ।
सामिय सट्टलतेउ, छु डुनहु चंपइ परचक्कू ॥ ३५

जुत्तिवि किरिय नाणहरि, घयंमण मनसुद्धिजुग्गि ।
कुकुनपहुव्वइ सिवनय, रि तुह सासणरहिलग्गि ॥ ३६

परि कवि तुह तणु भूडहि, कंचणकांति रवन्न ।
वियसहि महणयणुल्लड, तामइ भवदुहतिन्न ॥ ३७

नायालीहयमंदयामयमलं भासं धरंतं परं
राकालिं पवलोतयं अक्खचयासत्तं कमालाचितं ।
धीलं लोअमहं ददावहकलं छिन्नाहमायालदं
नाधा नीवृदिरेसि वंदउं पइं साणंदु सीसुल्लइं ॥ (शा.वि.) ३८

॥ कविनामगर्भचक्रं ॥
तं प्राप्तो रुचिशुद्धयोगरभसोन्मीलत्प्रतोषान्वितं
शस्तः सौष्ठवभग्नमोहरवनः कं कं जहस्तच्छविः ।
रुच्या भास्करतिग्मसिद्धिरमणीसङ्क्लृप्तभावः परं
रंता ज्ञानरमांशमास्त रुषमे तन्याः सुविद्यां चिरम् ॥ (शा.वि.) ३९

जगति विदितवान् यस्त्वत्कमाज्ञास्वरूपं
तव शुचिपदभावं संस्तवादध्यवस्य ।
रचयति निजकण्ठालङ्क्रियां स्तोत्रमेतद्-
भवति भवकरीणां सिंहसौभीष्टलक्ष्मीः ॥ (मालिनी) ४०

पू.आ.श्री जिनसेनसूरिकृत-
आदिपुराणअन्तर्गता

## २३. ॥ श्रीआदिनाथस्तुतिः ॥

(अनुष्टुप्)

त्वं देव परमानन्दमस्माकं कर्त्तुमुद्गतः ।
किमु प्रबोधमायान्ति विनार्कात् कमलाकराः ॥ १

मिथ्याज्ञानान्धकूपेऽस्मिन् निपतन्तमिमं जनम् ।
त्वमुद्धर्त्तुमना धर्महस्तालम्बं प्रदास्यसि ॥ २

तव वाक्किरणैर्नूनमस्मच्चेतोगतं तमः ।
पुरा प्रलीयते देव तमो भास्वत्करैरिव ॥ ३

त्वमादिर्देवदेवानां त्वमादिर्जगतां गुरुः ।
त्वमादिर्जगतां स्रष्टा त्वमादिर्धर्मनायकः ॥ ४

त्वमेव जगतां भर्त्ता त्वमेव जगतां पिता ।
त्वमेव जगतां त्राता त्वमेव जगतां गतिः ॥ ५

त्वं पूतात्मा जगद्विश्वं पुनासि परमैर्गुणैः ।
स्वयं धौतो यथा लोकं धवलीकुरुते शशी ॥ ६

त्वत्तः कल्याणमाप्स्यन्ति संसारमयलङ्घिताः ।
उल्लाघिता भवद्वाक्यभेषजैरमृतोपमैः ॥ ७

त्वं पूतस्त्वं पुनानोऽसि परं ज्योतिस्त्वमक्षरम् ।
निर्धूय निखिलं क्लेशं यत्प्राप्तासि परं पदम् ॥ ८

कूटस्थोऽपि न कूटस्थस्त्वमद्य प्रतिभासि नः ।
त्वय्येव स्फातिमेष्यन्ति यदमी योगजा गुणाः ॥ ९

अस्नातपूतगात्रोऽपि स्नपितोऽस्यद्य मन्दरे ।
पवित्रयितुमेवैतज् जगदेनोमलीमसम् ॥ १०

युष्मज्जन्माभिषेकेण वयमेव न केवलम् ।
नीताः पवित्रतां मेरुः क्षीराब्धिस्तज्जलान्यपि ॥ ११

दिङ्मुखेषूल्लसन्ति स्म युष्मत्स्नानाम्बुशीकराः ।
जगदानन्दिनः सान्द्रा यशसामिव राशयः ॥ १२

अविलिप्तसुगन्धिस्त्वमविभूषितसुन्दरः ।
भक्तैरभ्यर्चितोऽस्माभिर्भूषणैः सानुलेपनैः ॥ १३

लोकाधिकं दधद्धाम प्रादुरासीस्त्वमात्मभूः ।
मेरोर्गर्भादिव क्ष्मायास्तव देव समुद्भवः ॥ १४

सद्योजातश्रुतिं बिभ्रत् स्वर्गावतरणेऽच्युतः ।
त्वमद्य वामतां धत्से कामनीयकमुद्वहन् ॥ १५

यथा शुद्धाकरोद्भूतो मणिः संस्कारयोगतः ।
दीप्यतेऽधिकमेव त्वं जातकर्माभिसंस्कृतः ॥ १६

आरामं तस्य पश्यन्ति न तं पश्यन्ति केचन ।
इत्यसद् यत्परं ज्योतिः प्रत्यक्षोऽसि त्वमद्य नः ॥ १७

त्वामामनन्ति योगीन्द्राः पुराणपुरुषं पुरुम् ।
कविं पुराणमित्यादि पठन्तः स्तवविस्तरम् ॥ १८

पूतात्मने नमस्तुभ्यं नमः ख्यातगुणाय ते ।
नमो भीतिभिदे तुभ्यं गुणानामेकभूतये ॥ १९

क्षमागुणप्रधानाय नमस्ते क्षितिमूर्त्तये ।
जगदाह्लादिने तुभ्यं नमोऽस्तु सलिलात्मने ॥ २०

निसंगवृत्तये तुभ्यं बिभ्रते पावनी तनुम् ।
नमस्तरस्विने रुग्ण महामोहमहीरुहे ॥ २१

कर्मेन्धनदहे तुभ्यं नमः पावकमूर्त्तये ।
पिशङ्गजटिलाङ्गाय समिद्धध्यानतेजसे ॥ २२

अरजोऽमलसंगाय नमस्ते गगनात्मने ।
विभवेऽनाद्यनन्ताय महत्त्वावधये परम् ॥ २३

सुयज्वने नमस्तुभ्यं सर्वक्रतुमयात्मने ।
निर्वाणदायिने तुभ्यं नमः शीतांशुमूर्त्तये ॥ २४

नमस्तेऽनन्तबोधार्कादविनिर्भक्तशक्तये ।
तीर्थकृद्भाविने तुभ्यं नमः स्तादष्टमूर्त्तये ॥ २५

महाबल नमस्तुभ्यं ललिताङ्गाय ते नमः ।
श्रीमते वज्रजङ्घाय धर्मतीर्थप्रवर्त्तिने ॥ २६

नमः स्तादार्य ते शुद्धिश्रिते श्रीधर ते नमः ।
नमः सुविधये तुभ्यमच्युतेन्द्र नमोऽस्तु ते ॥ २७

वज्रस्तम्भस्थिराङ्गाय नमस्ते वज्रनाभये ।
सर्वार्थसिद्धिनाथाय सर्वार्था सिद्धिमीयुषे ॥ २८

दशावतारचरमपरमौदारिकत्विषे ।
सूनवे नाभिराजस्य नमोऽस्तु परमेष्ठिने ॥ २९

पू. आ. श्री कल्याणसागरसूरिकृतम्

## २४. ।। श्रीमाणिक्यस्वामिस्तवनम् ।।

स्वामी माणिक्यपूर्वस्त्रिभुवनतिलकश्चिन्तितश्रीसुराद्रि-
स्त्रैलोकोद्योतकर्ता प्रथिततरयशाश्चित्रकृन्नाममन्त्रः ।
श्रीमच्छ्रीनाभिभूपान्वयगगनरविर्मञ्जुकल्याणकान्ती
राष्ट्रे सद्दक्षिणाख्ये निरुपममहिमाख्यातिकारिप्रतापः ।। १

(स्रग्धरा)

प्रवरधर्मधनार्प्पणकामगौ-रमृतवाग्गुणरञ्जितनागरः ।
रिपुसमूहनिवारणसद्भटो वृषभचिह्नितपादकुशेशयः ।। २

(द्रुतविलम्बित)

शुभमतिकरश्चन्द्रादित्याधिकोत्तरभास्वर-
स्त्रिभुवनमणिर्विश्वाधारो धरेश्वरकीर्तितः ।
उपशमरसासक्तस्वान्तोप्यनन्तचतुष्टयी
गुणमणिखनिर्नष्टारिष्टामयाधिजराव्यथः ।। (हरिणी) ३

अखर्वदेहराजितो यतीश्वरो घृणाप्रशीतमानसः कलाधरः ।
अनेकलब्धिमण्डितो वृषाकरः
शिवाब्धिवृद्धिचन्द्रमा नतासुरः ।। (पञ्चचामर) ४

प्रभुर्मारुदेवश्चिदाह्लादलीनः सदाचारलीलाविलासातिशाली ।
महामोहमातङ्गपञ्चास्यकक्षो
हितार्थी कलाशिल्पविज्ञानभाषी ।। (भुजङ्गप्रयात) ५

जलधिनिभगभीरः सारसारङ्गघोषो
जितविषयविकारो ज्ञानबुद्धिप्रदाता ।
खलसमिरपृदाकुर्देवदेवाधिराजः
समवसरणशोभासिन्धु-पूरौघमेघः ॥ (मालिनी) ६

श्वेतातपत्रचामरैर्युतो मनोज्ञपुद्गलैः ।
भव्याङ्गिराशिवन्दितो धर्मार्थमोक्षसाधकः ॥ (नाराच) ७

देवैर्ध्येयो विमलः सुन्दरवंशो नृषूत्तरात्मापि ।
मान्यः सतामजस्रं सदोदयो वरातिशयधरः ॥ (आर्या) ८

त्रैलोक्यावाप्तविभुः समप्तगुणरत्नकलितसाधुमनाः ।
एनस्तमोनिशेशः सुश्लोकैर्धवलिताश आशादः ॥ (गीति) ९

सदार्यमार्गदेशको-प्यमेयभाग्यधारकः ।
प्रभूतसत्त्वपालको विवेकनीतिकारकः ॥(नगस्वरूपिणी) १०

दुःखहरो नाकिनुत-स्त्यक्तमहादोषभरः ।
पारगतस्तीर्थकरः शीलशाली ज्ञानधनः ॥ (माणवक) ११

कमलाननमोहितसभ्यजनः समयार्थनिरूपणरम्यसुधीः ।
नृशिलीमुखखेलनतामरसः पुरुषोत्तमपुण्यनिधिर्वरदः ॥ १२
(तोटक)

लक्षणपङ्क्त्या सारतनु-र्निर्जितमायालोभकलिः ।
आदृतसाध्वाचाररतिः सादरदेवाधीशपतिः ॥(मणिमध्य) १३

केवलयुग्मालोकितलोका-लोकविभागः संयमिसेव्यः।
इन्द्रियबाणाभेदितचेताश्चम्पकमालामण्डितगात्रः ॥ १४
(चम्पकमाला)

प्राप्तानन्दो भुवनमुकुट-स्तीर्थस्वामी विस्तृतनयनः ।
सश्रीकात्मा सुकृतनिलयो योगीन्द्रो वै विजितकपटः ॥ १५
(हंसी)

आदेयाख्यो मुक्तिजस्फारसौख्यो विश्वोत्तंसो दुष्टकर्मारिहन्ता ।
चक्रेश्वर्याराधितो गोमुखेशः कान्ताकारश्चोप्तधर्माधिकारः ॥१६
(शालिनी)

जगतीशपूज्यो जयताज्जिनेशः कुशलार्थवल्लीततिवारिधारः ।
विशदावदातावलिचित्तनामा भववार्द्धिपोतः कुलपाकनाथ ॥१७
(केकीरव)(कुलकम्)

एवं मया संस्तुत आदिदेवो भूयात् सदा सङ्घगणस्य भूत्यै ।
क्षेमङ्करो विश्वजगत्सुदीपः कल्याणमाङ्गल्यकलापकोशः ॥१८
(इन्द्रवज्रा)

पू.आ. श्री जिनसुन्दरसूरिकृतः

## २५. ॥ श्रीऋषभजिनस्तवः ॥

(उपजाति)

श्रेयोलतापल्लवनैकनीरदं
त्वां देहिनां देव ! भवाब्धितीरदम् ।
आदिप्रभो ! भक्तिभरेण भूरिणा
स्तवीमि सेव्यं पुरहूतसूरिणा ॥ १

मूर्त्तिस्तवेनेन्दुकलाविलासिनी
विलासिनी मुक्तकुमुन्महोदयम् ।

महोदयं वादिशते वितन्वती
वितन्वती वा शुभमत्र पावनी ॥ २

त्रपावनीमापितवान् हिमालयं
हिमालयं शुभ्रयशोवितानतः ।
वितानतः स्वर्गिगणिः कलाधरः
कलाधरस्तारय मां भवापदः ॥ ३

भवापद प्राणिहितासदाऽऽपदां
सदा पदाम्भोजनमन्नराऽमरः ।
नराऽमरस्यालकदुःखतापनः
खतापनः शर्मकजप्रबोधने ॥ ४

प्रबोधनेतस्तव दीप्रशासनं
प्रशासनं प्राप्य कुवादिनो दयम् ।
दिनोदयं मोहनिशि प्रभो ! भवं
प्रभोऽभवं सिद्धसमाहितोऽधुना ॥ ५

हिता धुनानो जगतो दुरापदं दुरापदम्भद्विषतो विमोहन ! ।
विमोह ! नम्रामर ! हे विभो ! भवे
विभो ! भवेन्मे शरणं सदा भवान् ॥ ६

सदा भवान्ताहितशंमयाऽमुना
मयाऽमुना त्वं स्तुतिमापितः प्रगे ।
पितः ! प्रगेयोरुगुणैरमाऽममा
रमा ममाधेहि महोदयोद्भवाः ॥ ७

पू.आ.श्री विबुधप्रभसूरिविरचिता

## २६. ॥ श्रीऋषभकुन्तलपञ्चविंशतिका ॥

(शार्दूलविक्रीडितम्)

चञ्चत्पञ्चममुष्टिकुन्तलततिः प्राचीपतिप्रार्थनाऽ
नुत्खाता तव राजति श्रवणयोः पार्श्वे युगादिप्रभो ! ।
स्नेहद्रोहसमिद्धमानहृदयध्यानप्रदीप्रोद्भवा
सज्जेवाऽञ्जनमञ्जरीश्रुतियुगद्धाभ्यां विनिर्गत्वरी ॥ १

श्रीनाभेय ! भवान् नवाभ्युदयिनः श्रीधर्मभूमीपतेः
प्रासादेऽभिनवोऽस्ति सर्वभुवनप्रीत्यै धृतः स्वस्तिकः ।
स्कन्धे तच्चिकुरच्छलादुभयतो दृग्दोषमोषक्षमा
नीलिचर्चितचीरखण्डयुगलीलोलेयमालोक्यते ॥ २

गोस्वामिन्नसहाय एव वृषभ-स्कन्ध-स्थलास्थायिनं
त्वं प्राग् यं बिभराम्बभूविथ महाधुर्यो युगादौ स्थितः ।
भारे राज्यरथस्य तत्र भरतस्कन्धाऽर्पिते कुन्तल-
व्याजादंसतटे तव व्रणकिणश्रेणिर्ध्रुवं दृश्यते ॥ ३

प्रव्रज्यां प्रतिपन्न-वत्सल ! जगन्नाथ ! प्रपद्य त्वया
किं त्यक्ताऽहमतीव विज्ञपयितुं सम्प्रेषिता पद्मया ।
तद्गेहाम्बुरुहोपजीवनपरा स्वामिन् ! सुवाणिर्भवत्-
कर्णान्ते निभृता विभाति चिकुर-व्याजेन भृङ्गावलिः ॥ ४

क्षेत्रे श्रीभरतेऽत्र तत्रसमये केनाप्यतीर्णं पुरा
प्राक् संसारमहार्णवं प्रतरतः स्वामिँस्तव स्कन्धयोः ।
लग्ना शैवलवल्लरी ध्रुवमियं नीलाऽलकाऽलिच्छलात्
पश्चात् तीर्णवतामियं यदजिताऽऽदीनां तु नो व्यज्यते ॥ ५

श्रीमन्नाभिनरेन्द्रपुत्र ! भवतो हृन्मध्यभागे सदा
शुद्धध्यानधनञ्जयस्य दहतः कर्मद्रुमाणां वनम् ।
प्रोन्मीलत्कुटिलाऽलकाऽऽवलि-लता व्याजेन निर्जग्मुषी
रेजे ध्यामलधूमधोरणिरियं श्रोत्रद्वयद्वारतः ॥ ६

क्षीयेऽहं बहिरङ्गवायुपटलेनाऽपि त्वया नु प्रभो !
यस्याभ्यन्तरवायुरप्यनुचरो योगायितं जन्मनः ।
तन्मे वायुजयं वदेति जलदः प्रष्टुं कचच्छद्मना
कर्णान्ते स्थितवान् परोपकरणक्रीडासनीडस्तव ॥ ७

स्वामिन् ! यद् भवता व्रतं कलयिता सामायिकास्त्रोर्ज्जितैः
रागद्वेषमहाभटद्वयपराभूतिः समासूत्र्यते ।
तेनेयं मरुदेवि-सम्भव ! तव स्कन्धोपरिष्टात् कच-
श्रेणी सन्तनुते प्रशस्ति-युगली सख्यं मषीवर्णभाक् ॥ ८

त्रैरत्नी-त्रिपदी-त्रिकालविषयज्ञान-त्रिलोकाद्भुत-
स्वामिन् ! वप्रभृतिच्छदत्रयभृतः सद्ब्रह्मवृक्षस्य ते ।
श्लिष्ट-स्कन्धतटाः शिरोरुहजटाः पुण्यैकलभ्यं सदा
पादाधः स्थितविश्ववैभवनिधिं संसूचयन्ति प्रभो ! ॥ ९

सन्मार्गं व्रजतां सतामभिमुखी-भूत स्त्रिलोकीवधू-
शीर्षालङ्करणं शिवाय भवसि त्वं पूर्णकुम्भः प्रभो ! ।
पूर्णस्य प्रशमामृतेन भवतः कर्णोपकण्ठे लुठत्
केशौघ-व्यपदेशतो विलसति श्रीवृक्ष-पत्रावलिः ॥ १०

त्वं स्वामिन् ! परितापहृत् ! त्रिजगतामानन्दनश्चन्दनः
कुण्डं ज्ञानसुधारसस्य सुगुणश्रेणीमणीनां निधिः ।

युक्तं त्रिष्वपि रूपकेषु भवतः कचानां कुलम्
नीलाम्भोजविभं निलीनफणभृद्भृङ्गीनिभं गीयते ॥ ११

दोर्दण्डद्वयदम्भतोरणमहास्तम्भाग्र जाग्रद्-गुरु-
स्कन्धप्रोन्नतकुम्भकोटिविलसत्केशौघचूतच्छदः ।
वक्त्राम्भोरुहविभ्रमभ्रमदलिव्याजोल्लसत्तोरण-
स्रग्रम्योऽद्भुतसिद्धिसौधपुरतो द्वारायसे त्वं प्रभो ! ॥ १२

स्मेरत्पक्ष्मकपाटनेत्रयुगली वातायनं प्रान्तयोः
स्कन्धाऽऽक्रीडनगोपरि श्रुतिलता-व्यालम्बि दोलाद्वयम् ।
वक्त्रं गौर-कपोल-भित्ति भवतो वाग्देवता-पद्मयोः
क्रीडा-सौधमुपान्तयोरुपवनप्रायोल्लसत्-कुन्तलम् ॥ १३

त्वद्वक्त्रस्य सुधारुचेः पुर इह स्थातुं न शक्तो द्विषा-
मप्याह्लादमस्य चारिमगुणं व्यालोकितुं चोत्सुकः ।
उच्चैः स्कन्धगिरीन्द्रयोरुभयतो भीत्या निलीय प्रभो !
मन्ये श्यामल-कुन्तल-स्थलमुपादायान्धकारः स्थितः ॥ १४

योगिन्नाननकानने सुरभिणि द्योतिःप्रधाने तव
त्यक्त्वा शाश्वत-मत्सरं निवसतः पाथोज-चन्द्रश्रियौ ।
तस्मिन् शुद्धिभृति प्रसङ्गमनयोरप्राप्नुवन्तौ ध्रुवम्
पर्यन्ते चिकुरस्थलेन मधुपश्रेणीकलङ्कौ स्थितौ ॥ १५

"नित्यं कान्तिकलः कलङ्कविकलस्त्वद्वक्त्रचन्द्रो यथा
देव ! त्वं वद तादृशः कथमयं मत्पुत्रचन्द्रो भवेत्" ।
एवं प्रष्टुमिवाभितः श्रुतियुगं सङ्कुच्य कल्लोलिनी-
कान्तः कुन्तलकैतवादुपययौ गाम्भीर्यमन्त्रं तव ॥ १६

सौरभ्यातिशयेन ते यदि मुखं श्रीसद्म-पद्मं, स्फुरत्-
द्योतिः पाथसि कण्ठनालमभितः पङ्क्तिं तत्कुन्तलाः ।
विश्वाह्लादि-विभावशाद् यदि मुखं चन्द्रोऽथ तत्पृष्ठत-
स्तत्कान्ता चिकुरच्छलेन रजनिः केनाऽत्र नो मन्यते ॥ १७

स्वामिँस्त्वन्नयनाद्भुताद्भुततमश्री-निर्जिता लज्जया
न स्थातुं पुरतः क्षमा कुवलयश्रेणिर्निलीय ध्रुवम् ।
प्रागमित्रीकृतचन्द्रतोऽप्यतिसुखं द्रष्टुं त्वदीयं मुखम्
प्रान्तस्कन्धशिलोच्चयोपरि समारूढा शिरोजच्छलात् ॥ १८

नित्यं मानवदेवदानवदृशां व्यूहेन लेह्याप्यसौ
श्रीनाभेय ! भवन्मुखौषधिपतेर्ज्योत्स्ना कथं क्षीयताम् ।
यस्मादत्र जगत्त्रयी-परिवृढ ! प्रान्तद्वये कुन्तल-
व्याजाद् राजति कृष्ण-चित्रकलताजालप्रवालावलिः ॥ १९

आलोक्य त्रिदिवापगां परिलसत्-कैलाशशैलाशनाऽ
ध्यासीनस्य वृषध्वजस्य शिरसि प्रेङ्खोलनादुन्मदाम् ।
संहर्षादिव देव ! ते रविसुता मूर्धानमासेवते
केशश्रेणिमिषाद् वृषाङ्क ! विमलक्ष्माभृत्-तटीमण्डनम् ॥ २०

श्रीशत्रुञ्जय एष कुञ्जरवरः प्रोद्दामसौदामिनी-
श्लिष्टाम्भोद-मिषेण हेमखचितप्रत्यङ्गरङ्गद्गुडः ।
तत्रोच्चैस्तरचैत्यकोष्टकगतो धर्मं दधानः प्रभो !
विश्लिष्यद्विषमेषुमद्भुतगुणं त्वं नाभिभूतो भटः ॥ २१

दृष्ट्वा कुन्तलदम्भतोऽसतटयोस्त्वत्पृष्ठबद्धोल्लसत्-
तूणीरद्वयबाणसञ्चयशिखा सन्दोहपिच्छच्छविः ।

जेतव्यस्तव सज्जितस्त्रिभुवनद्रोहश्च मोहः स्फुरन्
राग-द्वेष-कषायपञ्चविषयप्रायः प्रवीरै र्वृतः ॥ २२

उच्चांसस्थलसंस्थकुन्तलतताजालप्रवालश्रित-
प्रत्यासन्नविलोलकर्णलतिका-पाशद्वयत्रासतः ।
देव ! त्वत्क-कपोल चन्द्रयुगलस्येणौ प्रणस्य ध्रुवम्
त्वद्दीक्षा-रसिकौ स्थितौ पुर इमौ श्रीधर्मचक्रान्तिके ॥ २३

अश्रान्तं विबुधप्रभुप्रभृतिकत्रैलोक्यलोकस्तुति-
र्वर्षन्ती परितः सुधां श्रवणयोः प्रान्ते तव स्फूर्जति ।
तस्याः स्यन्दवशाद् दिवोद्‌गतमिदं स्वामिँस्तवांसस्थले
श्रीनाभेय ! शिरोजराजिमिषतो दूर्वावनं पावनम् ॥ २४

एवं नाभितनूद्भव ! प्रतिलवं कृत्वा मनः सौष्ठवं
स्वामिन् ! वर्णित-कुन्तलं तव नवं यः पापठीति स्तवम् ।
प्राप्य प्राक् विबुधप्रभुत्व-विभवं मुक्त्वाऽथ दूरे भवं
सम्प्राप्नोति शिवं गलत्परिभवं निःश्रेयस-श्री-भवम् ॥ २५

पू.आ.श्री विबुधविमलसूरिविरचितम्

## २७. ॥ श्रीऋषभदेवस्तुतिगर्भित-श्रीसिद्धाचलस्तोत्रम् ॥

(भुजङ्गप्रयातम्)

मुनीन्द्रैः सुरेन्द्रैर्नरेन्द्रैः सदा यः,
प्रगीतः प्रणीतः शमीशः स्तुतो वा ।
स्वकीयं स्वभावं स्वरूपं समेतुं,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ १

विचित्रं पवित्रं तपो येन तप्तं,
न तप्तं हि गात्रे क्षितौ न प्रसुप्तम् ।
मनो गुप्तमुप्तं च सद्धर्मबीजं,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ २

विना चन्द्रहासं विहासं विकोपं,
हतो मोहदैत्यः सपुत्रप्रपुत्रम् ।
गृहीतं स्वराज्यं चिरं कालनष्टं,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ ३

अहो ! यस्य वंशे मनुष्याः प्रभूताः,
शिवानन्दभाजः प्रजाताः प्रसिद्धाः।
न तेषामपीर्ष्या न रागो न रोषो,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ ४

भवन्ति स्म वंशेऽपि योधाः सुबोधा,
महामोहगेहे यदादर्शगेहे ।
प्रविश्य प्रलब्धं वरज्ञानरत्नं,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ ५

न हीशा महीशा महारिं विजेतु-
मृते वंशजातेर्न भूतास्तु पूर्वम् ।
भविष्यन्ति नाग्रे न सन्त्यद्य केचि-
न्नमः श्रीयुगादीश्वरायैव तस्मै ॥ ६

प्रशस्यं पिता यस्य माता कलत्रं,
कुलं भ्रातृमित्रे पुरं पुत्रवर्गः ।

प्रजादिप्रधानं च भृत्यादिलोको,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ ७

न कस्यापि तुल्याः क्षमा मार्द्दवं चा-
र्जवं निस्पृहत्वं तपः संयमत्वम् ।
तथा सत्यशौचेऽधनं ब्रह्मचर्यं,
नमः श्रीयुगादीश्वरायैव तस्मै ॥ ८

न कर्ता न भर्त्ता न भोक्ता न भक्तो,
न रक्तो न रुष्टो न दुष्टो न हृष्टः ।
तथाप्येष नाथो भवाम्भोधिपोतः,
सदा मे स आधार एकोऽस्तु देवः ॥ ९

न देशे न देहे न गेहे गृहिण्यां,
न राज्ये न कार्ये न ते प्रेमबन्ध ।
तथापि प्रियस्त्वं सतां त्यक्ततृष्णः,
सदा मे स आधार एकोऽस्तु देवः ॥ १०

अहं कर्म्मपाशेन बद्धो भवाब्धौ,
त्वया त्रोटितो मूलतः कर्म्मपाशः ।
विना त्वामुपायो न कोऽप्यस्ति लोके,
सदा मे स आधार एकोऽस्तु देवः ॥ ११

यथा चक्रदण्डैर्घटोत्पत्तिरस्ति,
तथैव त्वदात्मस्वरूपोपलम्भः ।
अतोऽहेतुकार्यं न धार्यं कदाचित्,
सदा मे स आधार एकोऽस्तु देवः ॥ १२

तव स्तोत्रगोत्रस्मृतिध्यानहीनो-
ऽप्ययं सिद्ध इत्यप्रसिद्धः प्रयोगः ।
असाधारणं कारणं तत् प्रतीतः,
सदा मे स आधार एकोऽस्तु देवः ॥ १३

जना येऽत्र मोक्ष्यन्ति मुञ्चन्ति मुक्ताः,
प्रभो ! तेऽपि सर्वे भवद्ध्यानयुक्ताः ।
अतः सिद्धिसङ्गे त्वमेवासि हेतुः,
सदा मे स आधार एकोऽस्तु देवः ॥ १४

निषिद्धोऽपि रागो विरुद्धो न शुद्ध-
स्तथापि त्वदीयो मया धीयतेऽतः ।
तवोपर्यरागो न को वीतराग !,
सदा मे स आधार एकोऽस्तु देवः ॥ १५

न तं धन्यमन्यं वदन्यं च मन्ये,
प्रदत्तं प्रशस्तं न ते येन भोज्यम् ।
यतः पात्रदानं निदानं शुभानां,
सदा मे स आधार एकोऽस्तु देवः ॥ १६

अवादीत्किलादिस्त्वनेकान्तवादी,
यदाद्यं तु तीर्थेषु मध्ये त्रिलोके ।
सुशात्रुञ्जयाख्यं शुभाख्यं शुभाख्यं,
सदा मे तदाधारमेकं सुतीर्थम् ॥ १७

सुरीव्यन्तरीकिन्नरीखेचरीभिः,
कुमारीसुनारीनृपान्तःपुरीभिः ।

जगे यस्य गीतं महार्थं च नित्यं,
सदा मे तदाधारमेकं सुतीर्थम् ॥ १८

मुकुन्दोऽमरेन्द्रश्च विद्याधरेन्द्रो,
दिनेन्द्रो यतीन्द्रो विधुः पन्नगेन्द्रः ।
मनो यत्र धत्ते त्वहं शुद्धभक्त्या,
सदा मे तदाधारमेकं सुतीर्थम् ॥ १९

अनन्ताः प्रशान्ताः स्तुवन्तः स्मरन्तो,
नमन्तश्चरन्तो धरन्तश्च चित्ते ।
पुनः पूजयन्तः सृजन्तो यदर्चां,
सदा मे तदाधारमेकं सुतीर्थम् ॥ २०

न हि स्वर्गमार्गे न हि द्रङ्गदुर्गे
न हि स्वर्णभूध्रे न हि द्वीपधात्र्याम् ।
न वर्षे न वर्षाद्रिशृङ्गे परं यत्,
सदा मे तदाधारमेकं सुतीर्थम् ॥ २१

अनेके प्रसादाः सदाऽऽवासदा वो,
ध्वजप्रान्तकम्पैर्जनानाह्वयन्ति ।
भजध्वं शिवाध्वानमेवेति यत्र,
सदा मे तदाधारमेकं सुतीर्थम् ॥ २२

सुधासाम्यभाग्वार्भृतं सूर्यकुण्डं,
पयोबिन्दुपास्तक्षितीशोग्ररोगम् ।
श्रितध्यानमग्नानगारोपकण्ठं,
सदा मे तदाधारमेकं सुतीर्थम् ॥ २३

भवेद्यत्र राजादनीद्रुस्तु युक्तः,
शिवाकाङ्क्षिभिः साधुभिर्ज्ञाततत्त्वैः ।
सुपर्वाधिपैः ख्यातसत्यप्रभावः,
सदा मे तदाधारमेकं सुतीर्थम् ॥ २४

ऋषीणां यतः पञ्चभिः कोटिभिश्च,
विधाय क्षयं कर्मणां शात्रवाणाम् ।
गतः सिद्धिसौधं मुनिः पुण्डरीको,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २५

मुनीनां तु कोटीद्वयेनैव युक्तौ,
नमिर्वा विनम्याख्यसाधुः समाधिम् ।
अलङ्कृत्य सिद्धिं वधूं प्राप यत्र,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २६

ययौ निर्वृतिं द्राविडो वालिखिल्लो,
घनं कर्म हत्वा च दिक्कोटिमानैः ।
समं सारनिर्ग्रन्थमुख्यैर्मनुष्यै-
र्नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २७

विना यस्य यात्रां न जग्धिं करोमी-
ति पूर्वे भवेऽभिग्रही यो बभूव ।
शुकः शोकमुक्तः स मुक्तिं जगाम,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २८

सुनिर्वाणभाङ् नारदः पारदारा-
ऽप्रसङ्गीन्दुनन्द(९१)प्रमेयैस्तु लक्षैः ।

मुमुक्षुव्रजस्यैव सार्द्धं बभूव,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २९

अनङ्गानगारस्तथा शाम्बसाधुः,
ससार्द्धाष्टकोटीव्रतित्यक्तदेहः ।
महानन्दसौख्यं च भेजे भुजाभ्यां,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३०

शिवं स्थापने यः शुभध्यानधारी,
सहस्रेण वाचंयमानां च साकम् ।
अकर्मत्वमाश्वेव लेभे हि यत्र,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३१

चकाराजितस्तीर्थनाथो द्वितीय-
स्तथा षोडशः शान्तिसार्वश्च यत्र ।
चतुर्मासकं जन्तुषट्कायरक्षं,
नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३२

सिद्धाश्चार्षभसेनमुख्यजिनपत्याद्या अनन्तास्तथा,
सिद्ध्येयुर्मुनयः समाधिसहिताः सेत्स्यन्त्यनेकेऽपि ते ।
यस्मिन् ये प्रबलप्रमादबहुला दुर्दान्तपापात्मका
वाञ्छा वो विबुधोदिते शिवपदे भक्त्या भजध्वं च तम् ॥३३

(शा.वि.)

पू.आ.श्री रत्नशेखरसूरिविरचितम्

## २८. ॥ श्रीआदिजिनमहिमास्तोत्रम् ॥

(शिखरिणी)

महिम्नः पारं ते परमलभमाना अपि विभो !
भवन्ति स्तोतारः समवसृतिभूमौ समुदिताः ।
यदिन्द्राद्यास्त्वां तज्जिनवृषभभक्त्या स्तवयतो,
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १

स्वरूपं चिद्रूपं किमपि तदरूपं भगवत,-
श्रुतूरूपा ब्राह्मी यदि गदितुमीष्टे न भवतः ।
ततः कस्य स्तुत्यं, किमुपममिदं कस्य विषयः,
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २

पदं शैवं केचित्परममनपेक्षाक्षयसुखं,
स्तुवन्ति त्वां राज्यादिकपदकृते मन्दमतयः ।
भवेद्वा तत्त्वार्थे रतिरतितरां नैव भवतः,
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ ३

गुणानामानन्त्यादविषयतया वाङ्मनसयो-
र्न शक्या तत्त्वज्ञैरपि तव विधातुं स्तुतिरियम् ।
भवन्नामोच्चारात्पुनरपि ममैतां निजगिरं
पुनामीत्यर्थेऽस्मिन् पुरमथनबुद्धिर्व्यवसिता ॥ ४

जटालङ्कारालङ्कृतमथ वृषाङ्कं च भगवन्,
पुनानं विश्वं त्वां प्रथमजिन मत्वा किमु ततः ।
जटां धृत्वा श्रित्वा वृषमहमपि क्ष्मातलमिदं,
पुनामीत्यर्थेऽस्मिन्पुरमथनबुद्धिर्व्यवसिता ॥ ५

न कोपस्याटोपः स्वरिपुषु न च स्वेष्वपि तथा
प्रशान्तिर्नो कान्तादिकपरिकरः कश्चिदिति ते ।
त्रिलोक्यामालोक्याप्यह ह परमां प्रारभरमां,
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ६

ध्रुवं कश्चित्कर्त्ता निखिलभुवनस्यापि स पुन-
र्विभुर्नित्यश्चैकः सतनुरतनुर्वा स्ववशतः ।
स्वयं सिद्धेन्यस्मिंस्तव मतमनाप्तान् हतधियः
कुतर्कोयं कश्चिन्मुखरयति मोहाय जगतः ॥ ७

विगुप्तै रागाद्यैरपि भवति किं सर्वविदहो
विना वा सर्वज्ञं ननु जिन किमाप्तोऽपि स च किम् ।
त्वदन्योपि क्वापि त्रिजगति बताप्तस्वविषये,
यतो मन्दास्त्वां प्रत्यमर वर संशेरत इमे ॥ ८

त्वमेवार्हन् बुद्धो जगति परमेष्ठी च पुरुषो,
तमोलक्ष्म्या भास्वान्विबुधगुरुरादीश्वर इति ।
विभो ! नानाक्षाभिः समविषममार्गेषु चरतां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ९

प्रसादात्ते पुत्रा विषयसुखसाम्राज्यमभजन्,
न के वा सेवातस्तव नवनवामृद्धिमगमन् ।
तृणे स्त्रैणे स्वर्णे दृषदि च सदृक्षः पुनरहो,
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ १०

भवन्तत्तादृक्षातिशय महिमेक्षावशसमुद्-
भवद्भक्तिव्यक्त्या रणरणकितान्तःकरणतः ।

अधीरप्युद्युक्तोखिलजगदशक्यं स्तवमपि
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ११

न शस्यौ कस्यास्तां नमिविनमिपत्ती जिनपते !,
त्वदेकस्वामित्वाक्रमकमलसेवासु रसिकौ ।
प्रसादात्ते विद्याधरपतिततिर्यत्सविनयं,
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १२

तदा विद्याः प्राप्य ध्रुवमखिलविद्याधरमहा-
स्वयं प्रादुर्भाव्य प्रथममथ वैताढ्यविभुताम् ।
यदेतौ दुस्साध्यौ सुरनरवराणामभजतां,
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जिमतमिदम् ॥ १३

अथावाप्तैश्वर्यं मदनमदविध्वंसि च महा-
व्रतित्वं सर्वज्ञत्वमसमविभूतिश्च परितः ।
शिवासङ्गश्चङ्गः सततमिति नो कस्य कृतिनः,
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ १४

विवाहादौ नेतुर्मुहुरुपकृतो विप्रतिभवं
त्वया पारम्पर्यागतपरिचयान्मोहचरटः ।
तथा दूरं नष्टः क्वचिदपि यथाकेवलकला-
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ १५

निजर्द्ध्या स्पर्द्धालुर्भरत विभुरासीन्मघवता,
यदाऽपत्तस्यार्द्धासनमथ सुखं केवलरमाम् ।
तदेतस्मिन्सर्वं तव पदविनम्रे समुचितं
न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १६

निनंसायां पूर्वं क्षणमजगणत्त्वां भरतराट्
समं चक्रेणाहो तदिह विषयाणां विषमता ।
यदेतस्यार्चात्र प्रमितफलदैवाशिवसुखं,
न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १७

प्रभो ! त्वत्पुत्रस्यातुलबलवतो बाहुबलिन-
स्तपस्तीव्रं तादृक् शरदवधिमानादपि कृतम् ।
निदानं ज्ञानस्य ध्रुवमभवदाश्चर्यमथवा,
विकारोपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १८

न सुत्रामा यत्र प्रभवति विधातापि न विभुः,
स वैकुण्ठः कुण्ठः किमपि न भवश्चाभवदलम् ।
जिगीषुः स त्वामप्यपरसुरमद्दुर्म्मतिरभूत्,
स्मरः स्मर्त्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १९

प्रयुञ्जानः स्वामिन्स्वयमखिलशिल्पान्यसुमतां,
कलाः पुंसां स्त्रीणामपि च सकलाः क्ष्मापतिरपि ।
कुलालादींस्तांस्तान् क्षणमपि नयन् शिक्षणविधौ,
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ २०

प्रभो ! तैस्तैः सारैरणुभिरखिलैश्चामरवरैः,
कृतं रूपं सर्वोत्तमसुखगमङ्गुष्ठकमितम् ।
त्वदङ्गुष्ठस्याग्रे शुभति किल नाङ्गारक इवे-
त्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः ॥ २१

प्रजाः प्राज्यं राज्यं स्थविरजननी स्वस्य तनुजां-
स्तपस्यन्नासत्तावपि च विहरन्बाहुबलिनः ।

उपेक्षिष्ठा आत्तव्रतनृपसहस्राश्च चतुरो
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ २२

यदा नो रत्नानां त्रयमखिलदौर्गत्यहरणं
निदानं सम्पत्तेस्त्रिभुवनजनानामनुदिनम् ।
भवान् योगक्षेमावपि विरचयन्मन्मथजये,
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम् ॥ २३

यथा पूर्वं मुग्धास्तव सदुपदेशाद्युगलिनः,
सदा स्वामिन्नीशाजनिषित सदाचारचतुराः ।
तथा कस्कः सम्प्रत्यपि न विशदेषु त्वदुदित-
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥ २४

तपस्तीव्रं ब्रह्मव्रतनियमनिष्ठा बहुविधाः
क्रियाकष्टास्पृष्टा अपि जिनप दुष्टाशयतया ।
त्वदाज्ञावज्ञायां नियतमहितायै व भविनां,
ध्रुवं कर्त्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २५

क्षमाभृन्मुख्याः के नियतमधिमात्रानपि सदा,
स्वयंस्थान् शास्त्रौघान्नदधतितरां यस्य हतये ।
अविघ्नं तं निघ्नन्नसमसमयस्तामसमृगं,
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २६

परिभ्राम्य क्लेशार्जितमपि सहस्रेण शरदा,
मदाश्विद्राजत्वं सपदि मरुदेव्यै तदपि चेत् ।
प्रभो ! निस्नेहं सा व्रतसमयसर्वावगणना-,
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २७

महानन्दे यद्यप्यसि जिन ! दवीयस्यपि पदे,
न रुष्टस्तुष्टश्च त्रिभुवनजनेषु क्वचिदपि ।
भवन्नाम स्वामिन्स्वमनसि महामन्त्रमनिशं,
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ॥ २८

प्रभो ! प्राणायामाभ्यसनरसिकत्वान्निजमनः,
समाधावाधायाखिलविषयतोऽक्षाणि युगपत् ।
द्रुतं प्रत्याहृत्य स्थिरनिहितनासाग्रनयना,
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २९

सुरद्रुः खः कुम्भस्त्रिदशसुरभिस्त्वं सुरमणिः,
पिता माता भ्राता विभुरवि सुहृत्त्वं च सुगुरुः ।
परात्मा ब्रह्मापि त्वमसि परमं दैवतमतो
न विद्मस्तत्तत्त्वं द्वयमिह हि यत्त्वं न भवसि ॥ ३०

अकाराद्यैर्वर्णैस्त्वयि परिणतान् पञ्च परमे,-
ष्ठिनः स्पष्टं पञ्चाक्षररचनया नामिनिगदन् ।
कलानादव्यक्तं किमपि परमब्रह्मविषयं,
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ ३१

न रागाद्यैर्ग्रस्तो न पुनरनुकम्प्यो मदपरः,
कृपालुस्त्वत्तोऽन्यो न जगति न तेभ्यः पुनरलम् ।
स्वयं तैरत्यार्त्तैः किमितरसुरैश्चेति विमृशन्
प्रियायास्मै धाम्ने प्रविहतनमस्योस्मि भवते ॥ ३२

नमो नासक्ताय क्वचिदपि विरक्ताय च नमो,
नमः सम्बुद्धाय प्रशमदमरुद्धाय च नमः ।

नमः सर्वज्ञाय स्मरणपरतद्भाय च नमो,
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ ३३

दलितरजसे शश्वद्विश्वार्चिताय नमो नमः,
प्रहततमसे श्रीसर्वज्ञाधिपाय नमो नमः ।
जनहितकृते तुभ्यं सत्त्वाधिकाय नमो नमः,
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३४

कुसुमबटुरिवाहं तच्छ्रुतौ किञ्चनार्हं,
कृतिभिरुरसि कण्ठे वा गुणत्वादधार्यम् ।
जिनवर ! जिनहर्षोत्कर्षतोऽकार्षमेवं,
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ (मालिनी) ३५

प्रांशुश्रीसोमवंशेऽजनिषत मुनयो मौक्तिकानीव शुद्धा,-
स्तेष्वप्येकावली च प्रगुणगुणवती श्रीमदाचार्यपङ्क्तिः ।
जीयाद्राज्यं यदूनामिव गुरुजयचन्द्राह्वयश्रीमुनीन्द्र-,
स्तस्यामप्येष चिन्तामणिरुचिररुचिर्नायकः कृष्णदेवः ॥ ३६
(स्रग्धरा)

निहितचरमपादं श्रीमहिम्नः स्तवस्य,
त्रिभुवनमहितस्य श्रीयुगादीश्वरस्य ।
भ्रमर इव सदा तत्पादपद्मोपजीवी,
रुचिरमलघुवृत्तैः स्तोत्रमेतद्व्यधत्त ॥ (मालिनी) ३७

एवं शारदसोमसुन्दरयशः स्तोमं युगादीश्वरं,
चेतोभूजयचन्द्रमौलिभिरभिष्टुत्यान्वहं योगिभिः ।
ज्ञानं प्राप्य विशालराजसदृशल्हादं समाश्रीयते,
मुक्त्यै मूर्द्धनि रत्नशेखररमा ब्रह्मैकतेजो मयी ॥(शा.वि.) ३८

पू.आ.श्री रत्नशेखरसूरीश्वरशिष्यः
पू.आ.श्री हेमचन्दसूरिविरचितः

## २९. ॥ श्रीआदिनाथस्तवः ॥

(उपजाति)

स्वामिन् ! जिनाधीश ! जगन्नरेन्द्र !
निरञ्जनानन्तचिदात्मरूप ! ।
प्रभो ! स्वयम्बुद्ध ! महेश्वर ! त्वं,
जयाऽखिलज्ञान ! जगत्पुराण ॥ १

त्रिकालविज्जङ्गमकल्पशाखिन्,
जगज्जनाभीष्टविधापनेऽलम् ।
तत्त्वाम्बुधेः सर्वसुखैकधाम,
प्रभावकारुण्यनिधे ! जय त्वम् ॥ २

उद्धर्तुमाप्तोऽसि जगज्जनानां, त्वं मानवं रूपममेयरूपम् ।
त्वत्तो महानन्दपदं लभन्ते, जना जगत्यद्भुतभाग्यभाजः ॥ ३

त्वया जगद्धन्यमिदं हि जातं, पुनः सनाथा भविनोऽत्र विश्वे ।
बुधा विदुर्नैव यथाऽऽत्मरूपं, माहात्म्यमेतत्तव विश्वनाथ ! ॥४

त्वयि स्थितं ब्रह्म परं जिनेन्द्र ! सद्ध्यानरूपं विदितं विशुद्धम्।
यदंशमात्रस्मरणादभेदभावं भजन्ते भवतो भवाब्धेः ॥ ५

पश्यन्ति नो भाग्यविवर्ज्जितास्त्वां, चिन्तामणिवद्भवने दुरापम्।
देवाधिदेवः कथितस्त्वमेव, गुरुर्गुरूणां हितवाक्यदानात् ॥ ६

त्वद्ध्यानतो नैव भवन्ति विश्वे, सप्तेतयो दुष्कृतयः कदापि ।
सहस्रभानौ स्फुरति प्रसारो, न स्यात्तमिस्रस्य घनस्य यस्मात्॥७

ध्येयस्त्वमेवासि हि योगिनां यदष्टाङ्गयोगः प्रससार त्वत्तः ।
दुष्टाष्टकर्म्मानलतप्तजन्तुश्रीखण्डकल्पं तव नाम विश्वे ॥ ८

जगद्गुरु पू.आ. श्री हीरविजयसूरिरचितम्

## ३०. ॥ श्रीनाभेयजिनस्तवनम्-फागु ॥

त्रिभुवनप्रभुताभवनक्रमौ प्रसभभक्तिवशेन नतस्तव ।
प्रथमतीर्थपते ! स्तुतिगोचरं सुविनये विनयेन नतामरम् ॥ १
(यमकबन्धः)

**अथ छन्द रासकाख्यम् ॥**

सकलकलायुतसोमसमानन सुरनरकिन्नरविहितसुमानन ।
मानवहितकृतदांन (दान) तु
जय जय मानवहितकृतदां(दा) न तुं ॥ (छन्दस्त्रिपदी) २

सकलमहाजनमानसमोहन निर्जितमानमनोभवमोहन ।
मोह महारिसमूह तुं जय० ॥ ३
विश्वपितामह निर्गतपातक कान्तनमोजनिताऽमृतसातक ।
जातमहोदय देव तुं जय० ॥ ४
गुं(गु)णमणिरोहण-रोहण भूधर विनयनतामितमां(मा) नवकन्धर ।
बन्धुरदर्शन नाथ तुं जय० ॥ ५

**काव्यम्**

धन्योऽहं जगतीतले जिनपते ! नाभेय ! नेतस्तरां !
प्राप्तोऽहं कृतकृत्यतां च भगवन् ! विश्वत्रयालङ्कृते ! ।
संसारार्णवमद्य तीर्णमिव हे ! तन्मन्यमानो मुने !
नाथस्त्वं मयका यतः कलियुगे लब्धो ह्यलब्धः पुरा ॥ ६

**छन्दः रासाडुद्धः ॥ आसावरीरागेण गीयते ॥**

विमलीकृतविमलाचलभूतल भूतलसद्गुणराजी रे ।
लोकालोकविभासन केवल
केवल दर्शन राजी रे वि० ॥ ७

भविकजनौघ भवोदधितारक वारक, कर्म महारो(रे) रे ।
कुरु सुमतिं मम भगवन् ! जिनवर !
जिनवर मुख्य विचारे रे वि० ॥ ८

रूपविनिर्जतकमलानन्दन ! नन्दन नाभिमहीशो रे ।
भव्यजनावलिनिर्मलमानस – मानसहंस ! महेशो रे वि० ॥ ९
वृषभ ! वृषभराजाऽङ्कितविग्रह ! विग्रहहृच्छिवताते ! रे ।
देव ! विधेहि निजक्रमसेवां देवाऽश्चितजिन ! भीते रे वि० ॥१०

**अथ काव्यम् ॥**

नानावस्तुविसर्जने निपुणताभाजा मया निर्मिता
मन्दारप्रमुखास्तथा तदितरे तत्प्रार्थने तत्पराः ।
नैतेष्वस्ति शिवप्रदः परमिति ज्ञात्वा विधिस्त्वै (?) व सत्
तत्सिद्ध्यै विदधे विभो ! भवभृतां नाऽन्यः कथं त्वन्यथा ॥ ११

**अढीयाबन्धः**

वासववन्दितपादः नाशितसर्वविषादः ।
कामित कल्पतरो विश्वजनैकगुरो रे
जिन जिन ! विश्वजनैकगुरो ! ॥ १२

गत्या हस्ति समानः सुरनरकृतगुणगानः।
अमृतमधुरवाणे ! कजकोमलपाणे रे
जिन जिन कजकोमलपाणे ॥ १३

विशदचरित्राधारः लब्धभवोदधिपारः ।
सारशमाम्बुनिधे ! भविजनभद्रविधे रे
जिन जिन भविजनभद्रविधे ॥ १४

अव्ययपदकृतवासः वासवकृतनिजदासः ।
प्रणतिमहं विदधे भाषितधर्मविधे रे
जिन जिन भाषितधर्मविधे ! ॥ १५

**अथ काव्यम् । छन्दः ॥**

स्वामिँस्त्वद्वदनाकलङ्कशशिनं दृष्ट्वैव नित्योदयं
चन्द्रः किं भ्रमणं करोति गगनेऽनाभाभयव्याकुलः ।
नैवं चेत् कथमातनोति विपदं देव ! प्रतापस्य ते
मित्रोष्णत्विषि बन्धुपद्मविततेर्लब्धावकाशो ध्रुवम् ॥ १६

**अथ फाग, संस्कृतरागः ॥**

अमितमहामहिमालय पालय परमगुरो ! ।
मां भवतो भवभयतो भयतोदारगुरो ॥ १७

कुमतमतङ्गजवारण-वारणवैरिनिभ !
धि(धै)र्यतया जितमन्दर ! सुन्दरकनकनिभ ! ॥ १८

देवपतिस्मृतनामा नामानीशीपते ! ।
जय जय दत्तसुदर्शन ! दर्शनतोऽसुमते ॥ १९

चरणयुगं शिवशरणं शरणं साधुपते ! ।
पततां भवनीराकर - याकर ! (?) विमलमते ! २०

**अथ काव्यभासाः ॥**

नेतस्ते विमलक्रमाम्बुजयुगोपास्तेर्यथोक्तं फलं
सम्यग् ये सुधियो विदन्ति विधिना कुर्युश्च भक्तिं तथा ।
तेषां जन्म फलेग्रहीह कृतिनां गेयं च पुण्यात्मना-
मन्येषामफलं भदन्त ! समभूत् स्वर्द्धेनुवद् दुर्लभम् ॥ २१

**अथ त्रिपदी ॥**

भावि तव तनुलता यान (?) विश्वजनता रे ।
सकलकलाकलिता रे किमियमिव नवसुरलता रे ॥ २२

रविमित क्ख(?)लु समागता काञ्चनमिव कान्ता रे ।
जम्भाहितमहिता रे विलयिनक्तं ति(?) जनदुरिता रे ॥ २३

निधाय समसमता ममला(ता)मिव विहिता रे ।
नाभिभुवा शमिता रे सततसुरगणपरिवृता रे ॥ २४

धनुषां पञ्चशतीमिता नतजगती रे ।
स्वर्ग(र्गि?)जातरती रे भविकजनावलिशिवकृती रे ॥ २५

**अथ काव्यं च-**

वक्तुं ते विभवो भवन्ति भगवन् ! नो योगिनोऽपि स्फुटं
जानन्तो महतो गुणानिह सदाऽनन्तानुदारांस्तराम् ।
तत् किं स्यादिह मादृशस्य विभुता नूनं ? तथापि प्रभो !
भक्त्या प्रेरितचेतसेति विनुतः किञ्चित् प्रसादेन ते ॥ २६

**अथ कलस कमलापिधानं काव्यम् ॥**

**आर्या**

श्रीतपगणगगनतलाऽं (ऽ)ङ्गण-
तरणिश्रीविजयदां(दा)नसूरीणाम् ।

शिष्याणवे विधेया
भवे भवे देव ! निजसेवा (वा) ॥ २७

पू.आ.श्री भुवनसुन्दरसूरिविरचितम्
कुल्पाकतीर्थमण्डन–

## ३१. ॥ श्रीऋषभजिनस्तवनम् ॥

(भुजङ्गप्रयातम्)

महाभाग्यसौभाग्यलक्ष्मीनिवासं
प्रदत्तप्रमादादिदोषप्रवासम् ।
त्रिलोकप्रकाशिस्फुरज्ज्ञानगेहं
युगादिप्रभुं कुल्यपाके स्तुवेऽहम् ॥ १

यथा भूष्यते भूतलं भानुकान्त्या
वनं चास्फुरद्गन्धविभ्राजिजात्या ।
यथा कल्पवृक्षेण मेरुप्रदेश–
स्त्वया नाथ ! तद्वत् तिलङ्गाऽऽह्वदेशः ॥ २

ललाटे विराराष्टि पीयूषरोचिः
प्रधानौष्ठबिम्बे च ते तीक्ष्णशोचिः ।
विभो ! नाभिदेशे च ते लिङ्गरूपं
कराम्भोजयोः शङ्खचक्रस्वरूपम् ॥ ३

त्वदीयेन पुत्रेण ते चारुमूर्त्ति–
र्विभो ! चक्रिणाऽकारि विस्तारिकीर्त्तिः ।
जटाकाररेखाङ्किता सप्रदेशा
लसन्नीलमाणिक्यरूपा नतेशा ॥ ४

अहं स्पृष्टमात्रोऽपि देवेश ! दिष्ट्या
त्वदीयामृतस्यन्दिरोचिष्णुदृष्ट्या ।
अभूवं कुकर्माऽऽमयैर्विप्रमुक्त-
स्तथाऽभीष्टलक्ष्मीविलासैः प्रयुक्तः ॥ ५

मयाऽऽज्ञा त्वदीया यदा हृद्यधारि
तदैवाखिलः पापपङ्कोऽप्यहारि ।
त्रिलोकाद्भुतप्रौढलक्ष्मीरवारि
स्वचित्तं च हर्षामृतस्यन्द्यकारि ॥ ६

सुपर्वद्रुचिन्तामणीकामकुम्भ-
स्फुरत्कामधेन्वादिवस्तूपलम्भः ।
प्रभो ! दर्शने तावकीनेऽद्य जातः
प्रमोदाञ्चिता नम्रदेवेन्द्रजातः ॥ ७

मया प्रापि भाग्येन तेनाथ वाणी
जडत्वादिदोषारिवृन्दे कृपाणी ।
त्वदग्रे ततो नाथ ! संयोज्य पाणी
स्तुतौ स्यामहं कोविदेषु प्रमाणी ॥ ८

मयान्तर्भवं भ्राम्यता देवदेव !
जरामृत्युविच्छेदकारी त्वमेव ।
प्रमोदोत्थरोमाञ्चितेनाद्य दृष्ट-
स्तदैवापदोघः समग्रः प्रणष्टः ॥ ९

मया वक्त्रलक्ष्मीस्त्वदीयाद्य दृष्टा
भवभ्रान्तिभीतिस्तदैवाशु नष्टा ।

तमः स्थेमरूपं भजेत् किं नु भानौ ?
तृणौघोऽथ वा सुस्थिरः स्यात्कृशानौ ? ॥ १०

मुखे कोटिशाश्चेद् भवेयू रसज्ञा
दृशश्चापि रूपस्वरूपेषु विज्ञाः ।
गुणान् वक्तुमालोकितुं रूपधेयं
तथापि प्रभुः कस्तवेन्द्रादिगेयम् ॥ ११

समर्थः प्रभुः कोऽपि नास्ति त्वदन्यः
कृपास्थानकं नास्ति विश्वे मदन्यः ।
ममोपर्यतो देहि दृष्टिं प्रसन्नां
प्रकुर्वे यतः कामसेनां विभिन्नाम् ॥ १२

आराध्य सुस्थितसुरं लवणाब्धिमध्या-
दानीय शङ्करनृपो भगवंस्तिलङ्गे ।
त्वां कुल्यपाकनगरे प्रकटप्रभावं
प्रातिष्ठिपद्विपुलमङ्गलऋद्धिवृद्ध्यै ॥ (वसन्ततिलका) १३

रुचिरचमरमाला १ श्वेतरम्यातपत्र-
त्रितय २ मनुपमोऽयं दुन्दुभीनां निनादः ३ ।
विविधकुसुमवृष्टि ४ श्चैत्यवृक्षः सुगन्धो
५ मणिनिकरविनिर्यत्कान्ति सिंहासनं च ६ ॥(मालिनी) १४

प्रसृतबहुलतेजः पिण्डभामण्डलश्रीः
७ श्रवणपरमसौख्यादायि दिव्यध्वनिश्च ८ ।
इति जिनवर ! वीक्ष्य प्रातिहार्यश्रियं ते
न भवति भुवनालं कारकस्य प्रमोदः ? ॥ (मालिनी) १५

इत्थं श्रीश्रितकुल्यपाकनगरालङ्कारचूडामणिं
श्रीमन्नाभिरनरेन्द्रवंशकमलं प्रोल्लासनाहर्मणिम् ।
यः श्रीआदिजिनं निरस्तवृजिनं तोष्टूयते भक्तिभाक्
तं वृण्वन्ति जगत्त्रयाद्भुतरमा रामा इवोत्कण्ठिताः ॥ १६
(शा.वि.)

पू.आ.श्री भुवनसुन्दरसूरिविरचितम्
अर्बुदमण्डन-

## ३२. ॥ श्रीऋषभनेमिजिनस्तवनम् ॥

(शार्दुलविक्रीडितम्)

श्रीमच्चम्पकमुख्यपुष्पनिकरैरावासिताऽऽशामुखे
माकन्दादिवनोद्भवैः फलभरैरानन्द्यमानावनौ ।
भास्वत्कुण्डसरोनदीगतजले श्रीअर्बुदे भूधरे
श्रीनाभेयजिनं ततो जिनपतिं श्रीनेमिनं च स्तुवे ॥ १

न स्वर्नाथगुरुर्न दानवगुरुर्नो भारती देवता
स्तोतुं यान् प्रभवो न ते गुणगणास्तेषु स्पृहा मे विभो ! ।
तन्नाभेयजिनाऽल्पमेधसममी लोका हसिष्यन्ति मां
युक्तायुक्तविचारकृन्न तरलीभूतोऽथवा भक्तितः ॥ २

पत्रं व्योम मषी महाम्बुधिसरित्कुल्यादिकानां जलं
लेखिन्यः सुरभूरुहाः सुरगणास्ते लेखितारः समे ।
आयुः सागरकोटयो बहुतराः स्युश्चेत्तथापि प्रभो !
नैकस्यापि गुणस्य ते जिन ! भवेत् सामस्त्यतो लेखनम् ॥ ३

मोहान्धकारहरणे तरणे ! त्रिलोकी
भूषामणे ! गतरणेऽस्तु मदीयचित्तम् ।

सौख्येन्दिरैकवरणे करुणेश ! लीनं
स्वामिंस्त्वदीयचरणे धरणे गुणानाम् ॥ (वसन्ततिलका) ४

भ्रान्तः परेषु सुरभूमिधरेषु पुण्य-
चिन्तामणिः किमुत नाथ ! मया न लेभे ।
त्वां रोहणाद्रिमथ देव ! समागतोऽत-
स्तद्दानतो जिनपते ! तु गृहाण सद्यः ॥ (वसन्ततिलका) ५

श्रीमद्गौर्जरभीमदेवनृपतिर्धन्यः प्रधानाग्रणीः
प्राग्वाटान्वयमण्डनं स विमलो मन्त्री सुतेऽप्यस्पृहः ।
योऽष्टाशीत्यधिके सहस्रगणिते संवत्सरे वैक्रमे
त्वत्प्रासादमचीकरच्छशिरुचिं श्रीअम्बिकादेशतः ॥ ६

स्वामिन् ! दृशोरमृतवृष्टिसमां त्वदीयां
मूर्त्ति कषोपलमयीं प्रविलोक्य नेमे ! ।
भव्याङ्गिनां प्रमदमेदुरमानसानां
तापः प्रयाति सकलोऽपि भवभ्रमोत्थः ॥ (वसन्ततिलका) ७

निद्रायां समवेक्ष्य भोजनतया या प्राप्तवान् मे प्रियो
नूनं मद्विरहादिति स्फुटभवद्रागव्यथोन्मन्थता ।
त्वां सम्भुज्य मनाग् बभूव सुखिनी साक्षात्समागत्य तां
प्रीणीहीति तदालिवाचि विमुखः श्लाघ्यस्त्वमेव प्रभो ! ॥ ८

॥ इत्याद्यरसस्याऽऽद्यो भेदः ॥
त्वत्सङ्गमो मम यदा भविता तदेव
श्लाघ्यं दिनं सकलमप्यपरं वृथैव ।
एवं वियोगमयवाचि जिनेन्द्र ! राजी-
मत्यां विरागहृदसीति न कस्य वर्ण्यम् ॥ (वसन्ततिलका) ९

(अभिलाषविप्रलम्भः)

मुक्ता या भवताऽतिनिर्दयमसौ राजीमती प्रोद्भवन्-
मानात् त्वत्सविधेऽपि नाऽगमदियत्कालान्मुने ! साऽधुना ।
त्वामाकारयते नु सादरमिति प्रोक्तोऽपि तस्याः सखी-
वृन्दैरार्द्रमना मनागपि विभो ! जातो न चित्रं महत् ॥ १०

(मानविप्रलम्भः)

सम्प्राप्ते त्वयि रैवते विरहतो नाथोग्रसेनात्मजा
कण्ठाभ्यन्तरघोलनाऽतिमधुरं गीतं तथेयं जगौ ।
यद्वत्ते पशुपक्षिणोऽपि भगवन् सार्द्रा बभूवुः क्षणात्
श्रुत्वाऽदोऽपि न दुःखितस्त्वमसि तत् श्रीवीतरागो ध्रुवम् ॥११

(प्रवासविप्रलम्भः)

काचिद्दुर्भगभामिनीह भगवंस्त्यक्ताऽपि भर्त्रा सदा
त्वामाराध्य सुवर्णसोदररुची रम्भेव रूपश्रिया ।
जाता सा स्वगृहं गता पतिरथो तस्या रमागादियं
मद्भाग्यादिति तत्पदोर्निपतितः कैर्नाम नाऽहस्यत ? ॥ १२

(हास्यः)

दृष्ट्वाऽस्त्रैरतिभीषणान् नृपनरान् सर्वाङ्गकम्पाकुला-
ऽनाच्छाद्याऽऽत्मशिशूनसूनव जिनेत्याक्रन्दतो मूर्च्छतः ।
नानापक्षिपशून् निरीक्ष्य भगवन् ! जाता कृपा ते तथा
मुक्त्वा तानपरेऽङ्गिनोऽपि भवता दुःखाद्यथा मोचिताः ॥ १३

(करुणा)

दोर्दण्डात्तगदाभिचूर्णितबृहन्मातङ्गकुम्भोच्छल-
द्रक्तस्रोतसि खड्गलूनसुभटोद्यन्मुण्डचण्डावनौ ।

नृत्यन्नव्यकबन्धभीषणतरे शस्त्राभिघातोद्धुरे
युद्धे ते स्मरणाद् वृणोति विजयश्रीः प्राणिनं देव ! सा ॥ १४

(रौद्रः)

सर्वे स्थावरजङ्गमास्त्रिभुवनान्तर्वर्तिनो जन्तवः
स्युः सौख्यैकमया मया यदि समाविर्भाव्यते शासनम् ।
ध्यात्वेत्थं गुरुगर्जितेभतुरगश्रेणी मणीबन्धुरं
तद्राज्यं भगवन् ! जरत्तृणमिव त्यक्त्वा त्वयात्तं व्रतम् ॥ १५

(धर्मवीरः)

नानाप्रकारमणिमौक्तिकहाटकानां
कोटीर्यथेष्टमनृणीकृतविश्वविश्वः ।
अर्थिव्रजे त्वयि वदत्यविराममेव
जज्ञे सदैव धनदोऽपि मदोज्झितः स्राक् ॥(वसन्ततिलका)१६

(दानवीरः)

आकर्णान्तनिकृष्टदुर्धरधनुर्दण्डप्रचण्डायुध-
श्रेणीभीषणमुद्भ्रकुट्यतिकटूद्यत्कण्टकं सङ्गरे ।
लक्षं दक्षमहीभुजामभिसमायादेव देवाऽभव-
द्वीरव्रातशिरोमणे भुजमहो दृष्ट्वैव ते निर्मदम् ॥ १७

(युद्धवीरः)

शङ्खे त्वत्परिपूरिते त्रिभुवनक्षोभप्रदे कोऽप्ययं
मत्तोऽपि प्रबलो बभूव भरते राज्यं ध्रुवं यास्यति ।
इत्युद्भूतभियाकुलः परिगलत्प्रस्वेदबिन्दुर्भव-
द्रोमाञ्चः क्षणमात्रमत्र हरिरप्यासीत् त्रिलोकीपते ! ॥ १८

(भयानकः)

वर्चोमूत्रमुखस्रवन्मलनवस्रोतःश्रिते प्रस्फुरद्
दुर्गन्धास्थिशिरोरुकीकसरसासृक्चर्मभिः पिच्छिले ।
देहेऽभ्यन्तरसञ्चरत्कृमिकुले मुह्यन्तु मा प्राणिनः
श्रुत्वैतद्वचनं जिनेन्द्र ! भवतो नैके जनाः प्राव्रजन् ॥ १९

(बीभत्सः)

यश्चाणूरमपाकरोद्रिपुजरासन्धं स्म विध्वंसते
कंसं भ्रंशितवानरिष्टमपिनट् मध्वादिकांश्चाऽवधीत् ।
बाह्वोः कोटिशिलां दधार धरणीपीठात् समुत्क्षिप्य तां,
स्वामिन् ! सोऽपि हरिस्त्वयेह हरिवद्दोःपादपेऽन्दोलितः ॥२०

(अद्भुतः)

प्राकारत्रितये सुरैर्विरचिते ज्ञानोद्भवे ते विभो !
रम्भारम्भितनाटकेति झटिति प्राचीकटत् कौतुकम् ।
अङ्गुल्यग्रतटे शतं करटिनां तेषां शिरस्स्वामरं
भूध्रं तत्र च दुग्धवारिधिमुखान् सप्तापि वारान्निधीन् ॥ २१

(अद्भुतो रसः)

योगीन्द्रं समशत्रुमित्रमचलध्यानाधिरूढं जग-
न्मैत्रीभावमुपागतं जिनपते ! त्वां वीक्ष्य साक्षाद्वने ।
ते हर्यक्षतरक्षुभोगिशरभव्याघ्रादयो दुर्धराः
क्रूरा अप्यभवन् गजादिषु गलत्क्रोधानुबन्धाः क्षणात् ॥ २२

(शान्तः)

स्वामिन् ! शान्तरसाधिपे विनिहितेऽन्तश्चित्तमूषं ज्वलत्-
शुक्लध्यानतनूनपाति समिधीभूतेषु दुष्कर्मसु ।

नागं ज्ञानचतुष्टयं समभवत्ते केवलं हाटकं
येनाऽस्मिन् भुवनेऽप्यजायत जने दौस्थ्यस्य दौस्थ्यं महत् ॥२३

(शान्तः)

तेजःपाल इति प्रसिद्धसचिवः श्रीगूर्जराधीशितुः
श्लाघ्यः कस्य न निर्मलैर्गुणगणैः श्रीवस्तुपालानुजः ।
यः श्रीविक्रमतोऽष्ट (१२८८) मङ्गलकरोर्वीसम्मिते वत्सरे
निर्मातिस्म तवेश ! विस्मयकरं प्रासादमुच्चैस्तरम् ॥ २४

श्रीनाभेः कुलमण्डन ! त्रिजगतीहारादिदेव ! प्रभो !
श्रीधर्मामृतसोमसुन्दरगुरो ! स्वर्भूर्भुवो वन्दितः ।
श्रीनेमेऽर्बुदभूधरे त्रिजगतीसङ्कल्पकल्पद्रुमः
स्वामिंस्त्वं भव सर्वदापि भवने श्रेयोऽभिवृद्धिश्रिये ॥ २५

पू.आ.श्री हेमचन्द्रसूरिविरचितः
भगवतो जन्मसमये सौधर्मसभायां शक्रेन्द्रसंदृब्धः

## ३३. ॥ श्रीआदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

तुभ्यं नमस्तीर्थनाथ ! सनाथीकृतविष्टप ! ।
कृपारससरिन्नाथ ! नाथ ! श्रीनाभिनन्दन ! ॥ १

मत्यादिभिस्त्रिभिर्ज्ञानैः, सहोत्थैर्नाथ ! शोभसे ।
नन्दनादिभिरुद्यानैरिव मेरुमहीधरः ॥ २

देवेदं भारतं वर्षं, दिवोऽप्यद्याऽतिरिच्यते ।
त्रैलोक्यमौलिरत्नेन, यदऽलङ्क्रियते त्वया ॥ ३

असौ त्वज्जन्मकल्याण-महोत्सवपवित्रितः ।
आसंसारं जगन्नाथ !, वन्द्यस्त्वमिव वासरः ॥ ४

नारकाणामपि सुखं, जज्ञे त्वज्जन्मपर्वणा ।
अर्हतामुदयः केषां, न स्यात्सन्तापहारकः ॥ ५

जम्बुद्वीपस्य भरत-क्षेत्रे नष्टो निधानवत् ।
त्वदाऽऽज्ञाबीजकेनाऽतः, परं धर्मः प्रकाशताम् ॥ ६

त्वत्पादौ प्राप्य संसारं, तरिष्यन्ति न केऽधुना ? ।
अयोऽपि यानपात्रस्थं, पारं प्राप्नोति वारिधेः ॥ ७

कल्पवृक्ष इवाऽवृक्षे, नदीस्रोतो मराविव ।
भगवन्नवतीर्णोऽसि, लोकपुण्येन भारते ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
श्रीभरतसुन्दरीभ्यां विहितः

## ३४. ॥ श्रीआदिनाथजिनस्तवः ॥

(अनुष्टुप्)

असद्भूतान् गुणान् जल्पन्, जनः स्तौतीतरं जनम् ।
गुणान् सतोऽपि ते वक्तुमक्षमोऽहं स्तुवे कथम् ? ॥ १

तथापि हि जगन्नाथ !, करिष्यामि तव स्तुतिम् ।
न ददाति दरिद्रः किं ?, श्रीमतामप्युपायनम् ॥ २

युष्मत्पादैर्दृष्टमात्रैरन्यजन्मकृतान्यपि ।
गलन्त्येनांसि शेफालीपुष्पाणीन्दुकरैरिव ॥ ३

दुश्चिकित्स्यमहामोहसन्निपातवतामपि ।
स्वामिन् ! जयन्ति ते वाचोऽमृतौषधिरसोपमाः ॥ ४

चक्रवर्त्तिनि रङ्के वा, कारणं प्रीतिसम्पदाम् ।
समास्त्वद्दृष्टयो नाथः ! वार्षिकस्येव वृष्टयः ॥ ५

क्रूरकर्महिमग्रन्थिविद्रावणदिवाकरः ।
स्वामिन्नस्मादृशां पुण्यैरिमां विहरसे महीम् ॥ ६

शब्दानुशासनव्यापिसञ्ज्ञासूत्रोपमा प्रभो ! ।
जन्मव्ययध्रौव्यमयी, जयति त्रिपदी तव ॥ ७

यस्त्वां स्तौतीह भगवँस्तस्याऽप्येषोऽन्तिमो भवः ।
शुश्रूषते ध्यायति वा, यः पुनस्तस्य का कथा ? ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
केवलज्ञानप्राप्त्यनन्तरं सौधर्मेन्द्रकृतः

## ३५. ॥ श्रीआदिनाथजिनस्तवः ॥

(अनुष्टुप्)

स्वामिन् ! क्व धी-दरिद्रोऽहं, क्व च त्वं गुणपर्वतः ।
अभिष्टोष्ये तथापि त्वां, भक्त्याऽतिमुखरीकृतः ॥ १

अनन्तैर्दर्शन-ज्ञान-वीर्याऽऽनन्दैर्जगत्पते ! ।
रत्नै रत्नाकर इव त्वमिहैको विराजसे ॥ २

देवेह भरतक्षेत्रे चिरं नष्टस्य सर्वथा ।
धर्मस्याऽसि प्ररोहास्य, बीजमेकं तरोरिव ॥ ३

अनुत्तरसुराणां त्वं, तत्रस्थानामिह स्थितः ।
वेत्सि छिनत्सि सन्देहं, न माहात्म्याऽवधिस्तव ॥ ४

फलं त्वद्भक्तिलेशस्य, निवासः स्वर्गभूमिषु ।
यत्सुराणां समग्राणां, महर्द्धिद्युतिभास्वताम् ॥ ५

देव ! त्वद्भक्तिहीनानां तपांस्यतिमहान्त्यपि ।
अबोद्धृणामिव ग्रन्था-ऽभ्यासः क्लेशाय केवलम् ॥ ६

यस्त्वां स्तवीति यो द्वेष्टि, समस्त्वमुभयोस्तयोः ।
शुभाऽशुभं फलं किन्तु, भिन्नं चित्रीयते हि नः ॥ ७

द्युश्रियापि न तोषो मे, नाथ ! नाथाम्यदस्ततः ।
भगवन् ! भूयसी भूया-त्त्वयि भक्तिर्ममाऽक्षया ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
अष्टापदपर्वते भरतभ्रातृभिः कृतः

## ३६. ॥ श्रीआदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

देवैरप्यपरिज्ञेयगुणं कः स्तोतुमीश्वरः ? ।
त्वां स्तोष्यामस्तथापीश विलसद्बालचापलाः ॥ १

तपस्यतामप्यऽधिकास्त्वां नमस्यन्ति ये सदा ।
वरिवस्यन्ति ये तु त्वां, योगिनामपि तेऽधिकाः ॥ २

नमस्यतां प्रतिदिनं, विश्वाऽऽलोकदिनेश्वर ! ।
धन्यानामवतंसन्ति, त्वत्पादनखरश्मयः ॥ ३

न किञ्चित्कस्यचित्साम्ना, बलाद्वा गृह्यते त्वया ।
त्रैलोक्यचक्रवर्ती त्वं, तथाऽप्यसि जगत्पते ! ॥ ४

स्वामिंस्त्वमेको जगतां, समं चेतस्सु वर्तसे ।
पीयूषदीधितिः सर्व-जलाशय-जलेष्विव ॥ ५

त्वां स्तोता स्तूयते देव !, सर्वैस्त्वामर्चिताऽर्च्यते ।
त्वां नन्ता नम्यते सर्वा, त्वयि भक्तिर्महाफला ॥ ६

त्वं देव दुःखदावाऽग्नि-तप्तानामेकवारिदः ।
मोहाऽन्धकारमूढाना-मेकदीपस्त्वमेव हि ॥ ७

रोराणामीश्वराणां च, मूर्खाणां गुणिनामपि ।
साधारणोपकारी त्वं, छायाद्रुम इवाऽध्वनि ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः

श्रीबाहुबलिनरेश्वरेण संस्तुतः

## ३७. ॥ श्रीआदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

अवज्ञायाऽज्ञतां स्वस्य, सर्वज्ञ ! त्वां स्तवीम्यहम् ।
यन्मां मुखरयत्येषा, दुर्वारा भक्तिमानिता ॥ १

जयन्त्यादिमतीर्थेश !, त्वत्पाद-नखदीप्तयः ।
वज्रपञ्जरतां यान्त्यो, भवाऽरित्रस्तदेहिनाम् ॥ २

देव ! त्वच्चरणाऽम्भोज-मीक्षितुं राजहंसवत् ।
धन्याः प्रतिदिनं दूरा-दपि धावन्ति देहिनः ॥ ३

घोरसंसारदुःखार्तैः, शीतार्तैरिव भास्करः ।
शरणीक्रियसे देव !, त्वमेवैको विवेकिभिः ॥ ४

ये त्वां पश्यन्ति भगवन् !, नेत्रैरनिमिषैर्मुदा ।
परलोकेऽप्यनिमिषी-भावस्तेषां न दुर्लभः ॥ ५

देव ! त्वद्देशनावाग्भि-र्याति कर्ममलो नृणाम् ।
क्षीरेण क्षोमवस्त्राणा-मिव मालिन्यमाञ्जनम् ॥ ६

स्वामिन्नृषभनाथेति, जप्यमाना तवाऽभिधा ।
आलम्बते सर्वसिद्धि-समाकर्षणमन्त्रताम् ॥ ७

न वज्रमपि भेदाय, न शूलमपि हि छिदे ।
तेषां शरीरिणां नाथ !, येऽधित्वद्भक्तिवर्मिताः ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः

श्रीभरतनरेश्वरसंस्तुतः

## ३८. ॥ श्रीआदिनाथजिनस्तवः ॥

(अनुष्टुप्)

त्वां जडोऽपि जगन्नाथ ! युक्तमानी स्तवीम्यहम् ।
लल्ला अपि हि बालानां युक्ता एव गिरो गुरौ ॥ १

देव ! त्वामाऽऽश्रयन् जन्तु-र्गुरुकर्मापि सिध्यति ।
अयोऽपि हेमीभवति स्पर्शात्सिद्धरसस्य हि ॥ २

त्वां ध्यायन्तः स्तुवन्तश्च, पूजयन्तश्च देहिनः ।
धन्याः स्वामिन्नाऽऽददते मनोवाग्वपुषां फलम् ॥ ३

पृथव्यां विहरतः स्वामिन्नपि ते पादरेणवः ।
महामतङ्गजायन्ते, पापद्रून्मूलने नृणाम् ॥ ४

नैसर्गिकेण मोहेन जन्मान्धानां शरीरिणाम् ।
विवेकलोचनं नाथ ! त्वमेको दातुमीशिषे ॥ ५

सुचिरं चञ्चरीकन्ति ये भवत्पादपद्मयोः ।
तेषां न दूरे लोकाऽग्रं मेर्वादि मनसामिव ॥ ६

देव ! त्वद्देशनावाग्भिर्गलन्त्याऽऽशु शरीरिणाम् ।
कर्मपाशा जम्बूफलानीव वारिदवारिभिः ॥ ७

इदं याचे जगन्नाथ ! त्वां प्रणम्य मुहुर्मुहुः ।
त्वयि भक्तिस्त्वत्प्रासादादऽक्षयास्त्वब्धिवारिवत् ॥ ८

पू.आ.श्री हेमचन्द्रसूरि विरचितः

श्रीशक्रेन्द्रसंकीर्तितः

## ३९. ॥ श्रीआदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

अपि सर्वात्मना ज्ञातु-मशक्या योगिपुङ्गवैः ।
स्तुत्याः क्व ते गुणाः स्तोता क्वाऽहं नित्यप्रमद्वरः ॥ १

तथापि नाथ स्तोष्यामि यथाशक्ति भवद्गुणान् ।
दीर्घाऽध्वनि व्रजन् खञ्जः किं केनाऽपि निवार्यते ? ॥ २

भवदुःखाऽऽतपक्लेश-विवशानां शरीरिणाम् ।
छत्रच्छायायमानाऽङ्घ्रि-च्छाय ! त्रायस्व न प्रभोः ! ॥ ३

कृतार्थस्त्वं स्वयं नाथ ! कृते लोकस्य केवलम् ।
एवं विहरसे स्वार्थायोद्याति किमहस्करः ! ॥ ४

मध्यन्दिनाऽऽदित्य इव त्वयि प्रभवति प्रभो ! ।
सङ्कुचत्यभितः कर्म देहच्छायेव देहिनाम् ॥ ५

तिर्यञ्चोऽपि हि धन्यास्ते ये त्वां पश्यन्ति सर्वदा ।
भवद्दर्शनवन्ध्यास्तु त्रिविष्टपसदोऽपि न ॥ ६

प्रकृष्टेभ्यः प्रकृष्टास्ते भविकास्त्रिजगत्पते ! ।
एको हृदयचैत्येषु येषां त्वमधिदेवता ॥ ७

एकं याचे भवत्पादान् ग्रामाद्ग्रामं पुरात्पुरम् ।
विहरन्नपि मा जातु विहासीर्हृदयं मम ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः

श्रीभरतचक्रवर्तीसंस्तुतः

## ४०. ॥ श्रीआदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

कुम्भैर्मानमिवाऽम्भोधेः स्तवनं मादृशैस्तव ।
स्तोष्यामि तदपि स्वामिन् ! भक्त्या ह्यस्मि निरङ्कुशः ॥ १

त्वदाऽऽश्रितास्तु त्वत्तुल्या भवन्ति भविनः प्रभो ! ।
यान्ति दीपस्य सम्पर्का-द्वर्त्तयोऽपि हि दीपताम् ॥ २

माद्यदिन्द्रियदन्तीन्द्राऽमदीकरणभेषजम् ।
तव स्वामिन् ! विजयते शासनं मार्गशासनम् ॥ ३

हत्वा घातीनि कर्माणि शेषकर्माण्युपेक्षसे ।
भुवनाऽनुग्रहायैव मन्ये त्रिभुवनेश्वर ! ॥ ४

पादलग्नास्तव विभो ! लङ्घन्ते भविनो भवम् ।
उदन्वन्तं पक्षिराज-पक्षमध्यगता इव ॥ ५

जयत्यनन्तकल्याण-द्रुमोल्लासनदोहदम् ।
विश्वमोहमहानिद्रा-प्रत्यूषं दर्शनं तव ॥ ६

त्वत्पदाऽम्भोजसंस्पर्शाद्दीर्यते कर्म देहिनाम् ।
इन्दोर्मृदुभिरप्यस्त्रैर्दन्तिदन्ताः स्फुटन्ति हि ॥ ७

वृष्टिर्वारिधरस्येव मृगाङ्कस्येव चन्द्रिका ।
जगन्नाथ ! प्रसादस्ते सर्वसाधारणः खलु ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
श्रीभरतनरेश्वरसंकीर्तितः

# ४१. ॥ श्री आदिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

त्वत्प्रभावात्स्तवीमि त्वामप्राज्ञोऽपि जगत्पते ! ।
शशिनं पश्यतां दृष्टि-र्मन्दापि हि पटूयते ॥ १

मोहाऽन्धकारनिर्मग्न-जगदाऽऽलोकदीपकम् ।
आकाशवदनन्तं ते स्वामिन् ! जयति केवलम् ॥ २

प्रमादनिद्रामग्नानां नाथ ! कार्येण मादृशाम् ।
एवं गताऽऽगतानि त्वं करोष्यर्क इवाऽसकृत् ॥ ३

जन्मलक्षार्जितं कर्म त्वदालोकाद्विलीयते ।
कालेन दृषदीभूतमप्याज्यं वह्निना द्रवेत् ॥ ४

एकान्तसुषमातोऽपि साध्वी च सुषमदुःषमा ।
यत्र कल्पद्रुमेभ्यस्त्वं विशिष्टफलदोऽभवः ॥ ५

समस्तभुवनेशेदं भुवनं भूषितं त्वया ।
राज्ञा पुरीव ग्रामेभ्यो, भुवनेभ्यः प्रकृष्यते ॥ ६

पिता माता गुरुः स्वामी यत्सर्वेऽपि न कुर्वते ।
एकोऽप्यनेकीभूयेव त्वं हितं विदधासि तत् ॥ ७

निशा निशाकरेणेव हंसेनेव महासरः ।
वदनं तिलकेनेव शोभते भुवनं त्वया ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितम्
प्रभोर्दीक्षाग्रहणादनु शक्रेन्द्रसंस्तुतम्

# ४२. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(अनुष्टुप्)

गुणांस्तव यथाऽवस्थान्, वयं वक्तुमनीश्वराः ।
स्तुमस्तथाऽपि, प्रज्ञा हि त्वत्प्रभावाद् भृशायते ॥ १

त्रस-स्थावर-जन्तूनां, हिंसायाः परिहारतः ।
स्वाभिन्नभयदानैक-सत्रिणे भवते नमः ॥ २

नमस्तुभ्यं मृषावाद-परित्यागेन सर्वथा ।
पथ्य-तथ्य-प्रियवचः-सुधारसपयोधये ॥ ३

भगवन्नदत्तादान-प्रत्याख्यानखिलाऽध्वनि ।
प्रथमायाऽध्वनीनाय, नमस्तुभ्यं जगत्पते ॥ ४

अखण्डितब्रह्मचर्य-महातेजोविवस्वते ।
भगवन्मन्मथध्वान्त-मथनाय नमोऽस्तु ते ॥ ५

सर्वमेकपदे नाथ ! पृथिव्यादिपरिग्रहम् ।
पलालवत् त्यक्तवते, तुभ्यं मुक्ताऽऽत्मने नमः ॥ ६

तुभ्यं नमः पञ्चमहा-व्रतधारककुद्मते ।
संसार-सिन्धु-तरण-कर्मठाय महात्मने ॥ ७

महाव्रतानां पञ्चाना-मिव पञ्चाऽपि सोदराः ।
बिभ्रते समितीस्तुभ्यमादिनाथ ! नमो नमः ॥ ८

आत्मारामैकमनसे, वचःसंवृतिशालिने ।
सर्व-चेष्टा-निवृत्ताय, नमस्तुभ्यं त्रिगुप्तये ॥ ९

पू.आ.श्री हेमचन्द्रसूरिविरचितम्

समवसरणभुवि. श्रीभरतनरेश्वरसंदृब्धम्

## ४३. ॥ श्रीऋषभजिनेन्द्रस्तवनम् ॥

(अनुष्टुप्)

जयाऽखिल-जगन्नाथ !, जय विश्वाऽभय-प्रद ! ।
जय-प्रथम-तीर्थेश !, जय संसार-तारण ! ॥ १

अद्याऽवसर्पिणी लोक-पद्माकरदिवाकर ! ।
त्वयि दृष्टे प्रभातं मे, प्रनष्टतमसोऽभवत् ॥ २

भव्यजीवमनोवारि-निर्मलीकारकर्मणि ।
वाणी जयति ते नाथ !, कतकक्षोदसोदरा ॥ ३

तेषां न दूरे लोकाग्रं, कारुण्य-क्षीर-सागर ! ।
समारोहन्ति ये नाथ !, त्वच्छासनमहारथम् ॥ ४

लोकाग्रतोऽपि संसार-मग्रिमं देव ! मन्महे ।
निष्कारणजगद्बन्धु, यत्र साक्षात्त्वमीक्ष्यसे ॥ ५

त्वद्दर्शनमहानन्द-स्यन्द-निष्यन्दलोचनैः ।
स्वामिन् मोक्ष-सुखाऽऽस्वादः, संसारेऽप्यनुभूयते ॥ ६

रागद्वेष-कषायाद्यै रुद्धं जगदरातिभिः ।
इदमुद्वेष्ट्यते नाथ !, त्वयैवाऽभयसत्रिणा ॥ ७

स्वयं ज्ञापयसे तत्त्वं, मार्गं दर्शयसि स्वयम् ।
स्वयं च त्रायसे विश्वं, त्वत्तो नाथामि नाथ ! किम् ॥ ८

नानावस्कन्दसङ्ग्राम–हत–ग्राम–भुवो मिथः ।
मित्रीभूयेह तिष्ठन्ति, राजानस्तव पर्षदि ॥ ९

त्वत्पर्षद्ययमायातः, करटी करटस्थलीम् ।
करेण केसरिकरं, कृष्ट्वा कण्डूयते मुहुः ॥ १०

इतश्च महिषमिव, महिषोऽयं मुहुर्मुहुः ।
स्नेहतो जिह्वया मार्ष्टि, हेषमाणमिमं हयम् ॥ ११

लीलालोलितलाङ्गूल, उत्कर्णो नमिताऽऽननः ।
घ्राणेन व्याघ्रवदनं, जिघ्रत्ययमितो मृगः ॥ १२

पार्श्वयोरग्रतः पश्चाल्ललन्तं निजपोतवत् ।
अयं तरुणमार्जारः, समाश्लिष्यति मूषिकाम् ॥ १३

अयं च निर्भयो भोगं, कुण्डलीकृत्य कुण्डली ।
अदभ्रबभ्रोरभ्यर्णे निषीदति वयस्यवत् ॥ १४

देव ! ये केचिदन्येऽपि, जीवाः शाश्वतवैरिणः ।
निर्वैरास्तेऽत्र तिष्ठन्ति, त्वत्प्रभावोऽसमो ह्ययम् ॥ १५

पू.आ.श्री कुमुदचन्दसूरिविरचिता
श्रीआदिनाथस्तुतिःअपरनामा

## ४४. ॥ श्रीचिकुरद्वात्रिंशिका ॥

(शिखरिणी)

मुदे वस्ताद्देवस्त्रिदिवयुवतीमौलिवलभी–
विटङ्कप्रक्रीडन्मुकुटपटलीलालितपदः ।
स चिन्तामाणिक्यामरसुरभिकल्पावनिरुहां–
सनाभिर्नाभेयस्त्रिभुवनवनीजीवनघनः ॥ १

गलद्गर्वग्रन्थिः प्रथमजिननाथस्तुतिपथे-
न पान्थीभूयन्ते धिषणधिषणाऽपि प्रथयति ।
ममायं विस्फायत्तरणिकिरणश्रेणिसरणे-
तदेवं हेवाको वियति नियतं वल्गनमयः ॥ २

स्फुरत्बाल्यावस्थासुलभविभवाच्चापल-कला-
विलास-व्यासङ्ग-व्यसनरसतः किं नु नटितः ।
इमां बालां बुद्धिं तव नवनवक्रीडनलवै-
स्तदिक्ष्वाकुश्रीणां रमण ! रमयिष्यामि किमपि ॥ ३

उदञ्चत्पौलोमी हृदयदयित-प्रार्थन-कथा-
प्रथाबीजं स्कन्धद्वयसुचरितश्रीपरिणते ।
त्रिलोकीनेत्राणाममृतमयसिद्धाञ्जनमियं-
कवीनां सन्नीवीवरदकबरी ते विजयते ॥ ४

त्वदीयाङ्गे रङ्गत्कनककणिकाकान्ति-कपिशे-
जगद्बन्धो स्कन्धद्वयशिखरभित्तौ कचलता ।
युगादौ सद्धर्मप्रथनभवने दोषहुतये-
दधौ नीलीनीलाञ्जनमयनवस्थासककलाम् ॥ ५

बभौ नाभिक्षोणीधवभव ! भवत्केशकुरली-
निलीना पीनांसस्थलफलकयोः कज्जलकला ।
गृहीतेवोन्माद्यन्मदमदनसंरम्भकदना-
भुजाभ्यां मायूरीस्फुटमुपरितश्छत्रयुगली ॥ ६

अहं मन्ये धन्ये नहि महिमभूयिष्ठ ! भवता-
भवाम्भोधिर्भीमोप्युभयभुजहेलाभिरभितः ।

ललङ्घे दुर्लङ्घो लघु लसति केशावलिनिभा-
न्निरेना येनांसे सलिलशबला शैवललता ॥ ७

ध्रुवं सा श्रीर्देवीवरदमरुदेवा भवभवन्-
मुखाम्भोजक्रीडाकनकवलयौ खेलति मुदा ।
सदोपास्ते पार्श्वं हरिरिह रिरंसा लसद्दमा(दिमा)
कचव्याजाद्येनोज्ज्वलतमतमालद्युतिततिः ॥ ८

विभो ! श्रुत्वा गङ्गां घनतरतरङ्गाम्बुतरलां-
त्रिलोकीजङ्घालां किल निपतनाद्भैरव भुवि ।
ध्रुवं साम्ये काम्ये त्वयि जयिनि तीर्थे कचलता-
छलान्मौले: शृङ्गाल्लसति पतयालू रविसुता ॥ ९

त्रिलोकीतिग्मांशो ! मिलदमललावण्यलहरी-
परीतं स्फीतं श्रीमुखसरसिजं ते विजयते ।
सदोपान्ते कान्ता चिकुरकुरलीनीलनलिनी-
विनीलालीना यद्भ्रमरतरुणीधोरणिरियम् ॥ १०

जगद्दृश्वन्निश्वान्पवतु भवतः काञ्चनरुचौ-
कपोले लोलन्ती ललितवलिता कुन्तललता ।
तपोलक्ष्मीलीलापरिणयमहापर्वणि कृता-
विचित्रापत्रालीं मृगमदमयीवाग(घ) दमनः ॥ ११

तदा सत्यं सत्त्वाच्छकटमुखभाजा स्मितमुख !
त्वया दध्रेऽनद्धानणुगुणमहासंयमभरः ।
यतः स्कन्धाबन्धे चिहु(कु?)रनिवहश्रीपरिणते-
किणाः श्रेणीभूताः वृषभ ! विजयन्ते जिनपते ! ॥ १२

अहं जाने हेलाहतवृजिननीरञ्जनजिन !
प्रदीपस्ते स्वान्ते ज्वलति विमलः केवलमयः ।
समन्ताद्येनायं श्रवणविवरान्निर्गत हि तेंऽ-
ज्जनस्तोमः सोमानन ! घनविनीलो विलसति ॥ १३

ध्रुवं देवोद्दध्रे विष(य)मयजम्बालकलिलात्-
त्रिलोकी कारुण्यात्कलिकलुषकूलङ्कषमुखम् ।
वृषस्कन्धोत्तंसप्रवरकबरीमञ्जरिमिषा-
द्विलग्ना येनेयं भुजशिखरयोः पङ्ककणिका ॥ १४

अमन्दम्भिन्दाने भृशतमम विद्यान्धतमसं-
शुचिब्रह्मज्योतिर्बत नियतमन्तःस्फुरति ते ।
शिरोजालीव्याजाद्यदमुकुलनीलोत्पलदल-
प्रभाचौरी चञ्चत्युपरि परितो धूमलतिका ॥ १५

स्वयम्बोधो बोधामृतरसभृतः पूर्णकलश-
स्त्रिलोकीमाङ्गल्यस्त्वमसि कपिशः काञ्चनरुचा ।
कृतोत्कण्ठे कण्ठे लुठति यदियं कुन्तलमयी
लसद्लक्ष्मी लीलालयकुवलयस्मेरवलयी ॥ १६

अविद्यामूर्च्छाल-त्रिभुवनजनोज्जीवन ! जिन !
स्फुरच्छुक्लध्यानामृतलहरिपूर्ण ध्रुवमसि ।
अखण्डं त्वं कुण्डं यदमलमिलत्कुन्तलमिषा-
दुपान्तं नोमुञ्चत्युरगनिकरा यामिकवराः ॥ १७

प्रभाभिर्दिक्कुक्षिंभरिभिरुदयी कल्मषमुषो-
मुखेन्दुर्नन्द्यात् ते त्रिभुवनसुधापारणमहः ।

कुहूः सूचीभेद्यान्धतमसमयी सङ्गमसुखा-
न्यवाप्तुं तत्पूर्वं यमिव समुपास्ते कचमिषात् ॥ १८

अतर्क्यान्तस्तत्त्वोनमदसुमतां वाङ्मनसयोः-
समन्तादस्ताघः समरसमहानीरधिरसि ।
वितेने तेनेयं ननु चिकुरवल्ली विकसता-
तताभीसुवेलावनघनतमालावनिरुहः ॥ १९

त्रिलोकीमाध्यस्थं दधदधिकमाकालमचलः-
सुमेरुस्त्वं स्वामिन्विकचरुचिकल्याणरुचिरः ।
भुजाशृङ्गोत्सङ्गे चिकुरनिभतो नन्दनवनी-
विनीला यद्दत्ते हृदि मुदमुदग्रां सुमनसाम् ॥ २०

कषोत्तीर्णस्वर्णत्विषि वपुषि सैषा सुखयुता-
ज्जगन्ति प्रेङ्खन्ती तव चिकुरलेखा जिनवृष ! ।
गिरेः शृङ्गोत्तुङ्गे बहुलविलसत्गैरिकरसे-
शयालुर्नीरन्ध्रा नवमुदिरमालेव मधुरा ॥ २१

जगन्नेतर्नेता हरिहरिहरित्केशकणिका-
भवत्कण्ठक्रोडान्तिकविसृमराः किं पुनरमी ।
परीरम्भारम्भाद्भुतरभसन्मुक्तितरुणी-
भुजामालोद्वेल्लन्मणिगणरणत्कङ्कणकिणाः ॥ २२

ध्रुवं कर्मक्लेशावलिनिखिलदन्ताब(व)लबल-
च्छिदाऽलङ्कर्मीणस्त्वमसि जिनगन्धेभकलभ ! ।
कपोलान्ते लोलाविरलविगलद्दानसलिल-
छटाछायां धत्ते भ्रमरहरिणी येन कबरी ॥ २३

मुमुक्षोस्ते दीक्षोपगमसमये कुन्तलतति-
र्लुलन्तीयं कार्तस्वरमयभुजस्तम्भशिरसि ।
प्रवेशे तत्कालं प्रसृमरमनःपर्यवविदो-
मुदामाङ्गल्यस्त्रग्दलवलयलीलां कलयति ॥ २४

मुमुक्षो निक्षिप्य स्वतनुकनकं दुस्तपतपो-
ऽनले ज्वालाश्रयिणि नियतं शोधितमिदम् ।
तवांसे येनेश ! स्फुटति कबरीवल्लरिनिभा-
द्विभात्युच्चैरेषा गलितमलकालुष्यपटली ॥ २५

उदञ्चद्ब्रह्मद्वाःसदनवलभीं केवलविदो-
ऽधिरोढुं बिभ्राणा हरितमणिनिश्रेणिकरणिम् ।
त्रिलोकं सल्लोकम्प्रि (पृ) णंमसृणकेशाङ्कुरवनी-
पुनीतां शीतांशुद्युतिविततिसर्वंकषमुखाः ॥ २६

हतक्लेशाः केशाः कुलकरकुलीनांऽसलुलिता-
स्तवोन्मीलन्नीलाम्बुरुहसुभगं भावुकविभाः ।
दधुर्नीलोत्फुल्लद्वदनकमलार्हन्त्यकमला-
विलासार्थं दोलायुगललतिका-रज्जुतुलनाम् ॥ २७

जगद्द्रोहो मोहः स खलु विषमेषुः खलतमो
महायोधः क्रोधः समितिसममेते बत जिता ।
तथाप्यावां नाथः कथमपि दृशा नेक्षत इति-
त्वदीयांसौ कार्ष्ण्यं विमद ! दधतु स्तौ कचमिषात् ॥ २८

त्रिलोकीकल्पद्रो ! किल युगलधर्मव्यतिगमे-
धराकल्पाः कल्पावनिजनिवहा वैभवजिताः ।

त्वया तत्कालं ये समदमुदमूल्यन्त विकटा-
जटाजाली तेषां परिणमति केशावलि तदा ॥ २९

मुमुक्षूणां तादृक् शमरसकृते ध्यानविवरं
विविक्षूणां क्षीणान्तरतमतमः पुस्तकमसि ।
महार्थंकल्पस्य ध्रुवमय विकल्पस्य यदिमा-
जिनेन्दो ! दीप्यन्ते किमपि लिपयः केशकपटात् ॥ ३०

तवाबन्धस्कन्धस्थलविलुलिता लुम्पतु सता-
मतान्तं लिम्पन्ती भृशममृतपङ्कैरिव दृशः ।
युगादिश्रीतीर्थङ्कर चिकुरलेखा नवयवा-
ङ्कुराली कर्णान्ते नियतमवतंसाय रचिता ॥ ३१

इति श्रीनाभेयस्तवलवमिदं यस्तवनवं-
सुधासद्रीचीभिर्विमलगिरिशृङ्गारमुकुट ! ।
ब्रुवाणो वाणीभिस्त्वयि लयमयीमञ्चति कलां
स एव श्रीदेवो जनकुमुदचन्द्रः कविरविः ॥ ३२

पू.आ.श्री चारित्रसुन्दरसूरिविरचितम्

यमकमयम्

## ४५. ॥ श्रीआदीश्वरजिनस्तोत्रम् ॥

(वसन्ततिलका)

आदीश्वरं स्वतिशयालिविराजमानं
तीर्थङ्करं तनुविभास्तविराजमानम् ।
भक्त्या प्रयुक्तयमनकैर्नृपनाभिभूतं
स्तोष्ये त्रिधा न विलसन्मदनाऽभिभूतम् ॥ १

ये नाथ ! कामदमनं तरसा दरेण
येनाऽथ कामदमनन्तरसाऽऽदरेण ।
त्वामीडते विततदुर्गतिसम्भवेन
श्रीयन्त ईश ! न नरा इह ते कदाचित् ॥ २

हृद्यंशुभाकरमपाऽऽपदमुद्यमेन
यस्त्वां स्मरत्यविरतं जगदेकनाथम् ।
हृद्यं शुभाऽऽकरमपापदमुद्यमेन
स्वामिन् ! पदं स लभतेऽत्रऽपरत्र चोच्चैः ॥ ३

संसारभावसमनं गदमार ! माला-
भ्राजिष्णुरासरमणी रमणीयहावा ।
न त्वा मनागपि जिनेश ! विशालमाया-
सं सारभा वशमनङ्गद ! मारमाला ॥ ४

इक्ष्वाकुवंशतिलकं त्रिजगन्नमस्य-
माऽऽयासहं विशदकेवलभासमानम् ।
मायाऽसहं विशदके वलभाऽसमानं
ध्यायन्ति देव ! सुधियोऽत्र भवे भवन्तम् ॥ ५

यस्त्वां श्रयत्यविरतं भुवनैकवीर !
सद्यो गतारमऽमताहरणं विमारम् ।
रामारमा भजति तं नियतं समेत्य
सद्योगतार ! ममताहरणं विमारम् ॥ ६

मूर्त्तिः पवित्रयति ते नयने जनानां
दृष्टा स्तुता च जगदीश ! शमप्रधाना ।

गाङ्गेयभासुर ! वरा विदिता रमारा
गाङ्गेय-भा सुरवरा विदिताऽऽरमारा ॥ ७

सन्मानवानऽव कलाऽऽमलराशिवारे ! -
ऽसन्मान ! वाऽनव ! कलामल ! राऽशिवाऽरे ! ।
सन्मानवानऽवक ! लामलराशिवारे
सन्माऽनवाऽऽनवकलाऽमलराऽशिवारे ! ॥ ८

मन्देऽहमुद्यमवरं हि तमाऽऽद्यनाथं
योगाच्छ्रमं ! चितपदो विबुधैरमानम् ।
योगाच्छ्रमञ्चितपदो विबुधैरमानं
मन्देहमुद्यमवरं हितमाद्यऽनाथम् ॥ ९

मोदात्तमाऽऽनमत तारकलं यमीशं
मोदात्तमानमऽततारकलं यमीशम् ।
निष्कोपमानवपुषं परमारमारं
निष्कोपमानवपुषं परमारमारम् ॥ १०

सज्जातरूपरुचिराऽङ्गविराजमानं
ज्ञानं ददस्व वृषभासित ! भावलक्ष्म् ।
सज्जातरूप ! रुचिराङ्ग ! विराऽजमानं
ज्ञाऽऽनन्दद ! स्ववृषभाऽऽसित ! भावलक्ष्म् ॥ ११

कल्याणभाजन ! मदाऽचित ! माऽवदातः
शं देहि ताकर ! महोदय ! राजिताऽङ्ग ! ।
निर्मानमुद् ! दलितसङ्गर ! वामदेह !
मह्यं चितादर ! पराभवहृद् ! यशोभ ! ॥ १२

कल्याणभाऽज ! नमदाऽऽचित ! मावदातः
शन्देहिताकर ! महोदयराऽजिताङ्ग ! ।
निर्मानमुद् ! दलितसङ्कर ! वाऽमदेह !
मह्यञ्चितादर ! पराऽभव ! हृद्यशोभ ! । ॥ १३

सस्मार यो न हृदये कृतपातकान्तं
त्वां देवसेवितपदं दितपातकान्तम् ।
संसारपारमयते न कदाचिदत्र
सोऽयं भ्रमन् भवशतानि कदाऽचिदत्र ॥ १४

ताराऽमराश्रितपदं भजते जनो यो
ताऽराऽमरामरहितं भगवन् ! भवन्तम् ।
ताराम राजति चिरं जितशात्रवोऽत्र
ताराऽमराजसमकीर्त्तिधरो नरोऽयम् ॥ १५

मोक्षोऽपि देव ! सुलभः परमस्तकेन
येनाऽऽप्यते तव वचो नतमस्तकेन ।
नाभेय ! भीतिभिदुरं परमऽस्तकेन !
संवेगमग्नमनसाऽऽप्तसमस्तकेन ॥ १६

देव ! त्वदंह्रिकमलं कमऽलं ददानं
संसारवासशमनं शमनन्दनं च ।
आलोक्य सुन्दरतरं रतरङ्गहारि
सन्तो हितं स्वतरसा तरसा लभन्ते ॥ १७

रागादिशत्रुभयभीतमनाः सदाऽहं
त्वामाश्रितोऽस्मि शरणं शिवदाऽसदाहम् ।

निःसङ्गरङ्गमनसं हतपापपक्षं
निःसङ्गरं कृतजगज्जनशर्मलक्षम् ॥ १८

आराध्यते सुरचनं वचनं जनानां
नानाऽन्तरायशमनं शमशोभमानम् ।
माऽऽनन्दकारि भववारिनिधेः कृपारं
पारं गमिष्यति कदा तव सेवकोऽयम् ॥ १९

स्तोत्रेऽत्र चित्रयमके यमकेलिहर्त्तः
श्रेयो यदार्जि मयका मयका महीन ! ।
तेन त्वमेव सुकृतेन कृतेन भूयाः
स्वामी सदोरुविभवाऽऽशु भवाऽशुभच्छित् ॥ २०

स्तोत्रं श्रीवृषभप्रभो ! तव नवं यन्मन्दधीरप्यहो !
चारित्राऽऽदिमसुन्दरो व्यरचयद् भक्तिप्रयुक्तोऽधिकम् ।
साऽऽनन्दं स्फुटलन्दमन्दिरमिदं यः पापठीत्यादराद्
दानस्थामगुणेन स्तोत्रजगति श्रीरत्नसिंहायते ॥ (शा.वि.) २१

पू.आ.श्री जयानन्दसूरिविरचितम्
श्रीसोपारकनगरमण्डनश्रीजीवितस्वामि-

## ४६. ॥ श्रीआदिनाथस्तवनम् ॥

(भुजङ्गप्रयातम्)

जयानन्दलक्ष्मीलसद्वल्लिकन्दं
सुराधीशसंसेव्यपादारविन्दम् ।
स्फुरच्चारुचामीकरद्योतिदेहं
युगादीशमानौमि सोपारकेऽहम् ॥ १

तितीर्षामि सिन्धुं भुजाभ्याममानं
चिकीर्षामि पीयूषयूषस्य पानम् ।
तितंसामि यन्मन्दधीस्तावकानां
स्तवं देव सङ्ख्यातिगानां गुणानाम् ॥ २

मनश्चिन्तितातीतवस्तुप्रदेन
द्युसत्पादपेन त्वया जङ्गमेन ।
नवः कोऽप्ययं नन्दनोद्यानदेशः
प्रभो ! भ्राजते कुङ्कणाह्वानदेशः ॥ ३

मयाप्तं फलं जन्मकल्पद्रुमस्य
प्रभुत्वं च विश्वस्य विश्वत्रयस्य ।
यतश्चक्षुषा वीक्षितस्त्वं वरेण्यै-
श्चिरं सञ्चितैः प्राच्यपुण्यैरगण्यैः ॥ ४

विशिष्टैककाष्ठोदयं यानपात्रं
पवित्रं विराजद्गुणश्रेणिपात्रम् ।
भवत्पादपद्मं विभो ! ये भजन्ते
भवाम्भोधिपारीणतां ते लभन्ते ॥ ५

अहं भाग्यहीनो भवन्तं प्रपद्य
प्रभो ! भाग्यवानद्य जातोऽस्मि सद्यः ।
दृषत्खण्डमप्यागतं स्वर्णशैले
सुवर्णं न किं जायते वा विशालम् ॥ ६

विदेशङ्गमी प्राप्य सत्सार्थवाहं
यथा मोदते चातको वाऽम्बुवाहम् ।
तथाऽहं भवन्तं शिवश्रीविनोदं
समासाद्य सद्यः प्रपद्ये प्रमोदम् ॥ ७

कदा देव ! ते सेवकोऽहं भवेयं
कदा शासनं तावकीनं भजेयम् ।
कदा दर्शने दर्शनात् पावयेयं
कदा त्वत्पदाब्जं च चित्तं नयेयम् ॥ ८

महातीर्थशत्रुञ्जयोपत्यकायां
सुसम्पद्विलासोल्लसद्भूमिकायाम् ।
पुरे सारसोपारके मूर्त्तिरेषा
मुदेस्तु त्वदीया दृशोरिन्दुलेखा ॥ ९

विभो ! तावकीनप्रसादादशेषाः
समेषां भवन्तीष्टलक्ष्मीविशेषाः ।
दुरापं भवेद्वस्तु किं कल्पवृक्षे
जनानां मनोभीष्टदानैकदक्षे ॥ १०

निरुपममहिमश्रीसारसोपारनाम-
प्रवरनगरलक्ष्मीकामिनीकङ्कणाभः ।

प्रथमजिन ! मयैवं भक्तितः संस्तुतस्त्वं
निजविशदपदाब्जोपासनां देव ! देयाः ॥ (मालिनी) ११

पू.आ.श्री गुणरत्नसूरिविरचितः

कुल्यपाकमण्डन

## ४७. ॥ श्रीयुगादिदेवस्तवः ॥

श्रीकुल्यपाकपुरभूमिशिरोवतंसं
विश्वत्रयीभविकमानसराजहंसम् ।
माणिक्यदेवमृषभं प्रयतः स्वशक्त्या
कल्पानुसारमहमेष नवीमि भक्त्या ॥ (वसन्ततिलका) १

अष्टापदे किल नगे भवनेऽतिभव्ये
निर्मापिते निरुपमे भरतेन नव्ये ।
संस्थापिता मणिमयाः प्रतिमा जिनानां
वर्णप्रमाणकलिता ऋषभादिकानाम् ॥ (वसन्ततिलका) २

क्रमात्ता भविष्या नराणामगम्या
विदित्वात्र लोकोपकाराय रम्या ।
द्रुतं निर्मलैका युगादीशमूर्त्तिः
पृथक्कारिता तेन क्लृप्तेष्टपूर्त्तिः ॥ (भुजङ्गप्रयात) ३

मरकतमणिरूपा स्वच्छताराजमाना
भपतिकलितभाला सौम्यदृष्टी दधाना ।
सतपनचिबुकाग्रा शङ्खचक्राढ्यहस्ता
चिहुरचयकलांसा नाभिलिङ्गप्रशस्ता ॥(मालिनी) (युग्मम्) ४

(वसन्ततिलका)

माणिक्यदेव इति सा विदिताऽत एव
षड्दर्शनान्यपि वदन्ति न एष देवः ।
जल्पन्ति केऽपि नियतं जगदर्हसेवै-
रत्रावतीर्णमखिलैरपि विश्वदेवैः ॥ ५

कालक्रमेण किल तां खचराः सुकान्तां
दृष्ट्वाऽद्भुतां हृतहृदः प्रतिमां प्रशान्ताम् ।
नीत्वाऽर्चयन् विमलरत्नमयाऽचलायां
वैताढ्यभूमिधरदक्षिणमेखलायाम् ॥ ६

तत्पूजायाः प्रभावात्सम्पनीपद्यमानां
तेषां दृष्ट्वा समृद्धिं नित्यमेवासमानाम् ।
तन्माहात्म्यं यथास्थं नाकिनाथाय सर्वं
प्राशंसन्नारदर्षिर्देवलोके सगर्वम् ॥ ७

आनाय्य तां दिवि ततः प्रतिमां सुरेश
आनर्च तावदमरालिलसत्स देशः ।
यावच्च सुव्रतनमीशजिनान्तराले
लङ्केश्वरो दशशिराः समभूत्स्वकाले ॥ ८

मन्दोदरी प्रियतमाऽस्य यथास्थभावं
तं नारदेन गदितं प्रतिमाप्रभावम् ।
श्रुत्वोत्सुकाऽत्र जिनधर्मविवर्द्धनाय
जग्राह दुर्ग्रहमभिग्रहमर्चनाय ॥ ९

आराधितः सुरपतिः पतिरावणेन
तस्यै ददौ तदनु तां प्रतिमां जवेन ।

तां सार्चयत् प्रतिदिनं प्रयता त्रिकालं
नित्यार्चनाऽवसरताडिततूरमालाम् ॥ १०

स्वप्ने जिनाश्रितसुरैः पतिपूर्विनाशे,
सीतापहारसमये कथिते प्रकाशे ।
चिक्षेप तां जलनिधावथ साऽवनाय
तत्रार्चयंश्च विबुधाः सुकृतार्जनाय ॥ ११

इतश्चेह कर्णाटदेशे प्रसिद्धं
पुरं नाम कल्याणमासीत्समृद्धम् ।
बभूवाऽत्र भूपः प्रतापेन वित्तः
क्रमाच्छङ्करो जैनधर्मैकचित्तः ॥ (भुजङ्गप्रयात) १२

मिथ्यादृग् व्यन्तरेणोत्पादिते मारिरोगे
स्वप्ने पद्मावती तं प्रोचुषी रात्रियोगे ।
राजन् ! माणिक्यदेवं सागरादानयाऽत्र
स्वे द्रङ्गे येन लोकः स्यात्सदा स्वस्थगात्रः ॥ १३

नृपमुपतटमेत्योपोषितं मङ्क्षु मत्वा
लवणजलधिनाथो बिम्बमानीय दत्त्वा ।
इदमवददविघ्नं भाविसौख्यं सदेत-
स्तव विषयजनानां किन्तु भो भूमिनेतः ! ॥ (मालिनी) १४

त्वयि चलति ससैन्ये पृष्ठगा मूर्त्तिरेता
वरवृषशिशुवाह्यस्यन्दनस्था जवेता ।
पथि यदि तव भावी संशयो यत्र हन्ते-
तदचल इव बिम्बं वर्त्स्यते स्थास्नु तत्र ॥ (मालिनी)(यु.)१५

राजा तद्वाचमङ्गीकृत्य सेनापरीतः
सिद्धार्थः प्रस्थितोऽग्रे दुर्गमार्गं व्यतीतः ।
चित्ते दध्यौ जिनार्चा सा किमायाति नो वा
गीर्वाणानां चरित्रं वेत्ति मर्त्यो हि को वा ॥ १६

तावद् दिव्यानुभावात्तां तिलिङ्गाख्यदेशे
द्रङ्गे श्रीकुल्यपाके मूर्त्तिमाकाशदेशे ।
विज्ञायावस्थितां श्रीशङ्करो भूमिपालः
प्रासादं कारयित्वा ऽऽनर्च तद्दायपालः ॥ १७

(शार्दुलविक्रीडितम्)

प्रागासीदतिनिर्मला मणिमयी पश्चात्कठोराङ्गकाऽऽ-
सन्नैकादशलक्षवत्सरभवात् क्षारोदसङ्गात्सका ।
जाता विक्रमतः पुनः खवसुषट् (६८०) वर्षे सुराधिष्ठिता
दुर्म्लेच्छागमनं विभाव्य गगनात् सिंहासने संस्थिता ॥ १८

किं वज्रेण विनिर्मितेयमनघा किं नीलरत्नेन वा ?
किं वेदृग् स्वयमेधितेति किल यां संशेरते मानवाः ।
रम्भास्तम्भनिभा सदा निजरुचा भव्याङ्गिदृष्ट्योः परं
वर्षन्ती परितः सुधारसमसौ जीयाज्जिनार्चा चिरम् ॥ १९

ॐ ह्रीँ श्रीँ जिननाममन्त्रकलितं तत्क्लृप्तरक्षाश्रयः
सम्यग् वर्णदिगादिवर्यविधिना शश्वद्विशुद्धाशयः ।
यो माणिक्यविभुं युगादिजिनपं ध्यायेल्लसत्प्रातिभः
सौख्यज्ञानरमास्पदं भवति स श्रीसर्ववित्सन्निभः ॥ २०

यस्य स्नात्रजलेन साम्प्रतमपि द्राग् दीपको दीप्यते
वासोऽद्यापि च चैत्यमण्डपझरद्वाःशीकरैः क्लिद्यते ।

पुंसां भाग्यवतां सतां समुदये यात्राकृतां भावत
एवं नैकविधो यदीयमहिमा विस्फूर्जते सर्वतः ॥ २१

तं तीर्थेष्वधिपं सुरासुरनतं माणिक्यदेवं नरा
ये यात्रामहपूजनादिविधिनाऽऽराध्यन्ति बद्धादराः ।
ते श्रेयांसि यशःसुखानि च चिरं भुक्त्वा हि चेतोमता-
नीहाऽमुत्र च संश्रयन्ति शिवगं सौख्यं जगत्युत्तमाः (यु.) ॥२२

इत्थं श्रीसदनं प्रशान्तवदनं श्रेयः सुमालीवनं
श्रीनाभेयजिनं निरस्तवृजिनं स्तुत्वा जगत्स्वामिनम् ।
यत्कान्तं विततं मयार्जि सुकृतं तेनात्र चेतोमतं
भव्याः सिद्धिपदं प्रयान्त्वविपदं सज्ज्ञानलीलास्पदम् ॥ २३

पू.आ.श्री सोमदेवसूरिविरचितम्

राणपुरधरणविहारस्थ-

## ४८. ॥ श्रीयुगादिदेवस्तवम् ॥

(आर्या)

सुषमाऽतिपुराणपुरे राणपुरे श्रीचतुर्मुखं प्रणमन् ।
प्रथमजिनं सुकृतार्थी सुकृताऽर्थी भवति को न जनः ? ॥ १

त्वयि जनकदम्बकानन-कदम्बकाऽऽनन ! घनाघन समान ! ।
अद्याजनि मम दृष्टेऽजनि मम दृष्टेः सफलभावः ॥ २

किङ्करमानि बिडौजसि निबिडौजसि यस्त्वयीश ! भक्तिपरः ।
तं संवर-रमणीयं वररमणीयं भजेन् न किं मुक्तिं ? ॥ ३

अविरतमनघ ! नमज्जन-घन ! मज्जनतस्तवागमोर्मिषु ।
जलधिवदुरुकमलाऽऽलय ! मलाऽलयः कैर्न मुच्यन्ते ॥ ४

तव जगदाऽऽनन्दीश्वर ! नन्दीश्वर-चैत्यविजयिनमिहैत्य ।
सुधियोऽप्यमुमनि भाऽऽलयम-
निभालयतः कथं मुधा न जनुः ॥ ५

स्वमसम-समुदयसदनं समुदय ! सदनन्त-तेजसां मन्ये ।
यदञ्जननमने निजजननमनेनिजमहं तवाऽऽद्य कृते ॥ ६

शिवमेलसज्जपाऽवन ! लसज्जपा-
वन विडम्बिनि शुचौ ते ।
पदनखमहे शलभतां महेश ! लभतां ममाऽघभरः ॥ ७

जगदपि धर्मधुरन्धर ! मधुरं धरणेन्द्र गायति यशस्ते ।
चतुरास्यविभुविहारं भुवि हारं यद् ध्रुवं न्यास्थः ॥ ८

श्रीसोमसुन्दरप्रभ दरप्रभग्नाङ्गि-तप्तिजयचन्द्र !
इतिनुत ! मामनु परमा-मनु-
परमां वृषभ ! शिवरमां देयाः ॥ ९

पू.आ.श्री जयचन्द्रसूरिशिष्यविरचितम्

देलवाडामण्डन-

# ४९. ॥ श्रीआदिनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

कल्याणावलिवल्लरीवनसमुल्लासैकधाराधरं,
धर्मन्यायपथप्रथात्रिपथगाप्रालेयपृथ्वीधरम् ।
श्रीमद्देलउलाह्वतीर्थवसुधाशृङ्गारचूडामणिं,
स्तौमि श्रीऋषभप्रभुं त्रिभुवनाभीष्टार्थचिन्तामणिम् ॥ १

आनन्त्यं बत केऽपि ते गुणगतं तुल्यं निगोदात्मना-
मानन्त्येन विदुर्वयं तु नयतोऽनन्तद्वयाऽनिष्ठितिम् ।
अंशोऽनन्ततमो व्रजेदिह गुणास्ते बिभ्रतेऽनेहसा-
ऽनन्तेनाऽपि तु वृद्धिमेव भुवनैरादीयमाना अपि ॥ २

मन्ये देलउलाऽवनीवनघन ! त्वत्कप्रभावेऽद्भुते,
विश्रामन्त्यणिमादिमा निरुपमाः सर्वा महासिद्धयः ।
नो चेद् विष्टपवाञ्छितार्थघटनव्यङ्ग्ये विभुत्वेऽप्यसा-
वेतां मूर्त्तिमणीयसीमपि तवाऽध्यास्ते समस्तः कथम् ॥ ३

श्रुत्वा देलउलाललाम ! भगवन् नंधादिको...द् (?)
भावि त्वन्महिमैकडिंडिमडमत्कारं जगत्प्राङ्गणे ।
अंधांकैकरचिल्लभानि (?) सुदृशां स्पद्र्धान्नुभानां(?) दिव-
स्त्वामाराद्धुमुपागमन् सुममिषात् तत्[सद्?]गुणप्राप्तये ॥ ४

श्रीनाभेय ! भवाटवीभ्रममहातापच्छिदि त्वद्वपुः-
कुण्डे मानवदेवदानवगणैर्नेत्राम्बुजार्घ्यं जलम् ।
लावण्यामृतसञ्चयः प्रतिकलं पेपीयमानोऽपि नो
यत् क्षीयेत तदत्र चित्रकलता नूनं जटा जृम्भते ॥ ५

कुर्युः कर्मसमग्रमुग्रमनिशं मिथ्यादृशो दर्शनि-
श्राद्धर्षि-क्षपकादयस्तनु तनु तेभ्यः क्रमाद् यावता ।
सिद्धाः कर्ममुचः प्रभुः स च नयः स्यात् कर्मकृत् तद् ध्रुवं,
यावान् जन्तुषु ते मते परिचयस्तावान् प्रभुत्वोदयः ॥ ६

ध्यातारस्तव यद् भवन्ति सपदि छत्रस्फुरच्चामर-
श्रेणीहेममहासनादिमहिमारूढाः किमेतन्नवम् ।
यत्तेषामधिचित्तभूमि समवासार्षीः प्रभुस्तस्य च,
छत्राद्यन्वयि सन्ततं जिनपतेः स्युः प्रातिहार्याणि यत् ॥ ७

सान्द्रानन्दरसप्रणम्रशिरसः स्व-र्भू-र्भुवो भाविनो,
जातास्त्वच्चरणारुणांशुनिचयैः श्राक् ताम्रचूडाः समे ।
यज्जल्पन्ति च ते तदा तव नुतिं तत् सूचयन्ति ध्रुवं,
मिथ्याभावविभावरीविरमणान्मुक्तिप्रभातागमम् ॥ ८

पद्माभां दृशमन्धतां विबुधतां जाड्यं जगज्जैत्रतां,
दैन्यं चेति नवं नवं बहुविधं भक्तेतरेषु क्रमात् ।
तन्वाने भवतो महिम्नि विमदः प्राच्यस्वसर्गच्छिदा-
लज्जातो विजयाय नाभिकुहरे धाता हरेर्ल्लीनवान् ॥ ९

युक्तं निष्प्रतिमप्रभावभवनस्नात्रोदकं तावकं,
सद्यः सिद्धरमत्वमेति दधते यद् धातवोऽस्य ह्(द्रु?)तम् ।
स्पर्शेणा(ना)ऽपि सुवर्णतां तनुमतां कृष्णादिरूपा अपि,
स्वामिन् ! किन्तु नवं भवन्ति यदि नो मुक्तामया अप्यमी ॥१०

संसारार्णवलङ्घनक्षममहापक्षोऽन्तरायस्फुरद्-
व्यालालीकवलीकृतेरविकलत्रैलोक्यरक्षाऽभयः ।

युक्तं काश्यपगोत्रगौरव ! परस्त्वं [स्वर्ण]कायः परं
चित्रं यत्पुरुषोत्तमैर्निजहृदाऽऽमोदासदाप्यूहसे ॥ ११

यद्यप्यस्त्यधुनातमाऽत्र नितमामुद्यत्तमा दुःषमा,
निद्रान्ति स्म चयात्मिका अपि मणीमन्त्रौषधद्धर्यादयः ।
हंहो ! विघ्नमलिम्लुचाश्चरत मा स्वैरं तथाऽपि प्रभु-
र्यज्जागर्ति युगादिदेव ! महिमा युष्माकमूष्मापहः ॥ १२

ध्यानोद्दामबलेन सौवचरणप्रासादमुद्राद्रुहौ,
रागद्वेषमहाद्रुमौ द्रुतमपि प्रोन्मूल्य यौ मूलतः ।
शक्तिं तच्छिदमिच्छतां तनुमतां ज्ञीप्सुर्न्यधादंसयोः,
स्पष्टं त्वत्कजटाजटाकपटतः कष्टं स भिन्द्यात् विभुः ॥ १३

यावत्केवललक्ष्मिपक्ष्मलदृशां स्वीकर्तुमुत्कण्ठितो,
राधावेधमिवैष साधयति ते ध्यानं महानन्दभाक् ।
एनं बाल्यकुमित्रवत् स्मरसुखास्तावत्क्षणात् क्षोभय-
न्त्यध्यक्षं किमुपेक्षसे तत इमान् कारुण्यभूस्त्वं प्रभुः ॥ १४

किं रुष्टा ? वद, दृ(दु?)ष्ट पृच्छसि नु किं मूर्ध्ना सपत्नीं वहन् ?
मा लोकोक्तिषु देहि देवि ! हृदयं देल्लुल(ल्ल?)के यत्प्रभोः ।
स्नात्राम्भस्तदिदं समस्तसुखदं दध्वं तदाम्ये(मेऽ)प्यदः,
श्रुत्वेतीशसतीवचस्त्वयि न कः शैवोऽपि सेवोत्सुकः ? ॥१५

विश्वस्याऽप्युपकारकारणतया षड्दर्शनीवादिनः,
सर्वे देलउलापुरे भगवतो भक्तौ विवादं जहुः ।
तेषामत्र मुदा सदाऽपि युगपद् यात्रार्थमागच्छतां,
नेतुः स्नात्रविधावहंप्रथमिकारूपस्त्रयं(स्त्वयं) दुस्तरः ॥ १६

हे रोषप्रमुखद्विषः ! स्मृतिपथं प्राप्या कथा जाम्बुकी,
सूत्रे भाविनि मा पुनर्विशत नः प्राग्वद् विशङ्कं हृदि ।
नो चेद् वः क्षितिरुद् भविष्यति यतो जागर्ति तत्राऽधुना,
देवो युष्मदमन्दवृन्दकदलीकन्दैकदावानलः ॥ १७

मन्ये त्वच्चरणारविन्दयुगलस्याऽऽलिङ्गिभिः काञ्चना-
म्भोजैर्नित्यनवत्वधारिभिरिदं चेतस्विनां सूच्यते ।
यस्या (येऽस्य) प्रास्तजरं पदं प्रददतः सेवारसे व्यापृताः
स्युस्तेषां न इव प्रणष्टजरसां नित्यं नवत्वस्थितिः ॥ १८

शक्तः सैव वरप्रदेश उचितं शोषाय दोषाम्बुधेः,
सर्वासां समयः स एष समयः सम्पद्वधूनां युतौ ।
मित्रत्वं च रवेरवैमि दिवसे तत्रैव सत्पात्रयं (?)
ये दध्युः सहकारितां मम चिराशास्ये प्रभुप्रेक्षणे ॥ १९

त्वद्धर्मागममर्मवर्मघटनाभाजां भिदि प्राणिनां,
प्रत्यूहाः प्रभवन्ति नाऽन्यस(म?)तिनां पुंसां किमत्राऽद्भुतम् ।
त्वन्नामाऽपि रमापिकप्रणयिनी माकन्दमानन्दतः
सत्त्वानां जपतां न ते हि निकटेऽप्यायान्ति दिव्या अपि ॥२०

स्वाज्ञाछत्रतले निवेश्य विपुले मुक्ताकलापोज्ज्वलैः,
संस्नाप्य प्रसरन्निजानणुचराः क्षीराब्धिनीरोच्चयैः ।
चण्डालः कलिकाल एष निखिलक्ष्मापालमालाधुरि-
ख्यातेनाऽद्य युगद्विजस्य भवता पङ्क्ताविहाऽध्यासितः ॥ २१

श्रीमद्देलउलावतंस ! वृषभ ! स्वः कुम्भ-रत्न-द्रुमा-
द्या द्राघष्टनयाशयाद्यदि परं भिन्नार्थतां बिभ्रति ।

इत्थं ये विदुरा न तेऽत्र विदुरावाञ्छावृषस्तत्परं
श्रेयश्चाऽऽदिमनामतोऽपि हि परैर्वाञ्छाऽपि नाऽर्थैरपि ॥ २२

भ्रामं भ्रामं निकामं कपिचपलतया यत्तदोकः सुलोके,
श्रान्तेव प्राच्यमुच्चैः क्षमयितुमिव वा स्वाङ्गजस्याऽपराधम् ।
प्रायश्चित्तार्थिनीव क्वचिदपि यदि वाऽपायहेतुत्वभावा-
न्नित्यं लक्ष्मीर्यदंह्री शरणमरचयत् स श्रिये नाभिभूर्वः ॥ २३

(स्रग्धरा)

दैन्योक्त्या रोहणाद्रिः खरमुखरतरं पुष्करावर्त्तमेघा,
वृक्षा वेलाविलम्बात् परिणतिविरसं चापि भद्रा गजेन्द्राः ।
व्यामोहाद्यैश्च किञ्चित् सुरभिसुरमुखा वाञ्छितानि प्रयच्छ-
न्त्येतैर्भावैर्विना त्वं सदखिलफलदः कीर्त्यसे केन तुल्यः ॥२३

उच्चै राज्यादिदानात् कलिकलुषमलक्षालनात् तामसाना-
मुच्छेदाद् विघ्नभेदात् त्रिदशपतिकरस्पर्शनाद्दर्शनस्य ।
हेतुत्वात् सस्यसूर्याद्युदयफलपदस्वर्जनज्ञानभूत्त्वा-
द्धत्ते नाभेयदेव ! प्रभुपदयुगलीगौरवं गौरवे हे ॥ २४

एवं श्रीगुरुसोमसुन्दरगुणस्तोमप्रशस्तो मया,
भक्त्या श्रीमुनिसुन्दरत्वसुलभध्यानः किमप्यानुतः ।
श्रेयः श्रीजयचन्द्रचारुयशसां दाता भवेन्मे सदा,
पुष्याद्देलउलावतंसऋषभः सद्बोधिलाभोदयम् ॥(शा.वि.)२५

पू.आ. श्री माणिक्यसुन्दरसूरिविरचितः

## ५०. ॥ श्रीऋषभदेवसिंहावलोकस्तवः ॥

(वंशस्थ)

मनो हरन्तं जगतो निरन्तरं, निरन्तरङ्गारिभयं स्वभावतः ।
स्वभावतः स्वर्गसदानतं सदा-
नतं सदाभं वृषभं स्तुते न कः ? ॥ १

स्तुतेन कः सर्वविदा सुधी रतः, सुधीर तत्त्वे रमते न सादरम्।
न सादरङ्कः कुरुते कलङ्किनं,
कलङ्किनं तस्य मनोनिशाकरम् ॥ २

निशा करण्डस्तमसां न वासरो, नवा सरोजे कमला मला यतः।
मलाय तत् किं रमते परे मते,
परे मतेरीश ! मनो निशायिते ॥ ३

निशायिते मोहभटे स्मरेहते, स्मरे हते कश्चतुरो भवानलम् ।
भवानलं यच्छतु तं शिवालयं,
शिवा लयं यत्र सुखावली गता ॥ ४

वलीगतायद्विलसन्महाभवान्,
महाभवान्मामव वारणादिव ।
रणादिव प्रेष्यमिमं विना त्वया-
विना त्वयादास्न स केन वार्यताम् ? ॥ ५

नवाऽर्यतां भक्तिरमा मनोरमा,
मनो रमाऽऽदौ कुरु मित्र ! पावनम् ।
त्रपावनं ह्येनमकम्प ! नायकं,
पनाय कण्ठे विलुठन्महास्तवः ॥ ६

महास्तव स्युश्चिरकम्प्रसादतः, प्रसादतस्त्रस्तपराभवा नवाः ।
भवानवाप्तो यदनेन साम्प्रतं,
न साम्प्रतं दुःखकथादि शङ्कर ! ॥ ७

दिशं करश्रीकलितां दिवाकरो, दिवा करोत्येकत एव शावकः।
वशावक ! त्वं कलयन् स केवलं,
सकेवलं भासयसे जगत्त्रयम् ॥ ८

जगत्त्र ! यं पश्यसि भूरिभावना-
रिभावनाशैकविलासवत्सलः ।
स वत्स-लक्ष्मीकुशलैः समं ततः,
समन्ततः स्वं समयं नयत्यलम् ॥ ९

न यत्यलङ्कारकलाविभूषितं,
विभूषितं किन्तु वचोऽममाऽनिशम् ।
ममाऽनिशं तेन महामहोदयं, महोदयं संभवतान्मनोहरम् ॥१०

(कलशः)

पूज्यश्रीजयशेखरस्य सुगुरोः प्रौढप्रसादान्मया
माणिक्योत्तरसुन्दरेण विहितः सिंहावलोकस्तवः ।
देवश्री ऋषभस्य तस्य पठने प्रीतिं परां तन्वतां
भव्यानां भवतु प्रसन्नमनसां माङ्गल्यलक्ष्मीः सदा ॥ ११

(शार्दूलविक्रीडित)

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

# ५१. ॥ श्रीआदिनाथस्तुतिः ॥

(तोटक)

सुखकारणमुत्तमभं ऋषभं ऋषभाङ्कितपादपयोजयुगम् ।
युगमानभुजं नृपनाभिभवं भवसागरतारणपोतनिभम् ॥ १

निभभूधरभेदनजम्भरिपुं रिपुरोगरणादिकभीतिहरम् ।
हरमुत्कटमारतिरस्करणे करणेन्दुकलातमसं सकलम् ॥ २

कलकाञ्चनदेहरुचिं रुचिरं चिरसंचितपापविनाशकरम् ।
करपादविनिर्जितकोकनदं नदतुल्यगुणोदकपूर्णमलम् ॥ ३

मलयानिलशीतलशांतरसं रसनागुणरञ्जितसर्वजनम् ।
जननीजनकोपमितं जगतो जगतोऽधिकमाधिवने सततम् ॥४

सततादिचतुर्विधतूर्यरवं लवसप्तमदेवमनोनमनम् ।
नमनोत्तरपृच्छविहीतफलं लयसंगमलीनमनःपवनम् ॥ ५

पवनाम्बुशिखिक्षितिचारिदयो-दयभाजनमेजनतारहितम् ।
हितहेतुसुदर्शितभावशतं शतपञ्चधनुस्तनुमानधरम् ॥ ६

धरणीसमसर्वसहत्वगुणं गुणभूमकलाशशिनं शमिनम् ।
शमिनन्दिकरं नरनाथसुरा-सुरवन्द्यमहं तु भजामि जिनम् ॥७

इत्थं प्रथमजिनेन्द्रो जालोरपुरप्रतिष्ठितः स्तिमितः ।
शं विदधातु जनानां सदा स्तुतः पार्श्वचन्द्रेण ॥ (आर्या) ८

पू.पं. श्री नयविजयकृतम् (?)

## ५२. ॥ श्रीऋषभदेवस्तोत्रम् ॥

(युष्मदस्मच्छब्दसप्तविभक्तिवचनत्रयरूपगर्भितम्)

(शार्दूलविक्रीडित)

श्रेयःश्रीविहिताश्रयं श्रितजनाभीष्टार्थसम्पादकं
नम्रानेकनरेन्द्रमौलिमुकुटालङ्कारचूडामणिम् ।
श्रीमन्नाभिनरेशवंशतिलकं कष्टेभकण्ठीरवं
स्तोष्ये कोविदकोटिसंस्तुतगुणं देवं युगादिप्रभुम् ॥ १

जीयास्त्वं भगवन् ! सुरेन्द्रनिवहस्त्वां सेवतेऽहर्निशं
त्रैलोक्यं सकलं त्वया जिनपते ! पूतं च तुभ्यं नमः ।
त्वद् दोषाः प्रगतास्तवैव शुभदं गोत्रं स्मरामि त्वयि
ज्ञानं स्फूर्त्तिकरं विभाति दुरितध्वान्तप्रमाथोष्णरुक् ॥ २

हस्तौ पूजयतं जिनं [वरयतु] श्रेयः सुखश्रीर्युवां
प्राप्ता पुण्यपरम्परा कुशलता भूयाद् युवाभ्यां सदा ।
दुःखानि प्रलयं गतान्यविकलान्येवं युवाभ्यां द्रुतं
जातं जन्म फलेग्रहीह युवयोर्वासं श्रिते धी-श्रियौ ॥ ३

यूयं जातकठोरकर्मनिकरा युष्मान् हनिष्यत्यसौ
युष्माभिर्विदितं नवा जिनपती रुष्टोऽस्ति युष्मभ्यकम् ।
युष्मत् सर्वगुणावलिर्विगलिता युष्माकमल्पा मति-
र्युष्मासु प्रथिता प्रवृत्तिरतुला सर्वापि य(ज)ज्ञे मुधा ॥ ४

अहं स्तुवे मां जिन ! तारयस्व, मया श्रितस्त्वं सुखमाशु मह्यम्।
प्रदेहि, मद् दोषगणो विलीनो,
ममाऽधिपस्त्वं मयि सद्दयावान् ॥ (उपेन्द्रवज्रा) ५

आवामत्र नि[र]र्थकौ तुदति च प्रीतिश्च ता पूर्वजा (?)-
त्वावाभ्यां नितरां प्रकुप्यति फलं प्राप्तं सुकष्टावहम् ।
तुष्टिः पुष्टिमतीह नो बत बलं मोघीभवत्यावयोः
संचिन्त्येति विभो ! गतौ गतमदौ त्वत् क्रोध-मानाविमौ ॥ ६

भक्त्या संविनुमो वयं प्रभुमथाऽस्माँस्तारयाशु प्रभो !-
ऽस्माभिस्त्वत्क्रमसेविता विरचिताऽस्मभ्यं स्वकां देहि गाम् ।
अस्मत् संहर कल्मषं जिनवराऽस्माकं त्वमेव प्रभु-
र्भक्तेषु प्रकुरुष्व देव ! करुणामस्मासु विश्वोत्तम ! ॥ ७

इत्थं तारितमां जिनेश ! विनुवे त्वामाश्रितत्वां मुदा
पाया मां भवतस्त्वमीश ! विनुतत्वां संता(सेविता ?)हं जवात्।
भूयात्ते भविकावलिर्वरतरा सद्भक्तमह्यं प्रभो !
भक्ताराधिततुभ्यमश्नुवि नयात् सौम्यं शिवं देहि मे ॥ ८

पू.उपा.श्री यशोविजयविरचितम्

## ५३. ॥ श्रीआदिनाथस्तवनम् ॥

आदिजिनं वन्दे गुणसदनं, सदनन्ताऽमलबोधं रे ।
बोधकतागुणविस्तृतकीर्तिं, कीर्तितपथमविरोधं रे ॥आदि० १

रोधरहितविस्फुरदुपयोगं, योगं दधतमभङ्गं रे ।
भङ्गनयव्रजपेशलवाचं, वाचंयमसुखसङ्गं रे ॥ आदि० २

सङ्गतपदशुचिवचनतरङ्गं, रङ्गं जगति ददानं रे ।
दानसुरद्रुममञ्जुलहृदयं, हृदयङ्गमगुणभानं रे ॥ आदि० ३

भाऽऽनन्दितसुरवरपुन्नागं, नागरमानसहंसं रे ।
हंसगतिं पञ्चमगतिवासं, वासवविहिताशंसं रे ॥ आदि० ४

शंसन्तं पदवचनमनवमं, नवमङ्गलदातारं रे ।
तारस्वरमघघनपवमानं, मानसुभटजेतारं रे ॥ आदि० ५

इत्थं स्तुतः प्रथमतीर्थपतिः प्रमोदा-
च्छ्रीमद्यशोविजयवाचकपुङ्गवेन ।
श्रीपुण्डरीकगिरिराजविराजमानो,
मानोन्मुखानि वितनोतु सतां सुखानि ॥ (वसन्ततिलका) ६

पू.उपा. श्री यशोविजयगणिविरचितम्

## ५४. ॥ श्रीनाभेयजिनस्तवनम् ॥

श्रीविमलाचलमंडण गतदूषण ए
त्रिभुवनपावन देव जय जय विश्वपते ! ।
नाभितनय नयसुन्दरू(र) गुणमन्दिर ए
सुरनरनिर्मितसेव जय जय विश्वपते ॥ १

आदितीर्थसन्दर्शन शुचिदर्शन ए
प्रकटितशिवकैलाश जय जय विश्वपते ! ।
युगलाधर्मनिवारक भवतारक ए
भववारक भवनाश जय जय विश्वपते ! ॥ २

केवलकमलानायक सुखदायक ए
स्मरसायकहररूप जय विश्वपते ।
अङ्गलगितसमसाधन गतिबाधन ए
स्थगितमहाभवकूप जय जय विश्वपते ॥ ३

क्रोधकंसगरुडासन वृषभासन ए
वृषलञ्छन जिनचन्द्र जय विश्वपते ।

अविकलकरुणासागर नतनागर ए
दुरितविनाशवितन्द्र जय जय विश्वपते ॥ ४

मायापञ्जरभञ्जन जनरञ्जन ए
सहजनिरञ्जनमुद्र जय विश्वपते ।
कर्मजालशतशातन हतयातन ए
शोभासिन्धु-समुद्र जय जय विश्वपते ॥ ५

इन्द्रैर्युगमहितक्रम बहुविक्रम ए
गुणसंक्रम गुणपात्र जय जय विश्वपते ।
मोदितसकलसभाजन गुणभाजन ए
सकलतीर्थमयगात्र जय जय विश्वपते ॥ ६

विजितमोहभटसंगर शुचिसंगर ए
भङ्गरहित हितशील जय जय विश्वपते ।
सुललितसिद्धिवधूवर वरसंवर ए
प्रोल्लसदतिशयलील जय जय विश्वपते ॥ ७

लीलालब्धि(ब्ध?) महोदय सुमहोदय ए
मोदय मामपि देव जय विश्वपते ।
कुरु वासं विशदे मम धृतसंवर ए
मनसि निरन्तरमेव जय जय विश्वपते ॥ ८

इत्थं श्री नाभिसूनुविमलगिरिशिरः स्फारशृङ्गारमूर्त्ति (मूर्त्तिः(र्त्तः?)
पुण्यैकराशिस्त्रिभुवनजनि(न?) तानन्दकन्दायमानः ।
नूतः पूताशय श्री (यः श्री?) नयविजयगुरुत्तंसशिष्येण दत्ताद्
भव्यानां विश्वभर्त्ता स जयनययशः पुण्यकल्याणलीलाम् ॥१

पू.उपा.श्री विनयविजयविरचितम्

अकब्बरपुरमण्डन-

## ५५. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

श्रीमरुदेवातनुजन्मानं मानवरत्नमुदारं रे ।
दारैः सह हरिभिः कृतसेवं, सेवकजनसुखकारं रे ॥ १

कारणगन्धमृतेऽपि जनानां, नानासुखदातारं रे ।
तारस्वररसजितपरपुष्टं, पुष्टशमाकूपारं रे ॥ २

पारङ्गतमिह जन्मपयोधे र्योधैर्हितगुणधीरं रे ।
धीरसमूहैः संस्तुतचरणं, चरणमहीरुहकीरं रे ॥ ३

कीरयशं यशसा जित-चन्द्रं, चन्द्राऽमलगुण-वासं रे ।
वासवहृदयकजाऽहिमपादं, पादपमिव सच्छायं रे ॥ ४

सच्छायाकब्बरपुरधरणी-धरणीधवमिव कामं रे ।
कामं नमत सुलक्षणनाभिं, नाभितनुजमुद्दामं रे ॥ ५

(शार्दूलविक्रीडितम्)
इत्थं तीर्थपतिः स्तुतः शतमखश्रेणीश्रितः श्रीनदी-
जीमूतोद्धुतभाग्यसेवधिरधिक्षिप्तः समग्रैर्गुणैः ।
श्रीमन्नाभिनरेन्द्रवंशकमला-केतु-र्भवाम्भोनिधौ-
सेतुः श्रीवृषभो ददातु विनयं, स्वीयं सदा वाञ्छितम् ॥ ६

पू.उपा.श्री स्वरूपचन्दकृता

## ५६. ॥ श्रीआदिजिनस्तुतिलहरी ॥

श्रीमदर्हं जिनं नत्वा ध्यात्वा सद्गुरुपत्कजे ।
शत्रुञ्जयगिरीन्द्रस्य लहरी वर्ण्यते मया ॥ १

(शिखरिणी)

त्वदीयं वन्देऽहं प्रथमजिनपादाब्जयुगलं
स्वयं श्रीसिद्धाद्रौ नवनवतिपूर्वागतमिदम् ।
वरे तुङ्गे शृङ्गे विमलगिरिराजस्य वितते,
त्रिलोके तीर्थानामधिपतितरस्याद्भुतनिधेः ॥ २

अहो नाभेः सूनो तव मुखकजाद्धर्ममशृणोत्,
स(श)ते पुत्रश्चक्री विमलगिरियात्रां च कृतवान् ।
समाहूयादेशाद्भरतनृपतिस्सङ्घनिकरान्,
चतुर्धा सम्मिल्य स्मित भुवि चरन् शैलमगमत् ॥ ३

गिरेरासन्नेऽसौ मणिजलजपुञ्जान् विकिरयन्,
समारोहच्छ्राद्धैर्गणधरसुयोगैः परिवृतः ।
स्तुवन् नानासिद्धान् सुरगणवरान् सम्मतिकरान्
यथार्च्यान् सन्तुष्यन् कुसुमफलतोयैः स्थितवतः ॥ ४

तथा स्थाने स्थाने जलभृतवतः कुण्डनिवहान्,
तरुन् शाखावृन्दान् वरनवगृहाण्यध्वनि रचन् ।
महातीर्थे स्वामिन् ! तव चरण चित्तस्सुमतिमान्,
सुमार्गान् सिद्धाद्रौ द्रवणनिकरैः सो हि कृतवान् ॥ ५

सुपर्वाद्रेः(?) शृङ्गे गत-जिनवरांह्र्यब्जयुगलं
प्रणम्यार्थी भक्तेर्नतविबुध-क्षीरण्यधितले ।

सुगन्धैः स्वर्णाब्जैः कुसुमफलदीपादिविधिभिः,
समर्च्योचे स्नात्रं सकलभवभाजां हितकरम् ॥ ६

तदा श्रीसिद्धाद्रौ जिनभुवनमप्यस्ति न वरं,
विगम्य स्वामिन् ! हे भरतनृपतिश्चैत्यमतनोत् ।
महादीर्घस्थम्भं मणिखचितमष्टापदभवं,
त्वदीयाऽस्मिन् मूर्तिर्वरमणि भृ(कृ)ता तेन निदधे ॥ ७

सुरत्नैः प्राकाम्यौ भुवनशिखरे दण्डकलशौ,
यथा योग्ये स्थाने त्रिदशनिचया नाटकधराः ।
सुघोषाघण्टास्मिन् रविशशिरुचो रत्नकलशाः,
सुदीप्ताः शोभन्ते वरमणिभवास्तोरणगणाः ॥ ८

दिशासु व्याप्ताभं परिमलगुणाप्तालिनिवहैः,
सशब्दं वादितैर्जिनगुणयुतालापविहितैः ।
अपूर्वं तं दृष्ट्वा विपुलमतयः संदिदिहिरे,
घने विद्युत्तुल्यं रुचिररुचिपुञ्जोऽथ किमयम् ॥ ९

विधूम्राग्निः किं वा त्रिदशभुवनं किं रविरयं,
सुधीलोकाः शङ्काकुलमनस आदीश्वरज(जि)न ।
न चाग्निः शीतत्वान्न नरविहितान्निर्जरगृहं,
न भानुर्भूमिस्थादृषभजिनचैत्यं स्म विविदुः ॥ १०

अहो श्रीनाभेय प्रथम इह चक्री तव सुतः
स धन्योऽस्मिल्लोके भविशरणशत्रुञ्जयगिरौ ।
नवीनोद्वा(द्धा)रं यं सफलमिह नृत्वं च कृतवान्,
स सङ्घेशः ख्यातः प्रणमति जिनोऽयं सुकृतिनम् ॥ ११

इमं धन्या रम्या भरतनृपतिं वीक्ष्य भविकाः,
तथा कर्तुं तैस्तैर्मनसि विहितेच्छा बहुतरा ।
यथाशक्त्याप्येके गिरिशिरसि चैत्यानि निकटे,
विरेचुः शृङ्गेषु प्रमुदितहृदस्त्यक्तविषयाः ॥ १२

जिनान्द्र्यप्येकेऽद्रौ वरजिनपमूर्तिं निदिधिरे,
वरां भक्तिं चक्रुः कलुषदलिनीं केऽपि सुतराम् ।
तथाप्येके भेजुः परमपदमालां मणिभवां,
जगुर्गानं केचिज्जिनगुणयुतं रागरमणम् ॥ १३

वितेरुः पात्रेभ्यो द्रवणनिकरं केऽपि मनुजाः,
ददुः केचिद्दक्षा उचितमनसा वस्त्रनिचयान् ।
मनोज्ञैर्मिष्टान्नैः प्रवरभविकान् केऽपि पुपुषुः
सधर्मिभ्यो नृभ्यः प्रगुणरचितं भोजनमदुः ॥ १४

शुभैर्द्रव्यैः केऽर्चामहनि विदधुः सप्तदशधा
प्रभोर्मूर्त्यग्रेऽन्ये बभणुरनिशं स्तोत्रमनघम् ।
सघोषैर्वादित्रैः ननृतुरनघाः केऽपि मनुजा-,
स्तथान्ये मत्तुल्यां जय जय इति प्रोचुरधियः ॥ १५

विमुच्य क्रोधादीन् सरलहृदयास्तस्थु(र्) ऋषयो,
महारागद्वेषान् मुमुचुरपवर्गाय कृतिनः ।
पदैः श्लाघ्यैर्काव्यैर्ग्रथितगुणवृन्दैश्च नुनुचुः
स्थिरस्वान्ता दध्रुर्हृदिजिनवराकारमखिलम् ॥ १६

भवोद्विग्ना मर्त्या अनशनमिदं केऽपि विदधु-,
र्विगम्योत्कृष्टोर्व्वीं(?)दृषदि निजगाचा(?)णिविजहुः ।

अनन्तं ज्ञानार्थं भवजलधिपाराय यतयो,
मतिं स्वस्थां कृत्वा विजितकरणा ध्यानमलगन् ॥ १७

अनन्ताः सिद्धिं वै दृषदि दृषदिता मुनिवराः,
अतः सिद्धक्षेत्रोऽयमिह कथितोऽर्हद्भिरवनौ ।
विदेहादिक्षेत्रे विमलगिरिमाहात्म्यमतुलं
निजानन्दैराप्तैर्भविजनसभायां प्रबभणे ॥ १८

सुमेरुं जेतायं विमलशिखरी तीर्थतिलको,
महातुङ्गैः शृङ्गैर्नभसि मिलितो घोज्झितकरः ।
विजेतुं न प्रौढाः विमलगिरिमन्ये हि गिरयः,
किमेते भूभारा विततपतयस्तीर्थविरहाः ॥ १९

अहोऽन्ये किं तीर्था विमलगिरिराजे सति तथा,
वरै रुच्चैः शृङ्गैर्लसति गिरिरष्टोत्तरशतैः ।
विमुच्यैनं तीर्थं भ्रमति वसुधायामधिषणः,
सवाच्यः शास्त्रज्ञैः प्रहतकलुषः शाश्वतगिरिः ॥ २०

वरालक्षाझारी सुरनरगणैरीडितवती,
गिरावम्भः पूर्णाचलनतटिका सिद्धशिलका ।
कदम्बाख्यो हस्ताभिध इति गिरिर्भाडवगिरि,
गुहागुप्तद्वारामणिगणभृता पश्चिमदिशि ॥ २१

वरापूर्णा तोयैर्भविजनगणान् पावनकरी,
गिरेरासन्नासौ विमलगिरिनद्युल्लसितिका ।
हिमाद्रेः सामीप्यात्त्रिदशवहनीवाम्बुनिचया,
समा शोभन्ते सा जिनचरणसेवार्थमनिशम् ॥ २२

रसानां कूप्योऽस्मिन् वरनवरसा हेमकृतयो,
महौ बध्यो(द्ध?)मूल्यो विविधविषहन्त्र्यो गदहराः ।
किमेतस्योग्रत्वं प्रबलमतयो वक्तुमलसा,
बभूवुः प्राचुर्यात्त्रिजगति समोप्यस्य न हि कः ॥ २३

सुधूपैर्धूम्राभः सितपटबकाल्याः छविकरः,
तडिद्रत्नैर्ज्योतिर्भृतकलशधारो दिशि दिशि ।
सुघोषो गर्जोस्मिन् सुरनरकृतैर्दुन्दुभिरवै,-
रसौ किं सिद्धाद्रिः किमुत जलदोशं(घं?) भुवि दिशः ॥ २४

अयं धन्यो रम्यो गिरिरवति पापाद्भविजना-
निमं दृष्टारस्ते दलितकलुषा मोदनिवहाः ।
न सो दृष्टो यैस्ते जिनपमनुजामातुरुदरे
लुठन्त्यद्याप्येते ह्यघतररसायां खरसमाः ॥ २५

अहो श्रीआदीश स्वगृहनिवसन्तोऽपि भविकाः,
नमिं ये कुर्वन्ति सुरगिरिदिशां वीक्ष्य शिरसा ।
नरेन्द्रैर्नागेन्द्रैस्त्रिदशपतिभिर्वन्दितुमलं,
सदार्हास्ते सन्तः सदसि रमणा बुद्धिनिधयः ॥ २६

गिरावारोहेच्छां भवजलधिभाजां समुदितां,
कषायैर्भक्तुं यामभिलषति चालस्यमतुलम् ।
तदालस्यं त्यक्त्वा विहरति गिरिं द्रष्टुममलं,
नरः प्राप्नोत्येतां विषयदलिनीं श्रीप्रभुकृपाम् ॥ २७

फलानन्त्यं भक्तेर्विमलगिरियात्रां विहितवान्,
नरः को विस्मृत्याभिलषति सुरेन्द्रादिपदवीम् ।

सुलभ्यास्याद्या सा विशरणतयात्यन्तविकला,
सुखानां सप्तत्वं तदपि हि भवेत्कात्र गणना ॥ २८

यथारीत्योद्धारान् भविजनकृतानाहुरनया,
बहून् ज्ञातारो वै प्रथमजिन हे षोडशवराः ।
इमांस्तान् वक्ष्येऽहं वरसुरगिरा शुद्धकलया,
प्रसिद्धैर्भव्यैस्तैस्सुजननतरैर्वा कृतवतः ॥ २९

(अनुष्टुप्)

अथोद्धारान् प्रवक्ष्यामि पुण्डरीकाभिधे गिरौ ।
द्विषट् परिषत् संयुक्तं सङ्घसम्मील्य चाद्भुतम् ॥ ३०

कृतश्चाडम्बरेणाद्यं उद्धार आदिचक्रिणा
दण्डवीर्यकृतोद्धारो द्वितीयस्संप्रकीर्त्तितः

...............................................

भुवनानां यतीन्द्रेण उद्धारः षष्ठ एव च ॥ ३१

सप्तमः श्रीसिद्धाद्रौ कृतः सगरचक्रिणा ।
अभिनन्दनोपदेशाद् व्यन्तरेणेन्द्रेण चाष्टमः ॥ ३२

श्रीचन्द्रप्रभपौत्रश्च चन्द्रशेखरनन्दनः ।
श्रीचन्द्रजसराजासौ नवमं कृतवान् गुणी ॥ ३३

दशमं शान्तिनाथस्या-देशाच्चक्रधरो व्यधात् ।
एकादशं वरोद्धारं मुनिसुव्रतशासने ॥ ३४

रामचन्द्रो जगत्ख्यातोऽकरोत् दशरथात्मजः ।
चतुर्धा सङ्घमाकर्ण्य यात्रां कृत्वा च पाण्डवाः ॥ ३५

उद्धारं द्वादशं चैत्यबिम्बानामकरोद् गिरौ ।
प्राग्वाटो जावडाख्यश्च सिद्धशैले त्रयोदशम् ॥ ३६

कुमारपालसचिवः श्रीमालीवाग्भटो महान् ।
जैनी श्रीगुरुभक्तश्चाऽकरोद्विद्वान् चतुर्दशम् ॥ ३७

पञ्चदशं तु श्राद्धोऽसावकरोत्समराभिधः ।
कर्माभिधकृतोद्धारः सम्मतः सर्व्वसूरिभिः ॥ ३८

षोडशो वर्तते काले सम्प्रति पञ्चमारके ।
शत्रुञ्जयगिरीन्द्रस्य महात्म्ये गणना कृता ॥ ३९

महान्तः षोडशख्याताः क्षुद्रोद्धारा अनेकशः ।
सप्तदशो महोद्धारो भविष्यति पुनर्गिरौ ॥ ४०

प्रातरुत्थाय येनेयं पठ्यते लहरी मुदा ।
भवे भवे भवे(त्?) तेषां ज्ञानलक्ष्मीश्च मङ्गलम् ॥ ४१

इयं रम्या लोके विमलगिरितीर्थस्य लहरी
वरा भक्त्युल्लासात् भव भयहरी पापदलिनी ।
महोपाध्यायश्रीवरहितमुदामंह्रिरसकः
सरूपेन्दुर्विद्वान् खरतरगणे तेन विहिता ॥ (शिखरिणी) ४२

भक्तिर्ज्ञानप्रदा नित्यं भक्तिर्मोक्षं प्रयच्छति ।
सर्वसिद्धिकरि भक्तिः कुर्यात् भक्तिः सुमङ्गलम् ॥(अनु.) ४३

प्रीतोस्तु श्रीपरमात्मा आदीशः प्रणवान्वितः ।
मायावाक्कामराजाढ्यो नमस्ते सर्वसिद्धये ॥ (अनु.) ४४

पू.गणिवरश्री जयचन्द्रेणविरचिता
श्रीसिद्धाचलतीर्थराजमण्डन-

## ५७. ॥ श्रीआदिनाथस्तुतिः ॥

सकलशारदचन्द्रनिभाननं,
विमलमङ्गलवल्लिघनाघनम् ।
घनतमोभरभेदनतापनं,
विमलपर्वतमस्तकमण्डनम् ॥ (द्रुतविलम्बित) १

वन्दे सदा गतदरं दरगं मुदारं,
संसारचारभरतारणनौप्रकारम् ।
रामाङ्गरागवररङ्गविरागतारं,
मारप्रदारणपरं परमं प्रचारम् ॥ (वसंततिलका) २

नयविनयविशालं शालिशीलेन्दिरालं,
क्षयकृतभवजालं निर्मलस्फारभालम् ।
द्विरदसमसुचालं मोहवल्लीकुठारं,
कठिनमदनकालं कालभीतिक्षयालम् ॥(त्रिभि.) (मालिनी) ३

सदाचारविस्तारसिद्धान्तकर्ता,
तमोभारदौर्भाग्यसन्दोहहर्ता ।
श्रिये स्ताज्जिनेशो युगादेर्विधाता
जनानां सदानन्दकल्पद्रुदाता ॥ (भुजङ्गप्रयात) ४

तव नाम सदा जयकारपदं
तव ध्यानमनर्त्तिकरं सुखदम् ।
तव भक्तिभरं गुणिनः स्तवनं
रचयन्ति नरः शुभभक्तिघनम् ॥ (त्रोटक) ५

ते मुक्तिसुखं भव्याः संसाराब्धिमहौघमुत्तीर्य ।
सद्यः कर्मविमुक्ता अनन्तभागं प्रपद्यन्ते ॥ (आर्या) ६

इत्थं शत्रुञ्जयाद्रेरधिपतिरनघो नाभिवंशाब्धिचन्द्रः
श्रीमच्छ्रीआदिनाथःकलिमलमथनः सर्वदा प्राप्तमद्रः ।
श्रीमद्राजेन्दुसूरिक्रमकमलसदासेवनालब्धिशक्ति-
प्राग्भारेण प्रभक्त्या गणिवरजयचन्द्रेण देवः स्तुतोऽसौ ॥ ७
(स्रग्धरा)

पू.मु. श्री देवविजयगणिविरचितम्
विमलनगराधीश-

## ५८. ॥ श्रीआदिनाथस्तवनम् ॥

वृषभजिनवन्दनं शिवपुरीस्यन्दनं,
भविकजननन्दनं वचनजितचन्दनम् ।
परमतरपावनं सुकृतवरभावनं,
परमपदसाधनं कुगतिगतिबाधनम् ॥ १

वृषभजिननायकं सुमतिमतिदायकं,
जितकुसुमसायकं कनकसमकायकम् ।
रुचितरुचिसुन्दरं धीरतामन्दरं,
गतिविजितसिन्धुरं विमलगुणबन्धुरम् ॥ २

कुमतमतगञ्जनं योगिमनरञ्जनं,
दुरिततरुभञ्जनं नयनजितखञ्जनम् ।
तमतिमिरखण्डनं नाभिकुलमण्डनं,
विगतवृजिनं सदा भजत वृषभं जिनम् ॥ ३

देवमणिर्देवगवी देवपादपलता,
फलति रुचिराङ्गणे जलधितनयालता ।
प्रथमजिनगुणगणा मानवाचालतां,
येन विहिता कृता तेन निजसफलता ॥ ४

नाभिधराधववंशविभासन-भासनदिनकरसम ! समतासन ! ।
शायकतत्पर ! देव ! त्वं जय जय ! ॥ ५

रुचिरयशोभरभूषितभूतल ! समुदितशारदसितकरशीतल ! ।
शीतलतावरधाम ! त्वं जय जय ! ॥ ६

कृतनतिकृतिततिसङ्घशिवङ्कर ! भविककदम्बकबोधदिवाकर! ।
करकमलाजितपद्म ! त्वं जय जय ! ॥ ७

विकसितदमनकचम्पककेतक-कुन्दमुकुन्दसरोरुहपूजित ! ।
जितभवभयमदवार ! त्वं जय जय ! ॥ ८

मदनमहाभटसङ्कटवारक ! विनतजनावलिविघ्ननिवारक ! ।
तारकलागुणधाम ! त्वं जय जय ! ॥ ९

गुणमणिरोहणरोहणभूधर ! वदनरमाजितचारुसुधाधर ! ।
नरवरकृतगुणगान ! त्वं जय जय ! ॥ १०

सुविहितसाधुशिरोमणिनतपद ! निरुपमचरितचमत्कृतकोविद! ।
परपदकृतवरवास ! त्वं जय जय ! ॥ ११

कनकमहीधरधीर ! विजितमनोभववीर ! ।
सुरपतिविहितनते ! कृतिततिकृतविनुते ! रे जिन जिन ! ॥१२

प्राप्तभवोदधितीर ! योगिमनस्तरुकीर ! ।
त्रिभुवनभावगुरो ! सूरिवरैकगुरो ! रे जिन जिन ! ॥ १३

विदितयथास्थितभाव ! दूरीकृतसमहाव ! ।
विविधगुणाम्बुनिधे ! सुविहितसाधुविधे ! रे जिन जिन ! ॥१४

विहितसंवत्सरदान ! मानवकृतगुणगान ! ।
परहितपरममुने ! गुणगणरत्नखने ! रे जिन जिन ! ॥ १५

वरमुक्ताफलहारः ललितमनोहरतारः ।
राजति ते हृदये, वृषभविभो ! सदये रे जिन जिन ! ॥ १६

विजितघनाघननाद ! विद्याधरनतपाद ! ।
चिन्तितदेवतरो ! परपदसिद्धिगुरो ! रे जिन जिन ! ॥ १७

जय जय ! जगदानन्द-कारणसुरतरुकन्द ! ।
चम्पकचारुरुचे ! शारदचन्द्रशुचे ! रे जिन जिन ! ॥ १८

करुणारसभृङ्गार ! नाभिकुलैकशृङ्गार ! ।
जय जय ! तीर्थपते ! जितभवभीतिरते ! रे जिन जिन ! ॥१९

परममनोहररूप ! भक्त्या नतवरभूप ! ।
दुरिततमस्तरणे ! वाञ्छितदेवमणे ! रे जिन जिन ! ॥ २०

चर्चितचम्पकदेह ! केवलकमलागेह ! ।
गतिजितदेवकरे ! सुकृतपयोधिहरे ! रे जिन जिन ! ॥ २१

चामीकरकोटीर-रचितमनोहरहार ! ।
नौमि भवन्तमहं, कृतशिवसौख्यमहं रे जिन जिन ! ॥ २२

अमृताशनसुविनीत-चन्द्रमुखीकृतगीत ! ।
भवभवभीतिहृते ! परमानन्दकृते ! रे जिन जिन ! ॥ २३

सुरपतिकृतसुविशाल-रजतकनकमणिमाल ! ।
विलसति ते करणं, कलिमलसंहरणं रे जिन जिन ! ॥ २४

अष्टमीशशिसमभाल ! गतिजितबालमराल ! ।
भविकपयोजरवे ! प्रमुदितसर्वकवे ! रे जिन जिन ! ॥ २५

इत्थं निर्भरभक्तियुक्तमनसा नीतः स्तुतेर्गोचरं,
श्रीमन्नाभिनराधिराजतनयो देवाधिदेवो मुदा ।
श्रेयः श्रीमुनियुक्तियुक्तविजयश्रीवाचकग्रामणी-
शिष्येणाद्भुतसम्पदं प्रतिदिनं देयादभीष्टं सताम् (शा.वि.)२६

पू.पं.श्री जिनमाणिक्यगणिविरचितम्

## ५९. ॥ श्रीयुगादिजिनस्तवनम् ॥

प्रतिपदसरस्वतीशब्दयमकमयं

सदा चिदानन्दनिदानमद्वयं जगत्त्रयीत्राणधुरीणपद्द्वयम् ।
सरस्वतीतुष्टिकृते सरस्वतीपदार्थसार्थैः प्रथमं जिनं स्तुवे ॥१
(वंशस्थ)

(उपन्द्रवज्रा)

सरस्वतीलब्धवरावगाह्ये सरस्वतीवेश ! तव स्तवे स्वाम् ।
सरस्वतीमेष परस्तवैकसरस्वतीर्णामपि तारयामि ॥ २

सरस्वतीमेकलकन्यकास्वःसरस्वतीसिन्धुमुखेषु मज्जन् ।
सरस्वतीष्वर्थयते न शुद्धिं सरस्वतीव स्तवने तवास्तान् ॥ ३

सरस्वतीमेत्य मनोरतीरं सरस्वतीत्यत्रिदशैः प्रभो ! यत् ।
सरस्वतीतेषु दिनेषु दोग्धृसरस्वतीभिः स्नपितोऽसि वार्भिः ॥४

सरस्वतीनाथनिरस्य पाद्मसरस्वतीमम्बुजवासलीलाम् ।
सरस्वतीरुग्भिरुपैत् पदे ते सरस्वतीतार्त्तिरदोऽर्चको यत् ॥ ५

सरस्वतीपङ्क्तिरपि प्रदत्तसरस्वतीदुग्धसुधामुधात्वैः ।
सरस्वतीसद्धवलैः कृता च सरस्वतीर्थोद्भवगायति त्वाम् ॥ ६

सरस्वती पत्रभरैर्हरं मत्सरस्वतीर्थ्ये परिपूज्य पूर्वम् ।
सरस्वती त्वत्कुमुदोपमे वा सरस्वतीवापुषि वादहेतोः ॥ ७

सरस्वती पूजयते मयि त्वं सरस्वतीत्थं तव कर्तृताढ्ये ।
सरस्वतीर्थङ्करकर्मभावं सरस्वतीव प्रकृते तथाऽस्य ॥ ८

सरस्वती यन्नयनेन वीक्ष्य सरस्वतीस्त्वय्यपि दुष्टक्लृप्ता ।
सरस्वती न क्षुधितस्य तस्य सरस्वतीतिश्च पिपासितस्य ॥ ९

सर्वत्र सर्वज्ञपुरः सरस्वती-
स्तवाङ्गभाग्मध्यपदे सरस्वतीम् ।
भजेत नक्तं दिनके सरस्वती-
तयन्मुखात् श्रीधृतिभासरस्वती ॥ (उपजाति) १०

तनूमतां योऽघविधूसरस्वती तनत्तनूरत्नचकासरस्वती ।
न तत्र कर्त्तर्यपि मत्सरस्वती-
र्थिकेरमीशस्य न मा सरस्वतीः ॥ (वंशस्थ) ११

(उपजाति)

तनोति यः कश्चिदपासरस्वतीपूर्वस्थवर्णाननुतः सरस्वतीन् ।
त्वच्छासने सस्ववियुक्सरस्वती-
र्वधू भुनक्त्येष सुहा सरस्वती ॥ १२

यशस्ततिस्ते जगतीं सरस्वती पुनाति नेतः सुखदा सरस्वती ।
विधुं धरां चाभिसु वा सरस्वती
कर्त्तुं च याकृत्प्रतिमा सरस्वतीः ॥ १३

त्वं तीर्थप व्यत्ययतः सरस्वती वपुस्मृता सैरनिश सरस्वती ।
ततोऽपि च त्वं वरदा सरस्वती
बलाकभूमौ समवासरस्वतीः ॥ १४

योऽनङ्गसौख्येन परा सरस्वतीनृपत्ययुग् रसपदमुक्सरस्वतीम्।
बध्नाति किं तर्हि परा सरस्वतीं
ह्रियाऽन्यचित्ते(यिते) विरमत्सरस्वतीः ॥ १५

कर्मापराह्वाधरका सरस्वती रणक्रियापूर्वतवा सरस्वती ।
तया विना त्वां भुवि चेत्सरस्वती
लिकादियोनौ बहुशो सरस्वतीः ॥ १६

स एव शस्यः परिवत्सरस्वती तपस्तपोऽन्यैर्यममत्सरस्वती ।
भव्याघहारेऽथ वधूसरस्वती
नकादिपूज्य श्रितकेसरस्वतीः ॥ १७

क्रष्टुं नरैः किं हरिकेसरस्वतीप्सते यथांसे हयके सरस्वती ।
हन्तुं परेषामिव ते सरस्वती
शाच्यस्य भान्यैर्न तथा सरस्वती ॥ १८

(उपेन्द्रवज्रा)

सरस्वतीरव्रतशब्दपूर्वसरस्वती मूलविधं विमुच्य ।
सरस्वतीक्ष्णं क्रमयामलं ते
सरस्वती तं कलयन् श्रिया भूः ॥ १९

सरस्वतीदानवती द्विषत्कसरस्वतीवं त्वदृते सृजेद्यः ।
सरस्वती सङ्गमनं जिनाग्रे सरस्वती हेष न केवलाप्त्या ॥ २०

सरस्वतीयप्रतिलोमसंवत सरस्वतीकारितविश्वलोक ।
सरस्वती नाथ विहाय नन्दी सरस्वतीभ्यत्तव पूजकोऽङ्गी ॥२१

सरस्वती कण्ठविभूषणा स सरस्वतीयन्मनसां नतानाम् ।
सरस्वतीनां गिरमेतदापे सरस्वतीर्व्याकरणाम्भसा यत् ॥ २२

सरस्वतीद्वीपसमीपवर्त्ति सरस्वती वारिधिपारनर्त्ति ।
सरस्वतीयँश्चरणं यशः सा सरस्वती भूतसुरार्च्यतेऽदः ॥ २३

........ ....... ........ ....... ........ .......
........ ....... ........ ....... ........ ....... ॥ २४

........ ....... ........ ....... ........ .......
........ ....... ........ ....... ........ ....... ॥ २५

सरस्वतीत्वं भवमत्रमासीं सरस्वतीर्थे जलधाविव स्वम् ।
सरस्वती यां तव नेतरेषा सरस्वती मां ब्रुवतीव मूर्त्तिः ॥ २६

सरस्वतीपत्तननर्त्तकीर्त्तेः सरस्वतीबन्धुसमानमूर्त्तेः ।
सरस्वतीभ्रातृजसद्गुरोर्गीः
सरस्वतीजस्य मयाऽङ्घ्रिभाजा ॥ २७

सरस्वतीति प्रकृतेर्भवो यः सरस्वतीति त्वदुवेदिशब्दः ।
सरस्वतीवर्णभुदित्यपुष्पसरस्वतीरः प्रणुतः स्तुतोऽर्हन् ॥ २८

भूनाभिक्षितिभृत्सनाभिमहिमश्रीनाभिभूपान्वय
श्रीमन्मौक्तिकरत्नशेखरशिवश्रीनामवामभ्रुवः ।
इत्थं नाथ ! मया विनीतमनसा नीतो नुतिं देहि चि-
ल्लक्ष्मीसागरसोमदेवमहितां चारित्ररत्नश्रियम् ॥(शा.वि.) २९

पू.मु.श्री रत्नशेखरगणिविरचितम्
राणपुरतीर्थमण्डन-

## ६०. ॥ श्रीयुगादिदेवस्तवनम् ॥

(आर्या)

श्रीराणपुरविभूषणहारे श्रीमच्चतुर्मुखविहारे ! ।
जयति जगति प्रतीतश्चतुर्मुखः श्रीयुगादिजिनः ॥ १

विश्वोद्धरणधुरीण श्रीधरणविधापिते समवसृतिवत् ।
चैत्येऽद्भुतेऽस्तु तुष्ट्यै चतुर्मुखः श्रीयुगादिजिनः ॥ २

श्रीसोमसुन्दरगुरुप्रवरैः श्रीजैनशासनदिनेशैः ।
जीयात्कृतप्रतिष्ठ-श्चतुर्मुखः श्रीयुगादिजिनः ॥ ३

शाश्वतषष्टिचतुर्मुखचैत्य-प्रत्यायिनव्यचैत्यस्थः ।
न स्यात्कस्य नमस्य-श्चतुर्मुखः श्रीयुगादिजिनः ॥ ४

दिक् शर विहरजिन जिन विजया ऽष्ट न्यूनषष्ठ्यशीत्यर्चाः ।
बिभ्रदभितोऽवताद्व श्चतुर्मुखः श्रीयुगादिजिनः ॥ ५

श्रीधरणविहारवरे त्रिजगत्कृतविस्मये मयेति नुतः ।
भूयादभीष्टसिद्ध्यै चतुर्मुखः श्रीयुगादिजिनः ॥ ६

पू.मु. श्री शुभशीलगणिविरचितम्

## ६१. ॥ श्रीनाभेयस्तोत्रम् ॥

(अनुष्टुप्)

सुरासुरमहीनाथ-मौलिमालानतक्रमम् ।
श्रीशत्रुञ्जयकोटीर-मणिं श्रीऋषभं स्तुवे ॥ १

विभो ! त्वत्पादराजीवं, ये सेवन्ते जनाः सदा ।
सुरासुरनृपश्रेणि र्भजते तान् सुभक्तितः ॥ २

तनोसि त्वं विभो ! यस्य, मानसे वासमन्वहम् ।
तस्य पापानि गच्छन्ति, तमांसीव दिनोदयात् ॥ ३

निरीक्ष्य त्वन्मुखाम्भोजं, सुरासुरसुखप्रदम् ।
कृतार्थोऽहमभूवं, श्रीनाभिभूपालनन्दन ! ॥ ४

सुवर्णवर्णसङ्कास-देहद्युतिभरप्रभो ! ।
निजाङ्घ्रिकमलावासं देहि मे नाभिनन्दन ! ॥ ५

पू.मु. श्री रविसागरगणिविरचितम्
संक्षेपण रघुवंशरीत्या

## ६२. ॥ श्रीऋषभदेववंशवर्णनम् ॥

(अनुष्टुप्)

वाग् प्रसन्नमुखी भूया[त्] विद्यादानकृते मम ।
नमस्कारार्हपादाब्जा बिभ्रती स्वच्छकच्छपीम् ॥ १

क्वाऽप्सरःपतिसम्भूतोऽन्वयः क्व जडधीरहम् ।
अस्म्यादित्सुर्महद्वस्तुमोहान्निःस्वपुमानिव ॥ २

बालः पटुगतिं वाञ्छन्नुपहास्याय देहिनाम् ।
भविष्यामि यथा पङ्गु-र्मोहाद् वैदग्ध्यधारिणाम् ॥ ३

स्याद्वाऽस्मिन् सुरभिर्वंशे जनिते स्तुतिगोचरे ।
गृहीते वप्र एकांशे जनस्येव गतिर्मम ॥ ४

सोऽहमाजन्मभूयिष्ठज्ञानानामाजगच्छ्रियाम् ।
आभोग्यकर्मसंसारस्थितीनामाजनूरुचाम् ॥ ५

यथाविध्युपकर्तॄणां यथावित्तप्रदायिनाम् ।
यथावंशं प्रवृत्तीनां यथाभिमतभाषिणाम् ॥ ६

जयार्थे प्रौढसङ्ग्रामं कारिणां न्यायधारिणाम् ।
प्रत्तप्रत्यर्थिवासानां तुङ्गशृङ्गाद्रिगह्वरे ॥ ७

असङ्ख्यानेहसं यावद् ऊढनिर्वाणवर्त्मनाम् ।
वैराग्यत्यक्तसंसारसम्भोगानां त्रिवर्गिणाम् ॥ ८

इक्ष्वाकूणामहं स्तोष्ये जननं मन्दधीरपि ।
स्थित्वा तत्कीर्तनैः स्वान्ते स्तोतुमुत्कण्ठयेरितः ॥ ९

योग्यायोग्यविदः श्रोतुं व्यवसन्ति तदुत्तमाः ।
ज्ञायते यज्जनस्य तै-र्विद्वत्ता मन्दताऽपि वा ॥ १०

मारुदेवोऽभवन्नाभि-र्गरिष्ठगुणगौरवः ।
निःशेषयुग्मिनां मान्यः पर्जन्यः स्वर्गिणामिव ॥ ११

तत्कुले बहुलश्रीके पक्षद्वितयनिर्मलः ।
श्रीमान् वृषभ इत्यासीत् सरसीव सितच्छदः ॥ १२

निर्वोढुं निखिलं भारं प्रभूष्णुर्जात्यगौरिव ।
तारणार्थं भवाम्भोधे-र्नृणां पोत इवाऽभवत् ॥ १३

सद्राज्यादिगुणाधिक्यं तन्वता यशसान्वितः ।
विरेजे व्यापिना व्योम्नि किरणेनांशुमानिव ॥ १४

स्वरूपप्रतिमं शीलं शीलेन प्रतिमान् गुणान् ।
गुणप्रतिमपूज्यत्वं युग्मिराड् धृतवानसौ ॥ १५

भीमकान्तगुणेनासौ प्रीति-द्वेषकरोऽभवत् ।
मित्रार्य्योः पद्म-कुचयोर्भास्तापेनांशुमानिव ॥ १६

मर्यादाया: प्रजास्तस्य न कदाप्यतिचक्रमु: ।
लोकत्कल्लोलकान्तस्य वेला इव नदीशितु: ॥ १७

सम्पत्त्यर्थं नृणामेवा-ददे तेभ्योऽयमर्हणाम् ।
यतश्चिन्तामणि: पूजां दातुं गृह्णाति भूरि शम्(भूरिश:?) ॥१८

तस्यान्येऽलङ्कृतीभूता द्वयेनैवास्ति विभ्रम: ।
अलोभत्वेन कीर्त्या च श्यामीभूतारिवक्रया ॥ १९

तस्याऽज्ञातस्वरूपस्याऽऽकारेण क्रिययाऽनिशम् ।
इच्छयैवाखिलप्राप्ति-र्देवस्येव श्रिय: समा. ॥ २०

आत्मस्तुत्यन्यसंस्तुत्योर्न मुद्द्वेषौ स्वदानधी: ।
पूर्वपुण्यानुयायित्वादिवास्यासीन्मति: सना ॥ २१

निश्चयीभूतदुष्प्राप-नि:श्रेयससुखोऽपि सन् ।
विनैव वार्द्धकं धर्मे बभूव रुचिमानसौ ॥ २२

सर्व्वसौख्यविधानेन शिक्षादानाच्च युग्मिनाम् ।
कल्पद्रुमाधिक: सोऽभूत् तेषां कल्पद्रुसन्निभा: (भ:) ॥ २३

दण्ड्यान् दण्डयिता नीत्यै भोग्यकर्मच्छिदे यत: ।
परिणेता च तस्यार्थ-कामौ सुकृतमेव तत् ॥ २४

एवं यो भगवानासीद् राज्य-धर्मास्थिर्तिं दधत् ।
स्वर्णवर्णसवर्णाभो नम्र[देवा]सुराधिप: ॥ २५

श्रीहर्षसागरमनोहरवाचकानां
पट्टाम्बरे परिलसत्तरणीयितं यै: ।
श्रीराजसागरविचक्षणशेखराणां
तेषां विनेयरविसागरनामकेन ॥ २६

रीत्या समासेन कुमारसम्भव-
श्रीमेघदूताख्य-रघूरुवंश्यया ।
स्तुतौ जिनौ तौ वृषभाङ्कनेमिनौ,
मुक्तिस्पृहाणां कुरुतां शिवश्रियम् ॥ २७

पू.मु.श्री सारोदयगणिकृतम्

देवकुलाश्रमस्थ-

## ६३. ॥ श्रीआदिनाथस्तवनम् ॥

श्रीमन्तमादीश्वरमादरेण तं
स्तुवे परात्मानमनन्तसंविदम् ।
यः साम्प्रतं देवकुलाश्रमे सतां
हितार्प्पणैर्दर्शयति स्वमंशतः ॥ (उपजाति) १

(शिखरिणी)

न कीर्त्तौ सम्प्रीतिर्न हि विदुरतायाः प्रकटनं
न चातुच्छा वाञ्छा विषयजसुखे न व्यसनिता ।
प्रयुङ्क्ते मां स्तोत्रे जगदधिपतेरेव भवतः
परं सर्वाभीष्टप्रथननिपुणं नाथ सहजम् ॥ २

विभो ! दायं दायं भवसुखमभीष्टं शिवसुखं
प्रदत्से वात्सल्याज्जिन ! निजपदोपास्तिसजुषाम् ।
प्रसिद्धो नीरागस्तदपि विजयेथास्त्वमथवा
न मादृक्षैर्लक्षं विलसितमहो दैवतमिदम् ॥ ३

तथा यौगं योगं निरुपमतपोजापविधिभि-
स्त्वमभ्यासीर्व्यासीत्त्वयि स हि यथा कर्ममलहृत् ।
धराद्याः षट्कायाः षडपि ऋतवः पञ्चविषया-
स्तवैतन्माहात्म्याज्जिन ! यदनुकूलत्वमगमनम् ॥ ४

प्रणिघ्नन् विघ्नौघान् प्रबलरिपुभूतादिदमनैः
प्रयच्छन्नानन्दाभ्युदयमभितोऽभीष्टघटनैः ।
अपस्मारस्मेरस्मरगडुविकारज्वरमुखा
रुजोऽजर्यस्थैर्यात् प्रमथसि सपर्याप्रणयिनाम् ॥ ५

इमौ रागद्वेषौ प्रसभमनिवार्यौ भववने
प्रबाधेते व्याधाविव बहु मनो मे मृगमिव ।
कृपालुस्त्वं नाथस्त्रिजगदवनोपायजनक-
स्तदाभ्यां नो कस्मादवसि भवदेकाश्रितमिदम् ॥ ६

स्फुरन् रागश्चौरो भवजलनिधौ द्वेषमकरो
महामोहग्राहो जनिमृतिचलद्वीचिनिचयाः ।
भृशं सर्वं दुःखप्रदमिदमभून्मे परमतो
न च त्रातर्यस्मात्तव पदयुगल्याप्यत तरी ॥ ७

स्वयं निर्माप्यामी भृशमशुभमर्माण्यसुमतां
तुदन्तो विद्वेष्याः सहचरणशीलाः प्रतिपदम् ।
यथा स्युस्ते चिन्त्या इह न हि बहिःस्थास्तदिव ते
ततस्त्वं मद्दूरीभवनमुभयेषामपि कुरु ॥ ८

त्रिलोक्यन्तस्तावच्चिरपरिचितं राज्यमजितं
जनस्वान्तास्थान्यां ननु विदधतां मोहमहिमा ।

न यावत्सर्वान्ता रिपुकुलतरोर्मूलविभुजो
हठात्तामाक्रामत्यधिप ! तव निस्सीममहिमा ॥ ९

सुखापेक्षः श्रीमन् वृषभ निखिलो दुःखविमुखो
विमोक्षो दुःखेभ्यः प्रभवति सुधर्मानुपरमात् ।
सुसामग्रीयोगात्स च भवति तस्मादपि स त-
च्छ्रितानामन्योन्याश्रयमनयमेनं व्यपनय ॥ १०

पवित्रत्वद्गोत्रस्मरणविधिभिः संसृतिभवै-
र्घनापायैः कामैः प्रसृमरतराण्यान्तरतनौ ।
अवश्यं नश्यन्ति प्रथमजिनपैनांसि भविनां
विषावेगा वेगादिव पटुतरैर्जाङ्गुलिजपैः ॥ ११

जगच्चक्षुः साक्षात्त्वमसि कमलोल्लासजनना-
दलक्ष्योऽप्यध्यक्षो भवभवतिरस्कारचतुरः ।
यतस्तेऽध्यक्षत्वे प्रशमगुणभाजामसुखदा
न हि प्रोज्जायन्तेऽभ्युदितुमवनौ तामसगणाः ॥ १२

(वंशस्थ)

तवानुकम्प्येषु भवन्ति सर्वदा
समृद्धयः सर्वहितार्थसिद्धिदाः ।
यतोऽनुकूले जलदेऽखिलं भवे-
दिलातलं मञ्जुलशाद्वलं न किम् ॥ १३

शनैः शनैर्नीरदवृष्टिभिः क्षितौ
प्रजायते शाखिगणः फलेग्रहिः ।
प्रसन्नतायाः पदपङ्कजस्य ते
फलोदय(स्तत्) क्षणमे(व) न(ो) ध्रुवः ॥ १४

भवद्वयीशर्मदधर्म............
.................हितयीमदीदृशः ।
तवोपकर्तुः सुधृतीर्नतीः स्तुती-
रतो न कस्कोविदधीत तत्त्वधीः ॥ १५

धन्यास्त एव स्तवनैर्नवैर्नवै-
र्भवन्तमा ................।
............नल्पविकल्पकल्पना
निरस्य वश्यात्मतया सुमेधसा ॥ १६

न रूष्यसि त्वं न च तुष्यसि स्वत-
स्तदप्यनिष्टेष्टरमासमर्प्पणैः ।
...........देहभृतां तवेश त-
ल्लोकोत्तरं प्राभवमत्र चित्रकृत् ॥ १७

फलन्ति वाचां मनसां च गोचरै-
र्ध्रुवं फलैर्दैवतपादपादपाः ।
भवांश्च विश्वेशितरप्यगोचरै-
र्जगत्यतस्ते समतादरिद्रता ॥ १८

तव क्रमौ वन्दितुमुत्सुकायितः
कृती स्वभावान्न हि नीचकैः शिराः ।
गरीयसा किं तु तदा समर्जित-
स्वधर्मसम्भारभरेण मन्महे ॥ १९

उच्चैः क्रमादुन्नततां तव क्रमौ
स्वस्मिन्नुदारप्रकृती दरीधृतः ।

स्वभाक्तिकानामपि तां चरीकृतः
स देव दीयेत दयालुनापि यत् ॥ (उपजाति) २०

प्रणेमुषां कौसुमशेखरन्ति दि-
ग्विलासिनीनां विलसद्यशांसि यत् ।
स्फुरन् गुणौघो हृदये च हारति
प्रभुस्तवैवात्र पदप्रसन्नता ॥ २१

व्यपास्य संसारविकारविप्लवा-
नमन्दमानन्दपदं दधास्यतः ।
भवोद्भवोपप्लवविप्लुतात्मनो
मनः समाधानविधि विधेहि मे ॥ २२

त एव वर्ण्या भगवन् विकल्पना
निरस्य साम्यामृतनित्यशीतलाः ।
नासाग्रविन्यस्तदृशः स्मरन्ति ते
पदाम्बुजं ये हृदयाम्बुजे निजे ॥ (उपजाति) २३

नो शास्त्रार्थे प्रसरति मतिर्नो तपस्सु प्रयत्नो
नात्मध्याने धृतिरनुभवो नैव योगप्रयोगे ।
नाप्युत्साहः प्रथमजिन मे धर्मकृत्येऽपरस्मि-
न्नीहे मुक्तिं तदपि तव यत्तत्र भक्तिः प्रयोक्त्री ॥(मन्दाक्रान्ता) २४

कृतार्थितमनोरथः सकलवर्ण्णसद्वर्णनः
स सोममुनिसुन्दरत्रिदशवृन्दवन्द्यक्रमः ।
स दैवकुलिको मम प्रथमतीर्थनाथः पृथू-
करोत्ववितथाः प्रथाः प्रमथितापदां सम्पदाम् ॥ (पृथ्वी) २५

इत्थङ्कारं स्तुतिपथमहं त्वामनैषं कृतार्थं
धर्मार्थादीन् स्वहितजनकानाप्तुकामः पुमार्थान् ।
नाथः प्रार्थ्यप्रथननिपुणः प्रार्थ्यसे त्वत्प्रसादा-
च्छ्रीनाभेय ! प्रशममधुरा मेऽस्तु सारोदयश्रीः ॥ २६

(मन्दाक्रान्ता)

पू.उपा.श्री वरदराजगणिविरचिता

## ६४. ॥ श्रीयुगादिदेवस्तुतिः ॥

(भुजङ्गी)

शरच्छर्वरीशांशुराढावलक्षं लसद्ध्यानवन्मानसश्वेतपक्षम् ।
जिनं नाभिजं ध्वस्तमोहान्धकारं स्तवीमि प्रभुं प्राप्तसंसारपारम्॥१

अगाधे भवाम्भोनिधौ संपतद्भिर्जनैर्यस्य ते सातदात्रङ्घ्रियानम्।
समाश्रित्य वेगाद्वितीर्णः स तस्मै
नमस्तुभ्यमस्वप्नवृन्दार्चिताङ्ग ! ॥ २

महायोधदुर्बोधतापात्रमार ! क्रुधादीभसेनावधे सिंहसार ! ।
नवीनोल्लसद्भासुरस्वर्णदेह ! जय त्वं प्रभो ! केवलज्ञानगेह ! ॥३

भवत्प्रोक्तसद्वाक्यपीयूषधारां
पिबन्ति न हि प्राणिनो ये तुषाराम् ।
कथङ्कारमिष्टं भवेदत्र तेषां सरोषान्यवागाऽऽविलानां विशिष्टम्॥४

वचस्तावकं रागभृद्वाचया यः
समं वक्ति कालुष्यवत्या विशुद्धम् ।
अघस्त्र त्रियामा स्वरूपाज्ञ ईश !
स जन्मान्ध उक्तः खलु बुद्धिमद्भिः ॥ ५

सरागोक्तशास्त्रव्रजेभ्यो नमोऽस्तु
मिथः साम्प्रतं संविरोधं भजद्भ्यः ।
अधीताजनं मादृशं ये प्रकामं
भवद्गीर्षु बह्वादृतिं चर्कतीश ! ॥ ६

वचो वेत्त्यवक्ष्याधरं श्रद्दधाति
विभो ! वक्ति यस्तावकं भव्यजातिः ।
क्षमस्तं न जेतुं प्रपाण्डिवर्ग इवोन्मत्तसारङ्गसङ्घः शरास्यम् ॥७

द्रुतं सत्पदप्राप्तये प्रोच्यमानं
समौनस्य पाथेयमानन्ददानम् ।
अघच्छेदकं श्रेयसां यन्निधानं
तदास्तां मम स्वान्तके तेऽभिधानम् ॥ ८

समत्वापजं बालकासारसंस्थं भवारक्तदृक्कैरवोल्लासनेन्दुम् ।
अहानीश मे निर्जितक्षीरजातं
सुखं त्वन्मुखं पश्यतो यातु कालः ॥ ९

अनन्तैः समालिङ्गिता या जिनेश !
मनोमोहिनी मुक्तिवामा विकामा ।
तयाऽहर्निशं क्रीडमानोऽपि चित्र-
मिदं गीयसे त्वं बुधैः शुद्धशीलः ॥ १०

सुरा आसते कोटिशः सद्वितण्डा
भवान् रत्नमन्ये हि ते काचखण्डाः ।
न ते तेऽम्बरे जाग्रतीह ग्रहाः किं
जगच्चक्षुषः कस्तुलास्ते तु नाथ ! ॥ ११

कति त्वद्गुणान्काशहासेन्दुगौरा-
नणौ हृद्यहं कुर्व आप्तत्रिविश्वान् ।
स्वचीरे कियन्नह्यतिस्वर्णमत्रा-
धिगत्येश ! निःस्वो हिरण्यक्षितिध्रम् ॥ १२

(स्रग्धरा)

इत्थं श्रीआदिनाथस्तवनमतिमतिप्राप्तसिद्धान्तसारैः
कालेऽस्मिन् दुःखमारे प्रबलमठपतौ भूरिपाखण्डजाले ।
यैर्जैनं शासनं सत् प्रकटितममलं सम्यगुद्भासितं च
श्रद्धालूनां हितार्थं परमशिविपृथक्कृत्य पार्श्वस्थमार्गम् ॥ १३

तेषां विद्याविदग्रेसरविबुधशिरोलङ्क्रियापार्श्वचन्द्रो-
पाध्यायानां प्रवादिप्रतततरुगणोन्मूलनेभप्रभाणाम् ।
चञ्चच्चारित्रभाजां भवजलनिपतत्प्राणभृत्तारकाणाम्
स्वर्गङ्गानीरहारोज्वलतरलयशःपावितक्ष्मातलानाम् ॥ १४

चरणारविन्दसेवन-मधुपः शिष्याणुवरदराजाख्यः ।
जडमतिरपि निजहर्षा-च्चकार चित्तार्त्तितापहरम् ॥(गीतिः)१५

पू.मु.श्री पण्डित भक्तिसागरगणिविरचिता

## ६५. ॥ श्री आदिनाथ-स्तुतिः ॥

(कुटुंब-नाम-गर्भिता)

जयकर जन्तुकृपालय ! पालय नतमुनिचन्द्र ।
ऋषभजिनार्कसनाभि-र्नाभिकुलाम्बरतन्द्र (चन्द्र) ॥ १

**काका**-**काकी**र्णोद्धर **मामा**-**मामि**लितः ।
**सासू**नृतमरूपम ! **ससुरो**मामिलितः ॥ २

जयजयरवनन्**दीकरो** **दिक्क**रिविमलयशः ।
**भाभो** ! **भाभी** रतिकर ! **दादो**-**दादि**विशम् ॥ ३

**देवर**-दावलि दीधिति-निर्जितदाडिमबीज ! ।
**भाइ**नवाणी वितरतु रोगाद्यशु**भत्रीज** ॥ ४

**भतरीजी**वसुखावह ! **भाणेजी**वनदः ।
रक्ष शु**भाणेजो** जय कारकजीवनदः ॥ ५

**शाली**कृतशिव ! **शालो**-**देरानी**तिकरः ।
**ज्येष्ट**भवोदधितारक ! **जेठानी**तिहरः ॥ ६

**मासुखमाशी**र्वादो बहुशिवसुख**भरतार** ।
सुकृतलतापल्लवना **बहनी**रदवतार ॥ (त्रि.भि.) ७

**भोजाई**तिप्रशामक रे**फइ**तार्त्तिविलाप ! ।
ज्ञान**जमाइ**भगतिधर देहि सुकृत**माबाप** ॥ ८

सुजना**नन्दरजो**ज्झित ! **नानन्द**रिपुकन्द ! ।
दर्शतस्तव जिनवर ! मादृश एष ननन्द ॥ ९

श्रीमद्वाचक**लब्धिसागर**गुरोः शिष्याणुना **भक्तिना**
नीतः संस्तुतिगोचरं जिनपतिः श्रीमत्कुटुम्बाह्वया ।
श्रेयः श्रेष्ठकुटुम्बवृद्धिमतुलां कुर्याद्युगादिप्रभुः
श्रेयःसन्ततिकारकः **शिवपुरी**संघस्य कल्याणकृत् ॥ १०

पू.मु.श्री शिवमण्डनगणिविरचितम्

वागडपद्रपुरमण्डन-

# ६६. ॥ श्री आदिनाथस्तवनम् ॥

(भुजङ्गप्रयात)

जयश्रीनिवासैकगेहं स्तुवेऽहं, जगत्पूरितेहं सुवर्णाभदेहम् ।
युगादीशदेवं श्रियां वासुदेवं सुपर्वात्तसेवं स्मरे वामदेवम् ॥१

गुणाम्भोनिधे ! वक्तुमीशो गुणानां,
सुधीः कः कलौ सम्भवेत् तावकानाम् ।
तथाऽप्यद्भुतस्वीयभक्तिप्रयुक्तः,
स्तुवे त्वां विभो ! मुग्धभावाभियुक्तः ॥ २

भवाब्धिं तरीतुं तरीशल्प(?) कल्पां,
तवाऽऽज्ञां बरीभर्त्ति यो निर्विकल्पाम् ।
वरीवर्त्ति तं स्वीकृतेवाऽत्र लक्ष्मीः,
सरीसर्त्ति तस्य स्फुटं कीर्त्तिलक्ष्मीः ॥ ३

महामोहयोगेन पूर्वं गरिष्ठं,
न लब्धं क्रमाब्जं विभो ! ते वरिष्ठम् ।
अतः क्रोध - कन्दर्प - लोभादियोधाः,
प्रभो ! ही निमज्जन्ति मां ध्वस्तरोधाः ॥ ४

स्फुरद्भक्तिरागेन यस्तोष्टुवीति,
तथा कोऽपि कोपात् पराबोभवीति ।
इयं ते नुतिस्तत्र चेतःप्रवृत्तिः,
समाशोभते पापपङ्क्तेर्निवृत्तिः ॥ ५

भृशं सेविता मुक्तये जीवलोके,
हराद्याः समर्था मया नाऽवलोके (?) ।
अलं याचिता देवरत्नस्य बुद्ध्या,
सुखं दातुमेते स्तवः किं त्रिशुद्ध्या (?) ॥ ६

स्मृतिर्यस्य जन्मौघकोट्यर्जितानि,
छिनत्ति क्षणादप्यहोऽघानि तानि ।
विभो ! नाऽर्चि नाऽनावि नाऽध्यायि स त्वं,
मुधा हारितं तेन ही मानुषत्वम् ॥ ७

युगादौ युगादीश ! सन्मार्गरीति-
स्त्वया स्थापिता लुम्पिता कर्मभीतिः ।
अतस्त्वां प्रभुं देवदेवेशभावं,
प्रपन्नोऽस्म्हं त्यक्तरागादिभावम् ॥ ८

प्रगे यश्चरीकर्त्ति तेऽर्चां विशुद्धां,
जरीहर्त्यसौ कश्मलालीमशुद्धाम् ।
त्वदग्रे नरीनर्त्ति देव ! स्वभक्त्या,
वरीवर्त्ति सौख्येन्दिरा तं स्वशक्त्या ॥ ९

न याचे विना त्वां स्फुरद्देवतर्द्धिं,
तथा स्वर्णरूप्यादिनिश्शेषसिद्धिम् ।
परं प्रार्थयेऽहं प्रभो ! बोधिलाभं,
शिवश्रीपरीरम्भसँल्लग्नकामम् ॥ १०

विभो ! दुःख-दौर्गत्य-दौर्भाग्यहर्त्ता,
ध्रुवं जीवलोके मनोऽभीष्टकर्ता ।

तथा स्पष्टदुष्टाष्टकर्मौघभेत्ता,
जय त्वं युगादिवि(प्र)भो ! विश्ववेत्ता ॥ ११

मया त्वत् परः प्रापि नो कः कृपालुः,
प्रभो ! त्वं नुतो नाऽस्म्यतः संशयालुः ।
अशंसीतिभावे भवेत् स्वामिभक्ति-
स्ततो मुक्तिसादृर्ध्वं न मे का विभक्तिः ? ॥ १२

कथा श्रीमतां स्वप्रशंसानिवासः,
स गोपालसङ्घाधिपः श्रीविलासः ।
सषट्बन्धुनाऽस्थापि येनाऽऽदिमूर्त्ति-
र्न किन्तु स्फुरन्मूर्त्तिमत्सौवकीर्त्तिः ॥ १३

सुधानिर्मितेवाऽस्ति मूर्त्तिस्त्वदीया,
प्रभो ! मन्यते शुद्धबुद्धिर्मदीया ।
न चेज्जन्मकोट्यर्जितः पापतापः,
कथं क्षीयते दर्शनात् सप्रतापः ॥ १४

निवासं हृदि त्वं यदा मे विधास्ये (विधत्से ?),
तदाऽहं प्रभो ! निर्मलत्वं प्रयास्ये ।
कथं जीवलोके स्थिरं स्थातुमीष्टे,
तमश्चक्रवालं सहस्रांशुदृष्टे ॥ १५

सदा धीवरैः सेवितत्वात् समुद्र-
स्त्वमेवाऽस्यहो मौक्तिकश्रीद्धभद्रः ।
अपापः परं वर्त्तसे कौतुकं तत्,
ततोऽप्याश्रितस्तार्यते चित्रमेतत् ॥ १६

मदक्रोधकन्दर्परोगाद्यनर्था-
स्त्रिलोकीतले वैरिणो ये समर्थाः ।
तव ध्यानमात्रेण ते यान्ति नाशं,
मृगाः सिंहनादाद् यथा निःप्रकाशम् ॥ १७

मयाऽद्य प्रभो ! चिन्तितार्थप्रदायी,
समासादि चिन्तामणिः सातिशायी ।
अतः संश्रयन्ते विभो ! मे समग्राः,
पराः सम्पदः सर्वभावादुदग्राः ॥ १८

पदाम्भोरुहे संश्रिते संसृतौ ते,
निमज्जन्ति किं भव्यमर्त्त्याः समे ते ।
महासागरे यानपात्रोपयुक्ताः,
कथं पोतवाहाः पतन्त्यर्थयुक्ताः ॥ १९

स्वभक्त्या प्रभुं त्वां बुधा ये स्तुवन्ते,
दुरापं शिवश्रीसुखं ते लभन्ते ।
न किं प्रार्थितः पारिजातोऽर्थिजातं,
कृतार्थं विधत्ते कदा निःस्वतार्त्तम् ॥ २०

जगत्यां जगत्सृष्टितो विश्वकर्त्ता,
तथाऽजत्त्व (जोऽस्य) तस्त्वं प्रभो ! लक्ष्मिभर्त्ता ।
विभो ! शङ्करः संस्कृतेर्विद्यसे त्वं,
समग्रार्थसार्थोक्तितः सर्ववित् त्वम् ॥ २१

मम त्वं गुरुस्त्वं सुहृत् त्वं च माता,
मतिस्त्वं गतिस्त्वं धृतिस्त्वं च नेता ।

यशस्त्वं रतिस्त्वं धनं त्वं जनेता,
प्रपन्नोऽस्म्यहं त्वामतो मुग्धचेताः ॥ २२

सृतं मे धनैर्भूरिभिः कीर्त्तिवृद्ध्या,
सुतस्त्र्यादिभावैस्तथा राज्यऋध्या ।
परं तिष्ठतु स्वामिभावेन मे त्वं,
हृदि प्रार्थये त्वामिदं नाथ ! तत्त्वम् ॥ २३

स्तुत्वैवं गुरुरत्नशेखरविभाविद्योतिताङ्घ्रिद्युते !,
लक्ष्मीसागर-सोमदेवजगतीसम्बोधक्षित्युद्युते ! ।
श्रीमद्वागडपद्रभूमिरमणीभालस्थलीभूषण !,
त्वां याचे शिवमण्डनाऽख्यपदवीं श्रीआदिनाथप्रभो ! ॥ २४

(शार्दूलविक्रीडित)

पू.उपा. श्री भानुचन्द्रगणिविरचितम्

आलोचनागर्भित

## ६७. ॥ श्री नाभयेजिनविज्ञप्तिस्तोत्रम् ॥

(उपजाति)

आनम्रकम्रामर पूर्वदेवः, स वः श्रियं यच्छतु मारुदेवः ।
अशिश्रियद् यच्चरणारविन्द-मिन्दिन्दिरालीव पयोधिपुत्री ॥१

त्वं वेत्सि सर्वं सचराचरं जगद्, ज्ञानेन विश्वत्रितयावलोकिना ।
त्वत्साक्षिकं देव ! तथाऽपि वक्ष्ये,
शुभाशुभं यत् विहितं मया तत् ॥ २

संसारचक्रे भ्रमता चिरेण, प्राप्तो मया मर्त्यभवः कथञ्चित् ।
तथापि दुर्बुद्धिरहं न कुर्वे, धर्मं यथा स्यादमृतोपलब्धिः ॥ ३

प्रभो ! मया स्वीयगुरोर्मुखाम्बुजात्,
यमानुरीकृत्य तथा न रक्षिता ।
अवश्यमेवास्य कुकर्मणः फलं,
भोक्तव्यमस्तीतिभयं न जातम् ॥ ४

पूर्वं मया लक्षनृणां समक्षं कक्षीकृतं यच्चरणं विरागात् ।
किञ्चित् प्रमादाचरणेन पश्चान्मूढेन सर्वं कलुषीकृतं तत् ॥ ५

(उपेन्द्रवज्रा)

पुरा परापाय-विमर्शपूर्वकं, मया कृता यद् हृदि कोटिकल्पना ।
दुरन्तपापं समुपार्जितं तया, निरर्थकं तन्नरकाधिकारिणा ॥ ६

मया नृणां धर्मकथासु नित्य,-मकारि दृग्भ्योऽम्बुकणप्रवाहः ।
अत्यन्त-निर्वेदरसस्य पोषणात्,
परं न जातं मम कोमलं मनः ॥ ७

(पञ्चमहाव्रताः)

मयाधिक-प्राणित-लोभतः कृतो, निरागसां प्राणभृतां व्यपायः।
न ज्ञातमेतत् किल यादृगेव वितीर्यते तादृशमेव लभ्यम् ॥ ८

अन्योन्यदुर्वाक्यविभाषणेन, मयार्जितं संसृतिहेतुभूतम् ।
पापं महत्तस्य विनाशकर्ता, स्वामिंस्त्वदीया चरणद्वयी मे ॥९

नित्यं मया मन्द इति प्रजल्पितं, क्रियासु कैवल्य-सुखप्रदासु ।
लोभाभिभूतेन नवीनवस्तु, प्राप्त्यै मुधा भ्रान्तमहो समन्तात्॥१०

शनैः शनैः पर्वणि रोगिणेव मया कथञ्चिज्जिनमन्दिरे गतम् ।
प्रधावितं पर्वतमेखलायां कुतूहलार्थं त्वरया तुरङ्गवत् ॥ ११

सत्तीर्थयात्रासु मया मनोऽपि न जातुचिद् दैवहतेन निर्मितम् ।
शिष्यादिसंपत्तिकृते त्वजस्रं
भ्रान्तिः कृता भूमितलेऽखिलेऽपि ॥ १२

वेषो मया स्वोदरपूरणायोररीकृतः केवलमेवमन्ये ।
नो चेत् कथं मुक्तिनिदानभूतं सम्यक्त्वरत्नं कलुषीकरोमि ॥ १३

वादे मया केचन वादिनोऽपि विनिर्जिता न्यायविशेषयुक्तिभिः।
स्वोत्कर्षपोषाय परे न चात्मपक्षस्य विस्फूर्तिनिदर्शनाय ॥१४

मया मुधा हारित जन्मनाऽमुना, किमप्यपूर्वं सुकृतं न तत् कृतम्।
कीर्ति भवेद्येन जगत्त्रयान्तरे, पाथेयतां चैति परत्र लोके ॥१५

दुर्वारमाराधिकपीडितेन, दुरात्मना यद् विहितं मया तत् ।
त्रपाकरं वच्मि कियत्त्वदग्रे, जानासि सर्वं स्वयमेव यस्मात्॥१६

(ज्ञानाचारादि)

इत्येव विद्याविहितश्रमस्य, पुंसः फलं यन्न भवेत् सगर्वः ।
उपस्थितं मे विपरीतमेतत्, किं तत्र दुर्दृष्टमिदं न जाने ॥ १७

त्वच्छासनात्यन्त पराङ्मुखानां, दुरात्मनां देव ! पदार्थ-सार्थाः।
सर्वेपि शीघ्रं विमुखीभवन्ति, सहस्र-पत्राण्युदयादिवेन्दोः ॥१८

मिथ्यात्वबुद्ध्या तव शासनं यत्,
मिथ्योपदेशेन मयाऽऽविलीकृतम् ।
क्षन्तव्यमेतत् समशत्रुमित्रैर्मदीयमागः प्रभुभिः पवित्रैः ॥ १९

(तदुत्थपङ्कस्य विनाशनाय त्वदङ्घ्रिसेवा रसिकं मनो मे)
(पाठान्तरम्)

मयोपवासो विहितोऽस्ति पर्वसु सगर्व मुक्त्वेति समाजमध्ये ।
जग्धं यथेष्ठं तु रहः प्रविश्य स्वामिन्नहो मोह-विजृम्भितं मे ॥२०

मया जनानामतिदुःखितानां कृतोपकारः सुकृतैक-सञ्चयः ।
तेभ्योऽपि किञ्चिच्छुभवस्तु लिप्सया
हतप्रभावः खलु सोऽपि निर्मितः ॥ २१

अधीत्य बिन्दुप्रतिमं श्रुतं क्वचित्, जानाम्यहं सर्वमिति प्रफुल्लः।
तेनाऽथ हे नाथ ! निरक्षरस्य, दुरात्मनः का भविता गतिर्मे ॥२२

भुङ्क्ते यदाऽऽर्द्रं सुरसं सुपक्वं, सुस्वादु सुव्यञ्जनमेव शश्वत् ।
तथैव सुस्वादु सुपक्वमन्न,
मर्हन् ! महद् दुःखमदायि जिह्वया ॥ २३

अत्यन्तसुस्वादु मयैव भोज्यमिदं तथा नेति न भक्ष्यमेतत् ।
इत्यादि सर्वं रसना जितेन कृतं मया षड्रसलोलुपेन ॥ २४

(दानादि चार प्रकारना धर्म)

दानं सुपात्रेन कदाऽपि दत्तं कीर्त्यादि दाने प्रगुणीकृतं मनः ।
न धर्मकृत्यस्य कृता समीहा निरर्थकं जन्म गतं ममेदम् ॥२५

मिथ्यात्वदुर्वासितचेतसो मे, रुचिर्न च स्याच्छुचि जैनधर्मे ।
नानाविधव्यञ्जनकल्पितेऽपि, ज्वरार्दितस्येव मनोज्ञभोज्ये ॥२६

लोभेन तत्तोषकृते गतागतं, मया कृतं धामवतां गृहे सदा ।
न ध्यानलीनेन जिनेन्द्र ! निर्जने
महावने नैव समाधिना स्थितम् ॥ २७

सदा सदाचारविचारवद्भि-र्दत्तं मनोहारि यदेव वासः ।
नैवोपभोगाय मयापि कल्पितं,
दत्तं न चान्यस्य (स्मै) तथैव तद्गतम् ॥ २८

तत्तन्मनोहारि पदार्थसार्थे, जिनेश ! दृग् पथमागते सति ।
तल्लिप्सयैवात्र मनो मदीयं सदैव संतप्तमिवावतिष्ठत् ॥ २९

मया कृतं चेत् सुकृतं कदाचित्, गर्वेण सर्वं विफलीकृतं तत् ।
अतोऽत्र नामुत्र च किञ्चनापि, भोक्तव्यमस्तीति भृशं भयं मे॥३०

दुष्टा मदीया रसना निकृत्या, पुरः परेषां मधुरं ब्रवीमि ।
विभाव्य सम्यग् हृदि किन्तु नैवं शिवप्रदः शान्तरसो रसेन्द्रः॥३१

समागते पर्वणि तत्तपोऽर्थे श्रद्धावतां स्वीयमतानुरागिणाम् ।
दत्तो मया तीव्रतरोपदेशो न चात्मना तद् विहितं हतेन ॥ ३२

दुरात्मना नाथ ! मया कदापि, विटेन शीलस्य कथैव नो कृता।
तद्हेतुकः कोऽपि शुभोपदेशस्तथा परेषामपि न प्रदत्तः ॥३३

यदीयसद्ध्यान-रसेन्द्रयोगात् संजायते स्वात्मनि तारभावः ।
तथापि मूढेन मया तदर्थमभ्यर्थिताः केचन योगिनोऽपि ॥३४

भ्रान्ति विमोहान्मम कारयन्ति वाक्यानि तेनाथ यथास्थितानि ।
स्थाने हि तद् ग्रीष्मभरान्मरीचिका
पुंसां जलभ्रान्तिकरी न किं स्यात् ॥ ३५

महीतले निर्दयमानवानामहं विधात्रा विहितोऽस्मि मुख्यः ।
करङ्कशेषानपि वीक्ष्य रङ्कान् यतो ना जाता हृदि मे दयापि ॥ ३६

मया कृतं यत् सुकृतं क्रियादिकं करिष्यते यत् क्रियते च नित्यम्।
फलेग्रहि र्नो भविता ममैद्यतो न निर्दम्भतया विधीयते ॥ ३७

अन्यं समाख्याय जनस्य रात्रौ किञ्चित्तदन्यं विहितं पुनः प्रगे ।
इत्यस्मि विश्रम्भविनाशहेतुः स्वामिन्नहं पापकृतां हि मुख्यः॥३८

कृतं ऋजुत्वं बहिरेव नान्त-र्मुखे च माधुर्यमधारि दम्भात् ।
परं मया नैव कदापि मुक्तः,
स्वान्तस्थकालुष्य-कलङ्क-पङ्कः ॥ ३९

योऽयं कृतान्तस्तव मोहमत्त-मातङ्गविध्वंसनपञ्चवक्त्रः ।
अध्यापितः सोपि मया स्ववैया
वृत्त्यार्थमेवात्र तदस्तु धिग् माम् ॥ ४०

सद्ज्ञानचारित्रविशेषरत्नयोर्मया कदाचिन्नहि संस्कृतिः कृता ।
तदीयतन्त्राणि विशेषितानि जिनेश ! सौन्दर्यविशेषभाञ्जि ॥४१

उत्सर्ग मार्गश्च तथापवादो द्वयं जिनप्रोक्तमिति प्रपद्य ।
स्वामिन्मया सर्वमकृत्य कृत्यं
द्वितीयमार्गे निहितं प्रमादात् ॥ ४२

शश्वत् समग्रास्वपि सत् क्रियासु विदग्धमेवाहमधारिषं यत् ।
स्वयं प्रवृत्तोऽस्मि न तासु कर्हिचित्
न वत्सलत्वाद् गुरुणापि नोदितः ॥ ४३

पितुर्धनं यद्यपि भूरि दत्त्वा गृहीतदीक्षोऽस्मि महाविरागात् ।
तथापि पुस्तस्य कृते पुनर्मां संजायते धिग् धनसंग्रहेच्छा ॥४४

अकब्बर-क्ष्माधिपतेः पुरस्तान्मया-
जनानां यदकारि कृत्यम् ।
न निस्पृहत्वेन न चोपकार-
बुद्ध्यापि किन्तु स्वगुरुत्वहेतोः ॥ ४५

ईक्षे कुमारान् व्रजतो हि यावतः कर्तुं विनेयान् स्पृहयामि तावतः।
स्वामिन् ! महामोहवसादुद्दुरन्ता प्रवर्धते लोभपरम्परा मे ॥४६

अहो मयाऽकब्बरशाहिशाहे-रध्यापितान्यक्षकृतावरस्य ।
सहस्रनामानि सहस्ररश्मेः कार्तस्वरीयासनसंस्थितेन ॥ ४७

विरागिणां यद्यपि निस्पृहाणां नैवोचितीमञ्चति तन्मुनीनाम् ।
स्वकीयधर्मस्य तथापि लोके कृतं मया स्फूर्तिनिदर्शनाय ॥४८

प्राप्तं मया तेन गुरुत्वमेव परं न जाता परमार्थसिद्धिः ।
अतो मुनीनामतिनिस्पृहाणां तेषां तु तेनापि न कश्चिदर्थः ॥४९

(सुकृत कथनम्)

काश्मीरदेशेऽस्त्यथ जैनलङ्काऽभिधं सरो मानसवद् विशालम् ।
कुतूहली तत्र कुतूहलार्थं शाहिर्गतस्तेन गतं मयापि ॥ ५०

तत्र प्रगेऽहं प्रभुपाठनाय गतोऽस्मि शीतेन भृशं निपीडितः ।
अध्यापयन्नेव नृपं हिमानीपातादकस्मादभवं विहस्तः ॥ ५१

मूर्च्छां गतोऽतर्कितमेव पश्चात् पोते पतित्वा क्षणमुत्थितोऽस्मि ।
तदा भृशं शाहिसमीपवर्तिभिरभूतपूर्वस्तुमुलः कृतो जनैः ॥५२

कृपाकटाक्षेण विलोकितं तदा पुनः पुनः प्रोक्तमिदं च शाहिना।
राज्ये मदीये वद वल्लभं यद् मया प्रदत्तं तव निश्चितं तद् ॥५३

दयापरो मामसकृन्निरीक्ष्य, दुःखार्द्रचेताः पुनरब्रवीन्नृपः ।
असाम्प्रतं किं कुरुषे विलम्बं
यत्तेऽस्त्यभीष्टं वद साम्प्रतं तत् ॥ ५४

मया तदानीं विमलाद्रिशुल्कं, विमुच्यतां प्रार्थितमेतदेव ।
ततोऽस्य तीर्थस्य करं व्यमुञ्च, समस्तदिल्लीपतिसार्वभौमः ॥५५

मत्तः कृतं तत् सुकृतं च तेन, ममाप्यपूर्वोऽजनि तेन लाभः ।
स्वकीयमुद्राकलितं विधाय, पत्रं प्रदत्तं मम शाहिना द्राक् ॥५६

मयापि पूर्णानकवद् धरित्र्यां, श्री हीरसूरेरुपदीकृतं तत् ।
ततः प्रभुत्यत्र गिरौ न जातुचिद्
गृह्णाति कोऽपि प्रतिमानुषं करम् ॥ ५७

श्रीहीरसूरेः सुगुरोः प्रसादात्, कुर्वन्ति सर्वेऽपि सुखेन यात्राम् ।
अद्य प्रभृत्येतदभूतपूर्वं, जातं न केनापि विनिर्मितं पुरा ॥ ५८

यस्या हविर्दध्यपि भुज्यतेऽनिशं, दुग्धं च पीयूषनिभं निपीयते।
मातेव धेनुरनिमित्तवत्सला,
निपात्यते सापि कथं दुरात्मभिः ॥ ५९

श्रुत्वेति सम्यक् समये मयोक्तं, चमत्कृताश्चेतसि साहिराजः ।
निःशेषदेशेषु विलिख्य पत्रं
न्यवारयद् गोवधमुग्रतेजाः ॥ (यु.) ६०

(आत्मनिवेदन विज्ञप्ति)

इत्यात्मगर्हा करणेप्यपूर्वं निरूपितं यत् सुकृतं कृतं तत् ।
अथात्मगर्हा करणाद् विरम्यते, विज्ञप्यते नाभिनरेन्द्र संभव!॥६१

असारसंसारपयोधिमध्ये, त्राता त्वमेवासि निमज्जतां नृणाम् ।
जानन्नपीदं किमभूवमज्ञ-स्त्वदन्यसेवारसलम्पटोऽहम् ॥ ६२

इह त्वदीयः खलु यो नियोगः सुरासुराणामपि माननीयः ।
विहाय तन्मूढधिया त्वदन्यदेवाज्ञया नाथ ! मया प्रवृत्तम् ॥६३

बाह्ये समन्तात् मधुवेष्टितस्य, हालाहलस्येव मम स्वरूपम् ।
जानीहि विश्वोद्धरणैकधीर ! बहिर्मनोहृत् कटुकं यदन्तः ॥६४

निरत्ययं ये भवदङ्घ्रियुग्मं भक्त्या भजन्ते भुवि जन्मभाजः ।
हर्षाश्रु-पूर-प्लुत-देह-देशास्तेषां प्रभो ! जीवितमेव धन्यम् ॥६५

अहं त्वदीयं शरणं प्रपद्य शरण्य ! ते संनिधिमागतोऽस्मि ।
सीदन्तमुग्रव्यसनाब्धिमग्नं मां रक्ष वीक्षात्मपदे विलग्नम् ॥६६

जानाम्यहं नाथ ! कदापि पूर्वं, त्वन्नाम मन्त्रो न मया श्रुतोऽस्ति।
त्वन्नाममन्त्रश्रवणे त्ववश्यं, विपद् भुजङ्गी न समीपमेति ॥६७

दर्शं च दर्शं च मनो मदीयं संसारहल्लीसकमीयुष श्रमम् ।
विश्रम्यतां तच्चलने त्वदीये जम्बूमुनावेव यथाऽपवर्ग्गः ॥६८

पापेन पीनं सुकृतेन हीनं दुरात्मनीनं कुपथाध्वनीनम् ।
दोषाब्धिमीनं च सदैव दीनं
पुनीहि मां चेत् पतितान् पुनासि ॥ ६९

दृष्टोऽसि पूर्वं बहुशस्स्तुतोऽसि, पाटीरकल्कादिभिरर्चितोऽसि ।
परं मया पापधिया कदापि, न भक्तिपूर्वं विधृतोऽसि चित्ते ॥७०

जातोऽस्मि सर्वत्र जिनेश ! तस्मादहं जनानां परिहास धाम ।
कृताः समग्रा अपि सत् क्रिया
यन्न भावशून्या सफलीभवति ॥ ७१

भवाम्बुधौ मां पतितं निरीक्ष्य, दयां विधायोद्धर किं विलम्बसे।
जगत्त्रयाधार ! जिनेश ! यस्मान्न
त्वां विना कोऽपि हि कर्णधारः ॥ ७२

मया विमूढेन भवान्तरेऽपि, न चर्चितं यद् भवदङ्घ्रियुग्मम् ।
जिनेश ! तेनैव पराभवानां,
महं विधात्रा विहितोऽस्मि पात्रम् ॥ ७३

संभाव्यते नैव कृतं पुरापि, पुण्यं मया क्वाप्यधमेन नूनम् ।
इहापि चेत्तन्न पुनः करिष्ये,
हतोऽस्मि हा हा विधिनाऽहमेव ॥ ७४

लोकत्रयी लोकहितानुबन्धिनं, जगद्गुरुं जाग्रदशेषवैभवम् ।
ध्यायन्ति ये त्वां मनसाऽपि दुःस्थिता,
भवन्ति तेऽत्रैव महर्द्धयो जनाः ॥ ७५

संसार मध्यस्थमपि प्रभो ! त्वां, संसारमुक्तं प्रवदन्ति सन्तः ।
स्थाने विषान्तर्निहितोऽपि यन्मणि-
र्विषेन मुक्तः प्रतिपाद्यते जनैः ॥ ७६

ये त्वद् गुणव्रात-पयोधिमीना-स्त्वदीयवाचामृतपानपीनाः ।
त्वदुक्तसिद्धान्तपथाध्वनीना-
स्त्वद्वक्त्रवीक्षाविषये नवीनाः ॥ ७७

त्वत्पादपङ्केरुह एव लीना स्त्वदीयसेवाविहितात्मनीनाः ।
भवन्ति ते जन्मजराविहीना संसारचक्रे न कदापि दीनाः ॥७८

इत्थं त्वदग्रे जिन ! ये स्वरूप-मात्मीयमावेद्य कृतात्मगर्हा ।
ते स्वर्गसौख्यान्यचिरेण भुक्त्वा
भव्या महानन्दपदं लभन्ते ॥ ७९

(अंतिम प्रार्थना-)

प्रेष्योऽस्मि दासोऽस्मि च किंकरोऽस्मि,
त्वत्सेवकानामपि सेवकोऽस्मि ।
याचेऽहमित्येव न किञ्चिदन्यत्
कृपाकटाक्षेन विलोकनीयः ॥ ८०

श्रीभानुचन्द्रवरवाचकचक्रवर्ती,
स्वच्छाशयः सुविहितोऽपि हि पापभीरु ।
आत्मीयदुश्चरितकीर्तन-चारुदम्भा-
दालोचनामिति चकार विचारचञ्चुः ॥ ८१

(पाठान्तरम्-)
श्रीभानुचन्द्रवरवाचकचक्रवर्ती,
स्वच्छाशयोऽपि हि जिनाधिपतेः पुरस्ताद् ।
आत्मीयदुश्चरितकीर्तनचारुदम्भा-
दालोचनां विहितवान् विधिवद् विधिज्ञः ॥ ८२

पू.मु. श्री समयसुन्दरगणिविरचितम्

नानाविधश्लेषमयं

## ६८. ॥ श्रीआदिनाथस्तोत्रम् ॥

विनौति यो नो सकलानिकेतनं, कुले जिनं हंसकलानिकेतनम्।
सुखानि लेभे समहंस किन्नर, प्रणम्य पादं समहंसकिन्नरः ॥१
(वंशस्थ)

निर्मुक्तराग प्रमदाभिराम, वने मतङ्गप्रमदाभिराम ।
नम्रीभवन्मन्दरविग्रहाभ, जय प्रभो ! मन्दरविग्रहाभ ॥ २
(उपेन्द्रवज्रा)

पुण्याङ्कुरे जीवनमुक्तमोहं, गुणह्-राजीवनमुक्तमोहम् ।
विनौम्यहं स्कन्धरमङ्गदान्तं, जिनं वचस्कं धर मङ्गदान्तम् ॥३
(उपजाति)

जय प्रभो ! कैतवचक्रहारी, यस्य स्मृतेस्त्वं तव चक्रहारी ।
मायामहीदारहलो भवामः, स्वर्गाधियामारह-लोभवाम ॥ ४
(उपजाति)

प्रथमजिनवरा सङ्कल्पभावप्रमाणं,
प्रकटभुवनकीर्त्ते कल्पभावप्रमाण ।
प्रदलितरिपुवृन्दः सर्वदा तातमेशं,
प्रथय मदतिमिश्रे सर्वदाता तमेश ॥ (मालिनी) ५

अपवर्गसरोवरराजहंस, कुमतानलसंवरराजहंस ।
भुवनोत्तमवंशमतागमेन, जय हेमतनो ! शमतागमेन ॥ ६

सुमनस्कृतसातपपातकान्त, भववारिणि भूत पपात कान्त ।
ददृशे तव येन सनावृषाङ्क, वदनं नयनेन सना वृषाङ्क ॥७

पत्कजे चञ्चरीकायते नायका, द्वेषविध्वंसनाकायते नायकः ।
उन्मुखस्तप्तगाङ्गेयनालीकरुग्,
भक्तिभाजां सतां गेयनालीकरुग् (स्त्रग्विणी) ८

नम्रीभवत्सुरपुरन्दरमौलिरङ्गत्पादाम्बुजो नलिनसुन्दरमौलिरङ्ग।
अज्ञानपङ्कहरणं न रराज चक्रे,
जीयात्सकेवलवने नरराजचक्रे ॥ (वसन्ततिलका) ९

पालय माम्प स्तवाल(लि ?)क परतिकं जगताङ्गज,
मानमहीरुहनाभिदेशजितकञ्जगताङ्गज ।
ऊचे तत्त्वमिह प्रमोदवरमालसदायक,
ईतिभीतिवितते: सहावरमालसदायक ॥ १०

नमतामजहारवन्दित, स्मरसुजनैर्विजहारवन्दित ।
विनुवे विभवालयादरं, तं त्वां नष्टभवालयादरम् ॥ ११

प्रथमदेव सतानयनामृत, पदनता जनतानयनामृत ।
तव सुरैर्धृतपङ्कजगामया, समलकालवृषाङ्क जगाम या ॥ १२
(द्रुत.वि.)

त्वां नुवे यस्य तं शं करे मे मते, देवपादाम्बुजेशं करे मे मते ।
मन्मनश्चञ्चरीकोपसन्तापते, नाभिभूपाङ्गभूः कोपसन्तापते ॥१३
(स्त्रग्विणी)

एवं श्रीजिनचन्द्रसूरिसुगुरोः पादानतस्वर्गुरोः.
श्रीनाभेयसमेन्दुकुन्दयशसा संछन्नगौरीगुरोः ।
भङ्गं श्लेषविशेषकाव्यकलितं स्तोत्रं तवाश्चर्यकृत्,
सङ्कुर्यात्समयादिसुन्दरकृतं कर्त्तुः सदा सम्पदम् ॥ १४

(शा. वि.)

पु.मु.श्री. धर्मवर्द्धनगणिविरचितम्

बीकानेरमण्डन-

## ६९. ॥ श्रीआदिनाथस्तोत्रम् ॥

(उपजाति)

प्राज्यां चरीकर्त्ति सुखस्य पूर्तिं,
यका जरीहर्त्ति च दुष्टजूर्तिम् ।
मद्रैश्च मोमूर्तिं सुभक्तमूर्तिं,
तां बीकपुर्य्यां नमतादिमूर्तिम् ॥ १

इष्टार्थपूर्त्तौ द्युघटी वरीयसी,
जाड्यार्त्तिहानावपटीपटीयसी,
गिरीसभेयं प्रतिमा गरीयसी,
स्थिरा स्थिरावद् भवतात्स्थवीयसी ॥ २

एनां जिनेनांगसमां शयद्वयं,
ललाट आधाय विधाय सल्लयम् ।
वयं च यूयं शुभधर्मशीला,
भजाम भव्या विलसामलीलाः ॥ ३

पू.मु.श्री रङ्गविमलगणिकृतम्

## ७०. ॥ श्रीआदिनाथचैत्यवन्दनानि ॥

(शार्दूलविक्रीडित)

लोके विश्वजनौघ वञ्चनपटून्, त्यक्त्वा च भोगोत्करान्,
प्राव्राजीत्स्वयमाद्य योगिजिनपः, सर्वार्थ वर्त्मेक्षकः ।
यो वन्द्योऽमरराजिमौलिमुकुटै र्भक्त्याऽऽदरात् स प्रभुः,
श्रीमान्नाभिमहीशसूनुरिह वै, भूयाच्छ्रिये जीविनाम् ॥ १

सर्वत्यागनिदानरम्यचरितः, श्रेयोनिधिः श्रीकरः,
पापव्रात महेमपञ्चवदनो भूयेहि राजीडितः ।
ध्यानानन्द मनाजिताऽक्षनिचयो, ज्ञानेन्दु भा भास्वरो,
जीयात्सर्वहिताय भूमिविषये, श्रीमारुदेवी जनिः ॥ २

भव्यान्भव्यपथे निजीयसुगुणैः सङ्क्रारयन्तम्बरं,
मोहारण्य–प्ररूढ–भूरि विषय, द्रु–राशि द्योराशनिम् ।
मायातीत प्रशान्त शान्त वसुधा, साम्राज्यलक्ष्मी प्रियं,
लोकत्रीश ! जिनेशमादि महकं रङ्गो मुनिर्वन्दते ॥ ३

## ७१. (२) (वसन्ततिलका)

श्रीनाभिराजकुलनन्दनकल्पवृक्षः,
सम्प्राप्तसर्वसुरपूज्यतमत्वपक्षः ।
उल्लासयन् रविरिवाङ्गिसराजखण्डः,
दिश्यात्सशर्म वृषभो भवतामखण्डम् ॥ १

त्रैलोक्यलोकचलनेत्रचकोरचन्द्रं,
वैराग्यरङ्गरसभङ्गभयास्ततन्द्रम् ।

संसारसिन्धुतरणाय सुयानपात्रं,
देवं नमामि वृषभं प्रपवित्रगात्रम् ॥ २

येन प्रदर्शितमशेषकलाकलापं,
दुर्बोधजातदुरितौघ कृताऽपलापम् ।
स्मृत्वाऽधुनाऽपि जनता निजकार्यजन्म,
दुर्द्धर्षिणीति हरणोस्तु स नाभिजन्मा ॥ ३

## ७२. (३)

सिद्धा अनेके मुनयो धरेशे,
नाशं च कृत्वा निजकर्मचम्वः ।
निवार्य सम्यग् जनिजीर्णमृत्यून्,
जिनेश्वराणामभिधानि नत्वा ॥ (उपजाति) १

आदेर्जिनस्यादिगणेश्वरश्च,
सिताम्बुजाख्यः शरकोटीभिश्च ।
सिद्धाचले चैत्रिकनाम्निमासे,
गतश्च मोक्षं वरपूर्णिमायाम् ॥ (उपजाति) २

पूर्वार्हतः करणजः द्रविडस्य पुत्रौ,
श्रीद्राविडोऽरा इतरः किल वारिखिल्लः ।
दिक्कोटिभिः परिकरेण गतौ शिवं तौ,
मासे पुरोग बहुलेऽहनि पूर्णिमायाम् ॥ (वसन्ततिलका) ३

सिद्धिं गतः श्रीनमिरभ्रचारी,
सहोदरस्तस्य विनम्यभिख्यः ।
कोटी द्वयेन यतिना च सार्धम्,
तपस्य शुक्ले च तिथौ दशम्याम् ॥ (उपजाति) ४

लक्षैकयुक्तेन मुमुक्षुभिश्च,
सिद्धिं गतः सूर्ययशाधरापः ।
वैश्वानरग्लौ मितकोटिभिश्च,
सिद्धाचले सोमयशा महीशः ॥ (इन्द्रवज्रा) ५

सेलङ्ककः पञ्चशतेन सार्धं,
त्रिकोटिभिर्भूप जयाभिधानः ।
सिद्धिं गतो बाहुबलो मुनीन्द्रः,
समं सहस्रेण गजाधिकेन ॥ (उपजाति) ६

महेन्द्रराट् पञ्चशतेन सार्धम्,
सुभद्रकः पञ्चशतेन साकम् ।
समं सहस्रै र्भुवनप्रमैश्च,
मुमुक्षुभुर्वै दमितारि साधुः ॥ (उपेन्द्रवज्रा) ७

श्रीशान्तिना जिनवरेण यदा च चातु,
र्मास्यं कृतं श्रमणकैश्च समं सुखेन ।
वाचंयमाः खलु तदा गृहिणश्च सर्वे,
मोक्षं गताः स्थिरहृदो विधु सप्तकोट्यः ॥ (वसन्ततिलका) ८

श्रीकण्डुसाधुः सममेककोट्या,
शुभाणगारः शत सप्तकेन ।
कोट्या समं सागरसंज्ञकश्च,
शिलोच्चयेशे प्रगताश्च मोक्षम् ॥ (उपजाति) ९

कर्माणि भित्त्वाऽजितसेन साधुः,
शिवं गतः संयमकोटिभिश्च ।

सत्रायुतेनाऽजितनाथसाधुः,
सुवासरे चैत्रिकपौर्णमास्याम् ॥ (उपजाति) १०

सार्धाष्टकोटिं मितसाधुवर्यैः,
शरीरभूजाम्बुवतीतनूजौ ।
वासे वरे फाल्गुनिके वलक्षे,
स्मरे तिथौ मोक्षपदं गतौ च ॥ (उपजाति) ११

कदम्बसाधुः सममेककोट्या,
सुकालिकः पञ्चसहस्रमानैः ।
श्रीरामचन्द्रः शरकोटिभिश्च,
सिद्धाचले मोक्षपदं प्रजग्मुः ॥ (उपजाति) १२

ते पाण्डवाश्च सह विंशति कोटिभिश्च,
मोक्षं गताः सुमुनिभिश्च जितेन्द्रियाश्च ।
कर्मैन्धनानि सकलानि च नाशयित्वा,
सिद्धाचले च सदिषेऽहनि पूर्णिमायाम् ॥(वसन्ततिलका) १३

साकं सहस्रेण परिग्रहेण,
संन्यासिको वै शुक संज्ञकश्च ।
श्रीसारसाधुः सममेक-कोट्या,
मोक्षं गतौ श्रेष्ठ-धरा-धरेशे ॥ (इन्द्रवज्रा) १४

इत्यादयो मुनिवराः सुशिवं गताश्च,
च्छित्वा च किण्वगहनं तपसायुधेन ।
शूकेन युक्तहृदया गतसर्वविघ्नाः
सिद्धिंगता विमलथे वरतीर्थमीडे ॥ (वसन्ततिलका) १५

## ७३. (४)

(स्रग्धरा)

अर्हन् श्रीआदिनाथः प्रथमजिनवरो देवराजः प्रपूज्यः,
ध्येयस्तीर्थाधिपो यो वरमतिविभवै र्धारितोऽनेकभेदैः ।
कर्ता हर्ता च धर्ता सकलविधिमयः सोऽर्बुदे शैलनाथे,
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥१

सर्वज्ञो वीतरागो विगतकलिमलो बुद्धबोधो विजेता,
निर्नाशो नित्यवासी सकलमतिवरः सिद्धसंख्यस्तु ध्येयः(चिंत्यः)।
विश्वे रत्नेति रामो विविधगतिकरो देवतानां च स्वामी (नाथः),
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥२

'कामो वेच्छार्थदाते' ति सुमतिकलिता अन्यलोकाः स्तुवन्ति,
लक्षै र्लक्ष्यो न यः सम्यगिति च विमता नास्तिका नास्ति किञ्चित्।
शैवाः शैवं च नाथं भज भज भज भोः ! सूरिराजेन्द्रम् एतम्,
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥३

## ७४. ॥ श्रीआदिनाथचैत्यवन्दनानि ॥

(१) (पञ्चचामर)

पुरोगकान्तिकेतनं, सुशान्तिसद्मने घनं,
सुपुण्यशाखिजीवनं, समस्तजीवपावनम् ।
कुपक्षकक्षपावनं, कुरोषवह्निकुम्भिनं,
जिनौघकल्पनन्दनं, नमामि नाभिनन्दनम् ॥ १

अनन्त-सत्तरस्विनं, युगादिमं तपस्विनं,
पुरोगभद्रकेतनं, कुरागदन्तिकेतनम् ।
सुमुक्तिरत्नकेतनं, प्रमोदसौधकेतनं,
जिनौघकल्पनन्दनं, नमामि नाभिनन्दनम् ॥ २

तमस्कधौ जलेन्धनं, स्मरद्रुमे नगादनं,
समग्रसग्विनाशनं, भवज्वरे रसायनम् ।
गतामयं सनातनं, सुखालयं सुदर्शनं,
जिनौघकल्पनन्दनं, नमामि नाभिनन्दनम् ॥ ३

## ७५. (२)

(अनुष्टुप्)

अनन्तसिद्धसौधाय, परमानन्दकारिणे ।
कल्याणवृक्षकन्दाय, दुर्गतिक्लेशदारिणे ॥ १

पापानामपि शन्दाय, संसारार्त्तिहराय च ।
नाभिनन्दनदीप्ताय, तस्मै तीर्थाय मे नमः ॥ २

कर्मशत्रुविजेतारं, देवासुरैः सुसेवितम् ।
शत्रुञ्जयं महातीर्थं, प्रध्यायामि सुभक्तितः ॥ ३

## ७६. (३)

(दोधक)

कञ्चनशैलशिखामुकुटं तं, नाभितनूजमनुत्तमरूपम् ।
आदिजिनेशमहं सुरपूज्यम्, स्तौमि मुदा गुणरत्नवचोभिः ॥१

यत्र पदार्पणतः शुभभावो, ऽनन्तगुणः समुदेति जनस्य ।
मुक्तिमनन्तजनाश्च यतोऽगुः तं गिरिराजमहं प्रणमामि ॥ २

तीर्थङ्करप्रतिमागुणकान्ता, यत्र निरीक्ष्य महागुणभाजः ।
हर्षभराः प्रणता भविलोकाः, तं गिरिराजमहं प्रणमामि ॥ ३

सायककोटिमितैर्मुनिवर्यै-रादिगणी प्रविधाय च यत्र ।
मुक्तिमगादुपवासतपस्यां, तं गिरिराजमहं प्रणमामि ॥ ४

## ७७. (४)

(अनुष्टुप्)

जयत्यादिमतीर्थेशः, त्रिलोकीमङ्गलद्रुमः ।
श्रेयः फलं सदा लोका, यदा लोकादुपासते ॥ १

श्रीमन्नाभिकुलादित्य, मरुदेव्यङ्गज ! प्रभो ! ।
संसाराब्धिमहापोत ! जय त्वं वृषभध्वजः ॥ २

नमस्ते जगदानन्द ! मोक्षमार्गविधायक ! ।
जैनेन्द्र ! विदिताशेषभावस्तद् भावनायक ! ॥ ३

प्रक्षीणाशेषसंस्कार ! विस्तारपरमेश्वर ! ।
नमस्ते वाक्कथातीत ! त्रिलोकनरशेखर ! ॥ ४

भवाब्धिपतितानन्त-सत्त्वसंसारतारक ! ।
घोरसंसारकान्तारसार्थवाह ! नमोस्तु ते ॥ ५

## ७८. (५)

(वसन्ततिलका)

कर्मौघवारणविदारणहीरणारिं,
भव्यारविन्दगणबोधनतिग्म रश्मिम् ।
संसारभीतिकरसागरयानपात्रं,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥ १

क्रोधानिलाशनविनाशनवैनतेयं,
मालाचलाधर–विभेदनवर्यशम्बम् ।
मायालताव्रजविकर्तनमत्तनागं,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥ २

लोभाऽशुशुक्षणिनिमीलनमेघपुष्पं,
रोगोत्कटेन्धनमयं लवितुं कुठारम् ।
द्वेषासितोदकदनाशनचण्डवातं,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥ ३

मोहान्धकारपटलात्ययचित्रभानुं,
अज्ञान वारण खुसावन सामयोनिम् ।
चारित्र नीर जनकाकर पङ्कजन्मं,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥ ४

कारुण्यताप्रततिमण्डलसारणीं च,
सत्योत्तमामरवनाग्रियपारिजातम् ।
अष्टादशास्रवमतङ्गजपञ्चवक्त्र,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥ ५

पू.मु.श्री अभयतिलकगणिविरचितः

शत्रुञ्जयगिरिमण्डन-

## ७९. ॥ श्रीऋषभजिनस्तवः ॥

(वसन्ततिलका)

प्रह्वीभवत्त्रिदशनाथकिरीटकोटि-
रत्नप्रभाजलभराप्लुतपादकूर्मम् ।
शत्रुञ्जये क्षितिधरे विहिताधिवासं,
बद्धाञ्जलिः प्रथमतीर्थपतिं स्तवीमि ॥ १

धन्या इमेऽपि भुवने भुवनाधिनाथ !,
येषां मनोविषयमात्रमलङ्करोषि ।
स्वप्नेऽपि पश्यति कदाचन मन्दभाग्यो,
रत्नोच्चयेन निचितं निजमन्दिरं किम् ? ॥ २

येषां पुन र्मनसि तीर्थपते!ऽसि साक्षात्,
तेषामपूरि सकलापि समीहितालिः ।
प्रत्यक्षतामुपगतोऽत्र महानिधान-
कुम्भः प्रसाधयति कां न हि साध्यसिद्धिम् ॥ ३

दिष्ट्येक्षिते त्वयि जिना!ऽप्रतिरूपरूपे,
रूपामृताञ्जनवरेण विलोचने मे ।
अद्याञ्जिते ध्रुवमहो कथमन्यथाऽश्रु-
बिन्दूनि मे टबटबेति विमुञ्चतः श्राक् ॥ ४

क्वाऽहं नृकीटकणिकः क्व च सिद्धकोटि-
क्षेत्रं पवित्रमतुलं विमलाद्रिरेषः ।
क्वाहं जिनेषु वृषभो वृषभः क्व चैष,
वीक्षोत्सवः कथमहो सुकृतै र्व्यजृम्भि ॥ ५

हे उत्तमाङ्ग ! वृषभेश्वरपादपद्मौ,
स्पृष्ट्वा मुहु र्वितनु नाम निजं यथार्थम् ।
रे रे दृशौ ! रुगरुगापिबतं जिनार्चां,
नासे ! वपुःपरिमलं स्वविभोः प्रतीच्छ ॥ ६

स्पर्धाज् जिनस्य श्रुणुतं श्रवणे गुणान् हे !,
नेतुः स्तवैः सह रसाद् रसने ! रमस्व ।
रे नृत्य नृत्य हृदय ! प्रविमुच्य लज्जां,
प्रस्ताव एष हि पुनः सुलभो यतो न ॥ ७

श्रीपुण्डरीकगणभृन्मुखसिद्धकोटा-
कोटी पवित्रविमलाद्रिशिरोनिविष्टः ।
त्वं नन्द नन्द जय जीव युगादिदेव !,
देयाः स्वदर्शनमहो अभयं सदा मे ॥ ८

पू.पं.श्री देवधर्मगणिविरचितम्
संस्कृत-प्राकृतभाषानिबद्धम्

## ८०. ॥ श्रीऋषभजिनस्तवनम् ॥

(द्रुतविलम्बित)

सुरवरेशनरेशशिरोमणि प्रकटसङ्घटितक्रमपङ्कजम् ।
पढमतित्थयरं रिसहेसरं, तह कहं थुणिमो मुणिमो जहा ॥ १

विमलनाभिनरेशकुलाम्बर-प्रकटनैकविभाभरभासुर ! ।
बहुभवज्जियकम्मतमोभरं, हण पहो ! भुवणिक्कपहायर ! ॥ २

जनमनःकुमुदाकरबोधन-प्रवणपार्वणचन्द्रसमानन ! ।
तुह पलोयणओ मह माणसं, हरिससंभरियं जलही जहा ॥ ३

जगदनर्घ्यगुणप्रगुणैकधी-धनवशीकृतविश्वमनोरथ ! ।
भुवणवंछियकप्पतरो ! सया, मह जिणेसर ! देहि समीहियं ॥४

सदुपदेशसुधारसदूरिता-ऽखिलमहीतलदुःखदवानल ! ।
तियसनाहनिसेविय ! मे पहो !,
कुणसु दुग्गइ-दुक्खनिवारणं ॥ ५

शशिसुधारसकुन्दसमुज्ज्वल-स्फुटयशोविशदीकृतदिग्गज ! ।
मह मणो वि तहा नणु तेण किं,
न हु भवे गुरुयाण [हु] संगओ ॥ ६

सुजननीमरुदेविसुधाभृतोदरसरोवरतामरसोपम ! ।
तुह मुहे रिसहेस ! पुणो पुणो, रमइ मे नयणं भमरोवमं ॥ ७

शमसुधारसपाननिराकृत-प्रबलमोहमहाविषविप्लव ! ।
तयणु देहि पहो ! निरुवद्दवं, सिवसुहं वसुहासुहदायग ! ॥ ८

यः संस्कृतप्राकृतभाषया स्तवं, शत्रुञ्जयश्रीहृदयाधिपस्य ।
कण्ठे विधत्ते मणिमालिकोपमं,
सदा शिवश्रीः श्रयति स्वयं तम् ॥ ९

इत्थं प्रभु श्रीजयपुण्ड्रसूरि-शिष्याणुना संस्तुतपादपद्मम् ।
श्रीनाभिराजेन्द्रकुलावतंसं, सुदेवो मुदे वोऽस्तु युगादिनाथः ॥१०

(उपजाति)

पू. महोपाध्यायश्री हेमहंसगणिविरचितम्

## ८१. ॥ श्रीआदिनाथस्तवनम् ॥

(रथोद्धता)

नाभिनामनरनाथचन्दनं पापतापशमनाथचन्दनम् ।
केवलाक्षरपदाप्तिहतवे केवलाक्षरपदैरहं स्तुवे ॥ १

अमलतमकमलकलनयनकरचरणकं
सकलकरधवलकरवदनमपगतमलम् ।
भरतवरभरतधरजनकमघभरहरं
प्रथममनवरतमवनमत शमदमधरम् ॥ २

प्रणयनतसदशशतनयनधरसदमर-
प्रततततकनकमयकमलगतपदतलम् ।
अपरमतगहनवनदहनवनदवसमं
प्रथममनवरतमवनमत शमदमधरम् ॥ ३

भवनवनगगनतलसदनसदमरसदः-
प्रसरपरसनवरसरचननवनवनवम् ।

दधतममलममलमपशकलजगदवगमं
प्रथममनवरतमवनमत शमदमधरम् ॥ ४

रजतमयकलशशरदमलजलधरशरत्-
प्रगतमलधवलकरगगनगजसयशसम् ।
अचलतरपरमपदलनयकरमरजसं
प्रथममनवरतमवनमत शमदमधरम् ॥ ५

कमलभवकमलशयनगरहरशरभव-
प्रवरलसदमरमददमनपरमदनहम् ।
समसमवसरणवरवरणगतमतमसं
प्रथममनवरतमवनमत शमदमधरम् ॥ ६

प्रबलतमजवनगमपवनपरवशचलत्-
फलददलचपलतरकरणहयवशकरम् ।
प्रणतजनजननजरमरणभवभयहरं
प्रथममनवरतमवनमत शमदमधरम् ॥ ७

स्वजनधनकनकहयपदगमदकलगज-
त्यजनपरमवतमसहरणदशशतकरम् ।
करणरणरणकभरशरभनवजलधरं
प्रथममनवरतमवनमत शमदमधरम् ॥ ८

चरणसरवकरणगतदशकहतहयवचः-
प्रकटकरवचनमयसमयधरगणधरम् ।
सततमशरणकजनशरणपदशतदलं
प्रथममनवरतमवनमत शमदमधरम् ॥ ९

असमशमभवनसममशमहयवनमहं
कलहवनदहनशमसजलनवजलधरम् ।
कपटनटनटनसमघटनभवगतरसं
प्रथममनवरतमवनमत शमदमधरम् ॥ १०

कलशयवचमरशरमकरवररथपद-
ध्वजनपदकमलतललनरतशतमखम् ।
डमरभरगरलधरहननवनधरसखं
प्रथममनवरतमवनमत शमदमधरम् ॥ ११

नरकगजकलभदलदलनखरनखरख-
प्रखरगजमथनसममचलपदपथरथम् ।
तमनवमनवमरससवनगतमलचयं
प्रथममनवरतमवनमत शमदमधरम् ॥ १२

श्रीसोमसुन्दरगरिममन्दिरसुमुनिसुन्दरपूजितं
श्री आदिनाथं गुणसनाथं य इति विनुवति सन्ततम् ।
तेनाशुभासुरनरसुरासुरराजपदवी लभ्यते
क्रमतोऽपि विमला मुक्तिकमलाकामिनी परिरभ्यते ॥ १३

(हरिगीत)

पू.मु.श्री चतुरविजयविरचितम्

## ८२. ॥ प्रथमस्वरमयंश्रीप्रथमजिनस्तवनम् ॥

(शशिकला)

सकलकमलदलकरपदनयन !
प्रहतमदनमद ! भवभयहरण ! ।

सततममरनरनतपदकमल !
जय जय गतमद ! मदकलगमन ! ॥ १

अमलकनकनगवर ! गतरमण !
क्षतजननमरण ! शमरससदन ! ।
श्रमणकमलवनतपन ! गतभव !
भवभयमपहर मम जनमहन ! ॥ २

अभयद ! भवदरजलधरपवन !
सबलमदनवनदहनजलधर ! ।
व्यपगतमद ! शशधरवरवदन !
जगदघहर ! जय ततनयसमय ! ॥ ३

तरलकरणहयवरदमनकर !
कनककजनवकगमन ! वरवचः ! ।
प्रथय परमपदमपदर धवलध्वज !
घनघनवररव ! जनशरण ! ॥ ४

परमपदरमण ! कमनकजरद !
शशधरकरहरनगधवलयशः ! ।
परमतकजगज ! सकलजनमनः
फलकरलसदमरनग ! रचय शम् ॥ ५

इत्येवं प्रथमस्वरेण सकलाभीष्टार्थकल्पद्रुमः
सद्भक्त्या प्रथमो जिनः स्तुतिपथं नीतो युगादिप्रभुः ।
दोषान् मेऽवगणय्य विश्वजनतात्राता गुणस्थानकं
दुर्भेद्यं प्रथमं भिनत्तु सपदि श्रेयः श्रियं यच्छतात् ॥(शा.वि.)६

पू. मु.श्री जिनपतिविजयविरचिता

विरोधालङ्कारमण्डिता

## ८३. ॥ श्रीऋषभजिनस्तुतिः ॥

(आर्या)

प्रीणन्तु जन्तुजातं, नखसुभगा भावुका न नखसुभगाः ।
अभिजातस्यापि सदा, पादाः श्रीनाभिजातस्य ॥ १

वृषलाञ्छनोऽपि सुवति, प्रभूतशोऽकार्तिकेयमधिनाथ ! ।
नन्दयति न तामरसं-सदं भवान् नाभिभूतोऽपि ॥ २

पुरुषोत्तमोऽपि न त्वं, जडपतितनयाऽनुरागमुद्वहसि ।
उद्दामधाम विन्दसि, तपसा नालीकबन्धुरपि ॥ ३

व्यक्तविजयोऽपि समीति-व्यासक्तो मृगयसे न गाङ्गेयम् ।
न सुरापगोपरोधं, रचयन्नापि देव ! भीष्मोऽसि ॥ ४

न परिष्वजसे सरसां नाथ ! नदीनोऽपि सुरतरङ्गवतीम् ।
त्वं पूर्णकलावानपि न वर्ण्यसे कैरवाह्लादी ॥ ५

अवगणितनाकिविभवो, नाथ ! सुपर्वालयोऽपि दधते स्म ।
तव मुक्तसुरतरुचयो नो कलधौतश्रियं मुनयः ॥ ६

त्वं प्रद्युम्नोऽपि सदा, पद्माया मेलकं न विदधासि ।
न सुरालयमाकाङ्क्षसि, जिनाग्रजन्माऽपि जगतीश ! ॥ ७

काव्ये पनितोऽसि विभो ! सत्सूत्रामर्षितां दधानोऽपि ।
दीक्षायां गीष्पतिभिः, स्फुटयन्नपि दानवर्षित्वम् ॥ ८

नारीहितकरनवसुर-तमतपरप्रमदया परिष्वक्त ! ।
त्वमवश्यसि तमिन ! सदाचारोपासितमहो धर्मम् ॥ ९

सज्जातिमशोकमहो, सत्करण्डं(णं?) बन्धुजीवमतिमुक्तम् ।
सुमनःप्रकृतिमपि त्वां, न सङ्गिरन्ते परागभृतम् ॥ १०

अप्यष्टापदरुचिरपि, दीव्यस्यक्षैर्न जातु चतुरङ्गैः ।
त्वं देव ! नाभियोग्यपि कथमसि विदरोदरव्यसनः ॥ ११

त्वं सर्वदाऽऽरुणानिह, विभोऽञ्जसा पल्लवान् न पुष्णासि ।
सरसान् प्रसूनपुञ्जान्, कलिकोपचितानशोकोऽपि ॥ १२

निष्कुषितवृषनिकषो, जीवहितो ध्रुवसि वैबुधविबाधम् ।
चित्रमकृतकविरागो, नाथ ! त्वं पूर्वदेवोऽपि ॥ १३

न विलासी न न खजयी, विभो ! न नागोपघातनिष्णातः ! ।
अलमनवमांसरुचिरसि,
कमलविरोध्यपि कथमिव त्वम् ॥ १४

मदमभ्यासिष्वङ्गं, नर्मदया सौहृदं च निर्मुच्य ।
अयि सारङ्गविपक्षं, त्वं भजसेऽनेकपोऽपि कथम् ॥ १५

जगतो बन्धुरबन्धुः सुधीरधीर्विधुरनरकपरिपन्थी ।
समुदितरुचिररुचिस्त्वं, विराजसे मधुरसुरभिवपुः ॥ १६

अकलत्रं सकलत्रं, अमहा समहा रमा अमा नस्त्वम् ।
अत्रासः सत्रासो विधेह्यदम्भः सदम्भः श्राक् ॥ १७

जीवा भीतिमभीतिं, प्रमादमलमप्रमादमश्नुवते ।
अप्रतिपदं प्रतिपदं, विपदमविपदं तवाभक्तेः ॥ १८

अभ्यङ्गप्रभवोऽपि, त्वमीश ! नाभ्यङ्गभूः कथं भवसि ? ।
अपि सुरदेवतानयो-ऽमरुदेवानन्दनश्चित्रम् ॥ १९

नो पाठीनक्षोभं, न वारिपूरं न नक्रमकरमुदम् ।
नतरङ्गभरं पुष्यति सरस्वती देव ! तव चित्रम् ॥ २०

अर्यमतनयाभेद्यपि, भवानहो कं सदस्युतां धत्ते ? ।
अपि जिष्णुतामजात-द्विषन्नपि श्रीपतिः स्मरताम् ॥ २१

कविरपि सुमनः कुरुतां,
जिन ! विनतानन्दनोऽपि भोगित्वम् ।
विबुधोऽपि दानवत्वं, लभते लोकस्तव स्तवतः ॥ २२

बत बहुकरेणुवाहाः, कौपीनपरिग्रहाः कलितरथ्याः ।
क्षितिभाजस्त्वद्भक्ते-र्विदन्ति महापदं जीवाः ॥ २३

बहुसत्त्वस्त्वद्भक्ते-र्विभो ! न मीनाकुलो न तोयमितः ।
लोकः समुद्रसदृगपि, न मन्दरक्षोभितो भवति ॥ २४

विगताधिकोपतापा, नरो गविकलास्त्रियो बताश्नुवते ।
अपि चामीकररुचिराः, सत्तिलकालीर्भवद्भक्ताः ॥ २५

चित्रमवशायपुषो-ऽप्यजडा
कान्त्याऽपि नखचिताः खचिताः ।
पादावलक्षगोस्तव, पादान् नृणां वितन्वन्ति ॥ २६

बहुधातुरोचितमपि, स्यादित्यादिपदसिद्धसाधुपदम् ।
सस्वरसवर्णसुभगं, जयति तव श्रुतमपदशास्त्रम् ॥ २७

तव शासनमनुपहित-प्रमाणमप्यप्रमाणवन्नाथ ! ।
कः साधिमोहसाधन-मपहृतमोहमपि न स्तौति ॥ २८

कथकोऽपि सप्तभङ्ग्या नव-
भङ्ग्या ज्ञापकः कथं भवसि ? ।

कृतनवतत्त्वाव्यञ्जक ! इन !
नव तत्त्वानि विशसि कथम् ? ॥ २९

तिथिरप्यतिथिप्रवरा, चतुर्थ्यसौ तापदानतापदावि(चि?)ता ।
असिताऽपि शुचिधुरीणां, यस्यां नाथ ! त्वमच्योष्टाः ॥ ३०

नूतनबकुलश्रीः, सज्जपावजाता मधोरपि श्यामा ।
इयमष्टमीश ! यस्या-मजनिष्ट जवानदीषिषूः ॥ ३१

ज्ञानं तव यत्राभूत् फाल्गुनिकैकादशी सुभद्राऽपि ।
कृष्णारुचितेयमहो, अभिमन्युविरोधिनी जज्ञे ॥ ३२

चित्रमकषायवासा, जिन ! शुचिधुर्या सुपर्वबहुलाऽसीत् ।
शितिरपि तपस्विनीयं, त्रयोदशी यत्र मुक्तस्त्वम् ॥ ३३

अधिक्षमाराजित नाभिसूनो ! त्वमक्षमाराजित भक्तिभाजाम् ।
एवं विरोध-कृतसंस्तवोऽपि,
छिन्द्याद् विरोधं जिनपत्यधीश ! ॥ (उपजाति) ३४

पू.मु.श्री उदयसागरविरचितम्

## ८४. ॥ श्रीऋषभजिनस्तवनम् ॥

(वसन्ततिलका)

त्रैलोक्यलोककुलकल्पितकल्पनैक-
कल्पद्रुमं क्रयणमन्त्रिदशाधिनाथम् ।
भक्त्या भजध्वमरिहङ्कुकुरङ्गनाथं
भो भो जना ऋषभनाथमनाथनाथम् ॥ १

चञ्चच्चरित्रशुचिदर्शनसुप्रधान-
ज्ञानश्रियं वितरणे रजताद्रिनाथम् ।
आराधयध्वमुरुधैर्यजिताद्रिनाथं
भो भो जना ऋषभनाथमनाथनाथम् ॥ २

सौभाग्यभाग्यकमलाकमलायमाना-
निद्राननाकृतिनिरस्तनिशाधिनाथम् ।
स्वानैः स्मरध्वमधिमारुतनामनाथं
भो भो जना ऋषभनाथमनाथनाथम् ॥ ३

विद्युत्प्रचण्डरुचिदण्डदवाग्निपिण्ड-
जैत्रप्रतापभरभग्नदिवाधिनाथम् ।
नित्यं नमध्वमुदयाब्धिजलाधिनाथं
भो भो जना ऋषभनाथमनाथनाथम् ॥ ४

श्रीऋषभनाथ नामप्रभुः प्रभूतप्रभुत्वगुणधाम ।
इति मेदपाटमुकुटः स्तुतो जयतु कामकामकुटः ॥ ५

पू.मु.श्री भावदेवविजयविरचितम्

## ८५. ॥ श्रीऋषभजिनस्तोत्रम् ॥

(अनुष्टुप्)

जय त्रिभुवनाऽधीश !, श्रीयुगादि-जिनेश्वर ! ।
नम्रामर-शिरोरत्न-दीपनीराजितक्रम ! ॥ १

अज्ञान-तिमिरं हत्वा, नवभानुरिव प्रभो ! ।
प्रकाशित-जगद्विद्या, व्यवहार ! नमोऽस्तु ते ॥ २

निष्कषायतया चेतः, पटे शुभ्रगुणे तव ।
रागो लगतु मा किन्तु, तेनाऽरञ्जि कथं जगत् ? ॥ ३

सद्गन्ध-शीतल-स्वाच्छौ, नत्वा पादौ तव स्तवम् ।
कृत्वा श्रुत्वा च नाथ ! स्या-दक्षाणां युगपत्सुखम् ॥ ४

त्रिलोकीसुभगं वीक्ष्य, त्वां चलाया अपि प्रभो ! ।
स्तम्भ-स्वेदार्द्रता-भावो, जायते कस्य नो दृशः ? ॥ ५

शमार्द्रसुकृताऽऽख्याती, भवभ्रान्तिभवं मम ।
त्वत्पाद-पादपच्छाया तापं निर्वापयेच्चिरात् ॥ ६

तच्चित्रं यन्निरालम्बं, चिरं भ्रान्तं भवार्णवे ।
त्वां चाऽऽलम्ब्य मनो मेऽद्य शमनीरे ममज्जयत् ॥ ७

धर्मकोशाद्धनं दत्ते, सेवकेभ्यः प्रभुर्भवान् ।
प्रसन्नः समता वस्तु, कस्मैचन पुनर्निजम् ॥ ८

तथा मम जगन्नाथ !, प्रसीद नतवत्सल ! ।
यथा क्षणमपि स्वामिन् !, नैवोत्तरसि चेतसः ॥ ९

सर्वोऽपि वदति श्राद्धो, यत्त्वं मे नाथ ! जीवितम् ।
नाहं तु जीवितं येन, चलं मे त्वं तु निश्चलः ॥ १०

न कुले न बले रूपे, न च श्रीषु न ते विभोः ।
यत्किञ्चिद्वीतरागत्वं तत्र लीनं मनो मम ॥ ११

नानानामानि सङ्कल्प्य, विवदन्तां विचक्षणाः ।
मन्दमेधास्त्वहं नाथ ! नीरागत्वे तव स्थितः ॥ १२

विकल्पकल्पनालोल-कल्लोलैर्नाथ ! रक्ष मे ।
धूयमानं मनःपोतं, यत्तरामि भवाम्बुधिम् ॥ १३

वपुः शस्तं प्रसन्नाः दृग्, जन्तु-रक्षाकरं वचः ।
अतस्त्वयि कथं नाथ !, सतां न रमते मनः ॥ १४

भ्रमन्तु भावाः प्रस्तावात्, इतरे तारका इव ।
सर्वज्ञ ! तव तत्त्वाद्रौ ध्रुवीयति मनस्तु मे ॥ १५

अलं परिग्रहै रम्यै-रपि क्लेशकरैः प्रभो ! ।
सदाऽऽनन्दमयं देहि, भावदेव ! प्रियं पदम् ॥ १६

पू.मु.श्री सर्वविजयविरचिता-

## ८६. ॥ श्रीऋषभजिनस्तुतिः ॥

वृषभ चिरञ्जय रञ्जयः रञ्जयः रञ्जयमयरचकीर्तिचय ।
प्रणतसभासुरभासुरभासुरभासुरयमर्पय परेषाम् ॥ १

सुदिनवितरणे तरणेतरणेतरणे भवोदधेर्विदधे ।
नरहरिचन्दनचन्दनचन्दनचन्दनमधीश गुणैः ॥ २

सुकृतरसमयसमयः समयः समयन्नसाधनानाम् ।
यत्र सुधारय धारय धारय धारयसि मयि नयनम् ॥ ३

विबुधानन्दन नन्दननन्दननन्दनपरस्य महिमभरः ।
त्वयि जातरसा तरसातरसातरसादरं तदियम् ॥ ४

जयसि सकलया कलया कलयाकलयावकाभरकरचरण ।
अवनिसु नयनानयनानयनानयनानन्दिजिनेन्द्रनकम् ॥ ५

त्वामनुपरमापरमापरमापरमासमाप्तकलिकलुषम् ।
मां च निभालय भालय भालय भालय निलीनितया ॥ ६

चिरमुरसि वहेसिवहेसिवहेसिवहेमधवलं गृहवसते ।
विरतरामतृजिनजिनजिनजिनमाणिक्यसर्वतो विजयम् ॥ ७

पू.मु.श्री ललितकीर्तिशिष्यविरचितम्

शत्रुञ्जयमण्डन-

## ८७. ॥ श्रीऋषभजिनस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

श्रीसिद्धाचलमाश्रितस्य विलसन्मार्तण्डबिम्बप्रभा-
हृद्यामोदसमन्वितैः सुरवरैर्योऽहर्निशं सेव्यते ।
स स्ताद् वोऽखिलसिद्धिसङ्गमकृतौ मन्दारवृक्षोपमः
श्रीनाभेयजिनस्य सुन्दरतरः शोभाभरः पादयोः ॥ १

नम्रानेकविवेकिवासवशिरःकोटीररत्नांशुक-
व्रातक्षालितपादपङ्कजरमाद्वैताद्युगादिप्रभुः ।
भूयादग्रिमभूमिदास्तिकनयात्त्वन्नामभाजां नृणा-
मेनःपङ्कनवाम्बुदः कलिमलप्रध्वंसनीरन्ध्रजः ॥ २

सौन्दर्यादिगुणाद्धुताऽमितकलाकल्याणवाणी लसत्
प्रोत्तुङ्गस्तनहारमौक्तिकलता केन(?)प्रभोरास्यगा ।
दन्तश्रेणिरलं प्रमोदमतुलं नो कस्य दत्ते विभो-
र्दन्तालीमिषतोऽथवास्यकमले हंसालिरानन्दने ॥ ३

त्वल्लावण्यमयो वपुर्द्युतिभरः किं वर्ण्यते सार्व ! हे
ज्योतीरूप ! जगत्पतेस्तव कलां जीवोऽपि वक्तुं क्षमः ।
किं नोऽद्यापि मयाऽनया खलु धिया शक्रादिपूज्यक्रमः
स्वर्गङ्गाजलधौतकाञ्चनगिरेः शृङ्गाग्ररोचिःप्रभः ॥ ४

योऽयं निश्चलतामगाहत भवत्पादाब्जसङ्घट्टतः
कल्पान्तेऽपि घनाघनं डलवडी(?)विध्वंसदन्तावलः ।
आस्तां ते महिमा समग्रजनताऽभीष्टार्थसम्पादकः
सोऽयं दृकाघ(?)माश्रितो वरतिशः(?)शत्रुञ्जये मुक्तिदः ॥ ५

सज्ज्योतिर्मय ! मञ्जुलाशयशय ! प्रक्षीणकर्मोच्चय !
प्रोद्दामातिशय ! प्रसिद्धविजय ! स्याद्वादविद्यालय !।
विस्फूर्जत्समय ! प्रसन्नहृदय ! त्रैलोक्यदत्ताभय !
प्रध्वस्तस्मय ! भव्यपङ्कजवनीसूर्योदय ! त्वं जय ॥ ६

ये कुर्वन्ति धृतोत्सवास्तव विभो ! पादद्वयीं मस्तके
भक्तेर्भूमितया विपक्षदलनीं मन्दारवल्लीनिभाम् ।
शुद्धाचारविचारसारकलितैर्भूतं विशुद्धात्मभि-
स्तैर्लोकान्तिमवर्तिनः शमधरैर्विश्वत्रयस्योपरि ॥ ७

किं त्रैलोक्यजनाङ्ग भिन्ददति कसद्भावे भवान्नो रवि-
र्नित्योद्योतकरस्तमश्चयहरः श्रीसिद्धिरामावरः ।
मिथ्यावादिजनौघघूकनिकरैर्दृश्यो न भूमीतले
ब्रह्माध्वा भगवान् गतास्तसमयो गम्यो न राहोः किल ॥ ८

त्वद्वक्त्राद्भुतदुग्धसागरवरादुत्थैर्वचोभिर्वनैः
सिक्ता ये भविनस्त एव विरता मोहप्रमीलारयात् ।
त्यक्त्वाऽनन्तभवार्त्तिदामकलुषास्तेजोमयं चिन्मयं
भुञ्जन्ते शिवशर्म सुन्दरधियः शुद्धाशयाः शाश्वतम् ॥ ९

किं मन्त्रैर्जपजापकैर्वसुकरैः किं राजसेवादिभिः
किं विद्याविभवैः किमौषधवरैः किं देवताराधनैः ।
नित्यं चेद्हृदयालये तव विभो ! नामापि नो सम्भवे-
द्दुस्थानां भविनामलक्ष्यमहिमा प्राचीनकर्मोदयात् ॥ १०

त्वं पीयूषनिधिस्त्वमेव करुणासिन्धुः सदा सङ्गत-
स्त्वं वीजी जननी त्वमेव शरणं त्वं बन्धुवर्गो गुरुः ।
त्वं त्राता त्वमचिन्त्यचिन्तितमणिस्त्वं सद्गतिस्त्वं मति-
स्तत्किं साधुजने कृपां न कुरुषे श्रीमद्युगादीश्वर ! ॥ ११

कलशः-

इत्थं सर्वसुरासुरेन्द्रमहितः श्रीनाभिवंशार्यमा
जागद्रूपसुरूपसंश्रय इति ख्यातः क्षितौ योगिभिः ।
श्रीमच्छ्रीललितादिकीर्तिसुगुरोः शिष्येण फुल्लद्रुचे-
र्विज्ञप्तोऽभिनताय मञ्जुलमहोराजाभिधानेन सः ॥ १२

पू.मु.श्री कर्मचन्द्रविजयविरचितम्

# ८८. ॥ श्रीऋषभजिनाष्टकम् ॥

(द्रुतविलम्बित)

सकल मङ्गल मङ्गल मन्दिरं, सुरनरेन्द्र सुसेवित पत्कजम् ।
विमल केवलभासन भास्करं, नमत नाभिकुलेश्वर नन्दनम् ॥१

ऋतु विकासित पुष्प सुलोचनं, विदलितो द्रति नाथ निकेतनम्।
द्रुत विकस्वर पङ्कज तुण्डनं, नमत नाभिकुलेश्वर नन्दनम् ॥२

दहन क्रोध कदम्ब घनावनं, सकल पुद्गल सङ्ग विवर्जितम् ।
प्रवचनामृत धारण धीरपं, नमत नाभिकुलेश्वर नन्दनम् ॥ ३

भविक बोधन शोधन शर्मदं, शुभ सुशील गुणाकर शोभनम् ।
सकल राग विचूर्णित कुन्तलं, नमत नाभिकुलेश्वर नन्दनम् ॥४

प्रविकटोत्कट सङ्कट भञ्जनं, प्रबल मर्मठ कर्मठ खण्डनम् ।
विकट काम घटापट स्फोटनं, नमत नाभिकुलेश्वर नन्दनम् ॥५

भुवन भूषण राजि सुशेखरं, प्रणत दानव मानव किन्नरम् ।
विबुद्ध वृन्द सुतारण तत्परं, नमत नाभि कुलेश्वर नन्दनम् ॥६

नरवरैक ललाम प्रभाकरं, ललितमूर्ति जगज्जन मोहनम् ।
अखिल वस्तु विवेक प्रदीपकं, नमत नाभि कुलेश्वर नन्दनम्॥७

हरिहरादि विबोधित सादरं, मद मधुत्कर गुञ्जित पत्कजम् ।
परमबोध धनाधिपमक्षयं, नमत नाभिकुलेश्वर नन्दनम् ॥ ८

विद्वन्मण्डल शालि कल्प लतिका विस्तारेण प्रोद्भटं,
श्रीमत् श्रीकमलानन श्रुतधर श्रीमद् भवानन्ददः ।

तच्छिष्येण कृतं सुभक्तिसहितं स्तोत्रं जगन्मङ्गलं,
निक्षेपैकके कर्मचन्द्र विहितं चाब्दं वरं सुन्दरम् ॥(शा.वि.) ९

पू.मु.श्री हंसचन्द्रशिष्यविरचितम्

शत्रुञ्जयमण्डन

## ८९. ॥ श्रीआदिनाथस्तवनम् ॥

(द्रुतविलम्बित)

नमत मानववञ्छितदायकं, सकलमूर्तिमतां सुखकारकम् ।
दशनकान्तिपराजितमौक्तिकं, दुरितदुर्गतमोहनिवारकम् ॥ १

कनककोमलसञ्चरसुप्रभं, भुवनभक्तजनाम्बकसन्निभम् ।
कुमतवारणतीव्रमृगप्रभुं, मथितमासुतमानमहं विभुम् ॥ २

प्रथितनाभिधराधवदेहजं, भवपयोधिविनासनकुम्भजम् ।
प्रबलकर्मविवर्जितनिर्मलं, दलितजन्म-जरा-भयशीतलम् ॥३

रुचिरमोदविधायकसोदरं, भविकवार्जविबोधनभास्करम् ।
मुदिरगर्जितगोगणमीकरं, विषमदुष्टविपद्धरमाकरम् ॥ ४

नर-नरेन्द्र-सुराधिपसेवितं, वृषभलञ्छनपादविराजितम् ।
प्रथमयोगिवरं जगतां मतं, प्रथमपारगतं प्रणमामि तम् ॥ ५

श्रीशत्रुञ्जयमण्डन, आदिनाथो गुणाकरः ।
श्रीहंसचन्द्रशिष्येण, मण्डनेन स्तुतो मुदा ॥ (अनुष्टुप्) ६

पू.उपा.श्री ज्ञानप्रमोदगणिविरचितम्

कोट्टदुर्गमण्डन-

## १०. ॥ श्रीआदिनाथ-स्तोत्रम् ॥

(वसन्ततिलका)

विश्वप्रभुं प्रणतनाकिकिरीटरत्न-
घृष्टांह्रिपीठमसुमत्सु कृपाप्रयत्नम् ।
चेतस्समीहितसुरद्रुमतार्घ्यसेवं,
भक्त्या स्तवीमि सुतरां जिनमादिदेवम् ॥ १

श्रीनाभिभूपकुलपुष्करपद्मिनीपं,
लोकत्रयीसकलभावविभासदीपम् ।
तत्त्वाप्तये भजत भव्यजनाः ! कृतार्थं,
प्रोद्यच्छरच्छशिमुखं च युगादिनाथम् ॥ २

प्रह्वाङ्गिसङ्गकरुणोपकृतौ गरिष्ठः,
प्रोद्दामकामकरितुङ्गमृगारिरिष्टः ।
सत्कोमलक्रमणसंवृतवामपद्मः,
पायात् स वः प्रथमतीर्थकरोऽर्थसद्मः ॥ ३

स्फूर्जद्धरिप्रभूतिदेवविलक्षणोरु-
नानाचरित्रसुचमत्कृतविष्टपोरुम् ।
भक्ताङ्गिनिर्मितमनोज्ञकुनाभिजातः,
स श्रीप्रदोऽस्तु भविनां किल दत्तसातः ॥ ४

आनम्रदानवसुरेश्वरचञ्चरीक-
श्रेण्या निषेवितमनारतमस्तपङ्क ! ।

पद्माश्रयं भविनृणां ननु मानसं ते
पादाम्बुजं समभिनन्दतु पूतकान्ते ! ॥ ५

त्रैलोक्यसंस्फुरितकेवलवासरेन्द्रं,
शत्रुञ्जयावनिधरेश्वरमाप्तभद्रम् ।
विस्मेरचम्पकमणीचकचन्दनाद्यै-
र्धन्याः प्रभुं समभिपूजयताऽऽर्द्रहृद्यैः ॥ ६

पर्युल्लसद्गुणमणीरुचिराकराय,
प्रोत्तुङ्गमोहगिरिभिद्भिदुरेश्वराय ।
क्रोधादिशत्रुगणनिर्जयसाधनाय,
तुभ्यं नमो वृषभसत्तमलाञ्छनाय ॥ ७

विश्वातिशायिमहिमागरिमप्रतानं,
चक्रेश्वरीसविधगोमुखसेव्यमानम् ।
भक्तिप्रकर्षपुलकाञ्चितकायदेशाः,
श्रीमारुदेवमभिवन्दत भो नरेशाः ! ॥ ८

दुःखं विभो ! व्यपनयस्व विनम्रभूप !
नाभेस्तनूजरुचिनिर्जितजातरूप ! ।
पुण्याम्बुधे ! प्रणिपतज्जनमण्डलानां
धर्मैकताननरमानसनिर्मलानाम् ॥ ९

.........................................

निःशेषसत्त्वकुमुदालिनिशाकराभम् ।
विष्वक्स्फुरत्सुरसरित्सलिलावदात-
कीर्त्तिं नराः ! श्रयत तीर्थपतिं नितान्तम् ॥ १०

तत्कौशलोद्भव ! भवार्णवपोत ! नेत-
र्नित्यं क्षमाबहलधूर्वृषभामजेत ।
सम्यग्दृशां प्रजनयस्व पराद्ध्र्यबुद्धिं,
नूनं जगत्त्रितयसेवित ! कर्मशुद्धिम् ॥ ११

वैविष्टपत्रयजनार्त्तिविनाशनाय,
शश्वच्छुभव्रततिपङ्क्तिघनाघनाय ।
व्याकोशपङ्कजदलोपमलोचनाय,
त्वादीश ! ते जिन ! नमोऽस्तु सनातनाय ॥ १२

निस्यन्दम(भ)न्दसुखकन्ददमाभिराम !,
सत्यश्रियोऽधिप ! जिनाधिपते ! प्रकामम् ।
वृन्दारकद्रुम-मणी-वरधेनुकुम्भं,
कामप्रदं पदयुगं तव नौम्यदम्भ ! ॥ १३

इत्येवं कोट्टदुर्गे जिनगृहकमलाशेखर ! प्राक्प्रजेशः,
नाथ ! स्तोत्रं पवित्रं तव सुखदमिदं भूमिभावैरधीश !
श्रीमच्छ्रीरत्नधीरस्य च परमगुरोः सप्रसत्तेर्जिनेन्द्र-
लक्ष्म्यै ज्ञानप्रमोदाभिधमुनिरचितं तद्विदां स्याद्वितन्द्रः ॥ १४

(स्रग्धरा)

पू.मु.श्री विनयहंसगणिविरचितम्

## ११. ॥ श्रीआदिनाथस्तवनम् ॥

सर्वैश्वर्यमयार्यवर्यमहिमं(?)यत्प्रातिहार्याष्टकं,
दिष्ट्या दृष्टिपथेन दृष्टमतनोत्केषां न बोधिश्रियम् ।
श्रेयोऽनन्तसुखोदयं च तमहं सार्वं युगादिं स्तुवे,
मानुष्यैकभवावतारसफलीकारप्रकाराप्तये ॥ १

स्वामिंस्त्वं घनघातिकर्मकदनैर्जातोऽस्यशोको हि तत्,-
स्थाने शोकतरुर्बभूव यदिहाशोकः स्वयं किं त्वयम् ।
जज्ञे केवलसेवयेव जिन ! ते नम्राङ्गिनां स्युर्द्वया,-
**च्चैत्यद्रुः** किमिवैष शोकहरणे बद्धप्रतिज्ञोऽभवत् ॥ २

जिग्ये येन हृषीकसेनमखिलं पञ्चप्रपञ्चं प्रभो !
मिथ्यात्वोदयमव्रतं च भवता दध्रे व्रताचारशम् ।
तेनानन्दविनोदमेदुरहृदस्ते देशनोर्व्यामिवाऽ,-
स्वप्नाः किं किल पञ्चवर्ण**कुसुम**श्रेणीं ववर्षुर्विभो ! ॥ ३

स्वामिन्नस्मयविस्मयोदयिमुदासारप्रसारस्तव,
व्याख्यानावनिवेददिक्षु दिशतो धर्मं चतुर्धा ध्वनिः ।
दिव्यः श्रव्यरसश्चतुर्मुखजुषः संविस्तृतः सर्वतः,
किं जेतुं चतुरः कषायविषयान्निःशेषदोषप्रभून् ॥ ४

तत्त्वातत्त्वविवेकिवाक्यविभव ! त्वय्येव विश्रामिणी,
सम्यग्ज्ञानचरित्रदर्शनमयी रत्नत्रयी त्रौकते ।
त्रैलोक्योन्नतिपारिणी शिवपदानन्दोदयिन्यद्भुता,
नान्यत्रेव ततः किमस्ति शिरसि **छत्रत्रयं** ते विभो ! ॥ ५

रागद्वेषमहाद्विषौ विधिनिधिध्यानद्वयाद्वैततः,
सर्वाजय्यमहौजसावपि सुखेनेश ! त्वया निर्जितौ ।
येनानन्तभवावतारनिरतौ तेनेव किं तज्जयो-
द्भूते ते यशसी **सुचामर**मिषात्पार्श्वद्वये संस्थिते ॥ ६

कष्टारिष्टनिकृष्टपुष्टनिकटादृष्टादिदोषद्विपो-
न्मादोद्भेदभिदा त्वमेव पुरुषेष्वेकोऽसि सिंहः स्वयम् ।
त्रैलोक्ये भविनां शिवाध्वसुपथां येनेव तेनोन्नतं,
दिव्यं किं शुशुभे शुभोदयमयं **सिंहासनं** सार्व ! ते ॥ ७

त्वय्येवोदितमक्षयोदयजयं ज्ञानादिकं क्षायिकं,
सर्वास्वप्रकृतिस्थितं भवभयच्छेदप्रदं बोधिदम् ।
तेन त्वं त्वरितं तदर्पणविधेर्भव्यात्मनस्तारये,-
ऽतीवाज्ञप्तिपदं तनोति सुगिरा किं **दुन्दुभि**स्ते पुरः ॥ ८

सार्वं सर्वतमोहहृत्वपदवीसिद्ध्यै स्वयं सेवते,
किं बिम्बं सवितुर्महोदयमयं तेजोऽत्र किं वाऽद्भुतम् ।
अष्टादृष्टमहेन्धनातिदहने वह्निः स्वशक्ति प्रभुं,
किं वा प्रार्थयते तवेति विबुधो वक्तीश ! **भामण्डलम्** ॥ ९

दिव्याशोकतरुं सुरैः प्रकटितं सूतप्रकाशं ध्वनिं,
नव्यश्रव्यपदार्थसार्थसुपथं सिंहासनं चामरम् ।
**छत्रैकत्रितयं** मनोहररवं सद्दुन्दुभिर्भासुर,-
ज्योतिर्मण्डलमित्यवेक्ष्य न मुदस्ते कस्य तेनुः प्रभो ! ॥ १०

इत्थं स्तौति मुदा (?) मुदाररसभृद्यः सार्व ! सर्वोत्तरा-
मेयैश्वर्यमहार्यमार्यसुखदासंख्यश्रियामाश्रयम् ।

निष्णातः सविवेकहर्षविनयश्रीसूरिहस्वेहित,-
श्रेणीं संश्रयते सुबोधिविधिना श्रीधर्महंसोदयात् ॥ ११

पू.मु. श्री विनयहंसगणिविरचितम्

समस्यापदास्पदं

## १२. ॥ श्रीऋषभजिनेन्द्र-स्तोत्रम् ॥

(मालीनी)

मतिरणुसममानामेतवादीशमेरू -
न्नतगुणनुतिमाप्तो दुःषमायां भवेनुः ।
क्वचिदुदितमुदा यत्प्राहिणोत्तत्किमुर्व्यां,
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १

तिलतुषितकुलस्था दुर्विधा स्वाङ्गजाशा-
भृदभयदतनूजं भक्तितस्ते श्रियोच्च ! ।
यदलभत हि काचित् स्त्रीत्यथाख्या किमासी-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ २

ऋषभजिन ! वचस्ते वस्तु सम्यक् प्रतिष्ठं
विशदिह भविकानां तन्वतां सौवचित्ते ।
मतिरतिकुमतं किं क्लिष्टमेतद्वचोव-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ३

जिनवर ! भवदीया योजना सारसारा-
मृतमयगुणखानिः शङ्करी गीर्जनानाम् ।
क्वचिदपि हि कदा किं दोषपोषं यथैषा
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ४

तिलतुषवदसागरान् सङ्कुलान् क्वापि संस्थां-
स्तव जिन ! वचनाब्धिप्रोत्थबिन्दूद्भवाभान् ।
परसमयपथस्थान्प्रेक्ष्य नाहेति कश्चि-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ५

समवसृतिमगुस्ते सार्वदेवा विधाय
त्रिजगदभवि नाट्यं चित्रकृद्भक्तियुक्तैः ।
मरुदथ गुरुचेताः कश्चिदित्यात्तनृत्यं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ६

प्रथमजिन ! तवाज्ञा भव्य ! भव्यात्मनां स्वः-
सुखलवममृतत्वं साधिना साधु दत्ते ।
तदुचितमवनत्वान्नापगाः किं गतांह-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ७

तव जिन ! कुलजातस्यापि बुद्धौ मरीचेः
स्वपितृनतिनुतस्याऽशस्तभावाणुभूतौ ।
कुलविषयमहाप्तिं वीक्ष्य नाहेति कः किं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ८

तिलतुषसमवंशेऽनार्यभूमौ क्वचित्स्थां-
स्तव जिन ! पृथुधर्माज्ञादरानेक्ष्य साक्षात् ।
अदनजसुलसादीन् केन नावाद्यथैवं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ९

अभयद ! भवदीयाऽचिन्त्यमाहात्म्यतश्चेत्
क्षितिपतिभुवि रङ्कः-प्रेक्ष्यतेऽन्धश्च पङ्गुः ।

गजगततितदानासम्भवीदं भवेत्किं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १०

सभविक ! भविकाली सेवते ते वचो याऽ-
नृणगुणमपि धत्ते स्वोरसीष्टे क्रियासु ।
अणुलघुपदसृष्ट्या सा कथं क्वापि नीचै
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ ११

समवसरणभित्तौ यानि चित्राणि लेखा
लिलिखुरिन ! मुदा ते विस्मितं तान्यवेक्ष्य ।
बहुभिरमृततावाप्यत्र किं तेऽतिचित्रं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १२

जिनवृषभ ! यथाऽन्ये तीर्थिका लीलयाहुः
शिवपदमिह तद्वत्त्वं न तेऽज्ञाः पथस्थाः ।
तदपि परमतं यन्म्लिष्टितार्थं यथेदं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १३

समवसृतिभुवं ते प्राप्य के के न सिद्धाः
सकलकलशमुक्तेरक्षयक्षायिकाप्तेः ।
न भवततिमतीयुश्चित्रमत्रैक्ष्य चैवं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १४

जिनप ! तव वचः स्यात्प(?)न्तिकास्थास्थितानां
भवति शिवरमायाः शंनिधेः किं न हिंसाम् ।
प्रतिकृतिविहितान्त्या भाविनी निर्ज्जितांह-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १५

द्वयमनुपसमेतत् सम्प्रतीमो द्वयस्या-
भयद ! वरपरीक्षाप्रेक्षकाः सत्यवाक् त्वम् ।
त्वयि वितथपथेनार्थादरान्येष्विदंव-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १६

तव मतिविपरीताः क्लृप्तहिंसादिदोषा
जिन ! परसमयास्ते सर्वचिन्मूलतोत्थाः ।
यदि परगिरिमान्याः किं तदेतन्न मिथ्या
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १७

परसमयरतस्था लक्षशः कोटिशो वा
जिनप ! जपतपो वोपासतां योगमार्गम् ।
तदपि शिवपथेनायान्त्यदोऽर्थे यथाऽज्ञा-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १८

यदृजुहतमतिस्थैरुक्तमन्यैरयुक्तं
तदरमितरथाऽत्राकारि शिष्यप्रशिष्यैः ।
वचसि हतिरियं तेऽभून्न सूरेरिवास्मिं-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ १९

भविकततिमियन्ती कार्मणानन्तकाणु-
स्थितिभृतिमति सौवत्वेऽपि कैवल्यसूचिम् ।
वदति तव सुसूक्ष्मध्यानजां प्रेक्ष्य कश्चि-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥ २०

इत्थं श्रीगुरुपूज्यहर्षविनयश्रीसूरितः संस्तुतिं
भक्तिव्यक्तितया ममेश विमलादीन्द्रश्रियां मण्डनम् ।

त्वं संयच्छ भवे भवे भवभवं बोधिं सुबोध्याङ्कुरं
दिव्यानन्ददधर्महंसललनाब्जप्राज्यराज्यश्रियम् ॥ २१

पू.मु.श्री विनयहंसगणिविरचितम्

## १३. ॥ श्रीऋषभजिनेन्द्रस्तवनम् ॥

(स्रग्धरा)

वन्दे श्रीआदिदेवं तमणुतममतिं स्तोतुमुद्धायमिन्द्रा-
दीनां षट्तर्करूपां समयपथपुरं युक्तिपाथोधिवीचिम् ।
सर्वार्थावायशैलश्रियमयि निपुणाः प्रेक्ष्य केनैवमूचुः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १

स्वामिंस्ते पल्यकूपोपममिमितगमैर्द्रव्यषट्कं पराणौ
गिर्यास्ते द्वादशाङ्गं शिवपदनगरं तत्र नैकोक्तियुक्तिः ।
वार्द्धीयेतात्र शैलत्यनणुगुणगणः स्थैर्यतश्चेतदाऽभूत्,
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ २

सूक्ष्म ! त्वद्देशनायां भविततिरिन ! षड्दर्शनागाधकूप-
स्थै रूपपूरिवार्थैः पृथुसमयपथाम्भोधिभेजेव लभ्या ।
प्रत्येकं स्थैर्यशैलं जिनमतममृतं यत्ततोऽदः पदं किं
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ३

सूक्ष्म ! त्वच्छासनश्रीस्थितमतुलतपः षड्विधं बाह्यतो वा-
ऽऽभ्यन्तर्यात्पूर्णकूपोज्ज्वलमलमलमधिपाराध्यसिद्धिं न केऽगुः।
श्रद्धादृङ्गंशमाब्धिप्रबलहृदचलं चेत्ततो नेति किं स्यात्,-
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ४

यत्तज्जीवात्मवादाः परमतिन इनानन्तसङ्ख्यत्वमाख्यो
दोषं षड्जीवकायं स्वगिरिगुणदया गाहकूपस्वरूपम् ।
यच्छ्रेयः श्रीपुराभं सुपदजलनिधिं धैर्यशैलं ततोऽभूत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ५

नेतस्त्वद्गीर्भवाज्ञाप्रमितिरमृतदानान्यतीर्थ्याप्तजोक्ति-
स्तन्वी जात्विष्टशङ्कृत् षडसुवधमहाकूपरूपोरुदङ्गम् ।
दुष्टार्थानां च दुःखाम्बुधिरधिकहठाद्रिर्वदेवेति सम्यक्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ६

शश्वद्देहाद्ययोगैः शिवपदमुपदेष्टृत्वमङ्गादियोगा,-
दन्योन्यस्पर्द्धयैवोचुः परसमयगिरः स्वाधिदेवेषु यत्तत् ।
सिद्ध्यै स्यात्किन्तु तेऽर्हत् स्वसमयरचनेऽवद्यधीरेतदर्थे
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ७

भिन्दन्तूच्चैः सृजन्तु स्वयमुत जगतीं यत्तदुक्त्या स्वपुष्प-
प्रायोदन्तस्वरूपाः परसमयपथाधीश्वराः किन्तु नेतः ।
त्वन्निर्ष्टिप्रोपदेशे शिवपथि कृपणा दुर्धियोऽर्थे यथास्मिन्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ८

सार्वास्यन्ते प्रसन्नं प्रशमरसभरं दृग्युगं सुश्लथं सत्,
पर्यङ्कास्थानसंस्थङ्करमुखमखिलं रागरोषादिवन्ध्यम् ।
मुद्रानाशेक्षितेऽन्यैः पतिभिरियमयीदम्पदार्थो यथाऽज्ञैः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ९

यत्सम्यक्त्वात्प्रतीमः शिवदमनुपमं त्वादृशामाप्तभावं,
तस्मै ते शासनायामितकुमतमहापाशहर्त्रे नमोऽस्तु ।

पश्यामः सत्यभावं किमपि परमते नैतदर्थे यथाऽज्ञाः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १०

भव्यानां मोक्षसिद्ध्यै त्वदुदितचरणश्रीतटे षड्व्रतीष्टे
कूपारोपागुणौघैर्नगरितसकलादेशभङ्गीमयोक्तिः ।
षट्कायाराधनाब्धिः सदवहितमनोद्रिस्ततोऽदो भवत्किं
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ ११

हेयादेयत्वतस्ते गिरि जिन ! भविनां बोधनायाविरासीत्
षट्सिद्धान्तीह कूपप्रतिकृतिरखिलार्थाम्बुभिर्युक्तिदृङ्गा ।
सम्बन्धाब्धिः स्वतीर्थाधिपतिसदचलस्तेन जज्ञे किमेवं
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १२

भर्त्तस्ते द्वादशाङ्गीमयगिरि परितः षड्रसीकूपरूपा
दिव्यास्वादेन भव्योपकृतिकृतिपराऽजन्यसौ सत्यदृङ्गा ।
सौख्यानन्त्याब्धिरुच्चैः शिवपदमहिमाद्रिः किमेवं ततोऽभूत्,
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १३

श्रीवीरस्य प्रशस्यश्रमणपरिवृतस्याग्रतो लास्यपूजां
कृत्वा सूर्याभदेवः सुलभशिवपदं सन्तनोति स्म यद्वत् ।
तद्वत् कश्चित्सुरस्ते पुर इन ! तनुते किं न नृत्यं तदेतत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १४

सिद्ध्यै ध्यायाम्यहं ते समवसृतिमहादुर्गभित्तिस्वरूपं,
याता यास्यन्ति जग्मुः शिवपदपदवीं वीक्ष्य यत्रैकभव्याः ।
चित्रैश्चित्रैर्विचित्रं यदखिलसुखदं चाजनीदं यथास्मिन्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १५

भिन्नां भर्त्तः समूलं निजपरविषयां तीक्ष्णसंसारसंस्थां,
षड्लेश्याकूपरूपां समविषमभवश्रेणिदृङ्गां त्वयेमाम् ।
दुष्टाऽष्टाचारवार्द्धि कुमतहठगिरिं वीक्ष्य नापूरि कोदः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १६

सूक्ष्माचाराच्र्य सर्वेतरविरतितटे ते षडावश्यकश्रीः
कूपारोपाधिपास्ते शुचिपदसुरसैः सम्पदर्थादिदृङ्गम् ।
सूत्रालापादिपाठोऽम्बुधिरवहिततेहाचलश्चेन्न किं तत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १७

पूज्या त्वच्छासनश्रीः परसमयगिरो नार्थतथ्या यदासां
षड्भाषा अप्रशस्ताः पृथुभवपथदाः कूपरूपाः पुराख्याः ।
दौर्गत्यादेरनर्थाब्धय इह कुहठाद्युन्नतास्तेन जज्ञे
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १८

मोक्षस्त्वय्येव नैवानुचितपरसुरेष्वाप्तताधीनिधीनां,
यत् द्विट् षड्वर्गकूपाः कुपथरसगता दुर्धियोऽसत्यदृङ्गाः ।
हिंसाः कर्माब्धयोऽमूः प्रतिभवमवचत्वाद्रयः किं न तत् स्यात्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ १९

त्वन्माहात्म्येन मुक्तासहनमतिमता नित्यवैरा अपीयु-
र्यां हृष्टाः पर्युपास्यैर्वृषभजिन ! भवद्देशनाभूमिमीडे ।
तां दुष्प्रापां परेषां निखिलसुखखनिं शिष्टमेतद्यथार्थैः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥ २०

इत्थं चन्द्रगणेन्द्रहर्षविनयश्रीसूरिराज्येश्वरः,
स्तोत्रं मन्त्रपवित्रगोत्रमहिमाम्नायार्णवः प्रापितः ।

श्रीशत्रुञ्जयमौलिमण्डनमणेरीणप्रवीणोदयं,
देहि त्वं गुरुधर्महंससहसकीडाब्ज ! मे श्रीपदम् ॥ २१

पू.मु.श्री विनयहंसगणिविरचितम्

जटाकूटवर्णनस्वरूपम्

## १४. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

यस्यां सस्थलशालिनः किल तनोः श्रेयोलतानन्तवो
मूर्त्ताः किं त्रिजगत्परोपकृतये तापापनोदाय वा ।
तत्तत्सौख्यफलोद्भवाय भुवि वा प्राविर्बभूवुर्जटा-
कूटेनेव पटूद्भटं समयिशं दद्याद्युगादिर्जिनः ॥ १

यस्योच्चांसतटे जटाकपटता नीलोत्पलश्यामला
धूमाली प्रसरीसरीति सुतपोध्यानाग्निभिर्ज्वालिते ।
किं कर्मेन्धनसञ्चये सति महासद्भाववातोद्धतैः
स श्रीमान् वृषभप्रभुर्भवतु मे सद्भूतसद्भूतये ॥ २

शस्योत्पत्तिपराः सुसंवरधरास्तापापहाः शङ्करा
युष्मद्वद्वयमप्यहो त्वथ चलत्वं नः पुनर्जन्मनाम् ।
दूरात्त्याजयतेति विज्ञपयतीव द्वादशाभ्रावली
यं नाथं सुजयङ्गभृत् स शिवदः स्तादादिदेवः सताम् ॥ ३

यच्छीर्षोष्णीषपीठासनवसनरता भङ्गसौभाग्यभाग्य-
श्रीकान्तामौलिवेल्लद्विरलितकबरीद्वैतमद्वैतशोभम् ।

भेजे पार्श्वद्वयेऽपि प्रसभमुभकलालम्बिलम्बज्जटाया:
कूटेनेवादिदेव: स विभुरभवितां भावितानां तनोतु ॥ ४

याता यास्यन्ति यान्त्यक्षयसुखमिह ये तेऽर्हदास्याब्जजोद्य,-
द्वाणी किञ्जल्ककल्कास्वदनकृतिरतानान्यजैरेणुभावै: ।
तत्त्वं ज्ञात्वेति मुक्त्वा तदथ मधुकरश्रेण्यदोऽर्थं जटाङ्गं
धृत्वोपास्ते किमेतां कलयतु सकला शङ्कलां श्रीयुगादि: ॥ ५

दिव्यश्रीद्वादशाङ्गीपुरिसुगुणमणीश्रेण्यरीणानणीय:
सौधोदात्तैकसर्वेतरविरतियुगद्वारकोद्घाटशिष्टे ।
पार्श्वद्वैते जटाया: कपटत इव किं कुञ्चिके यस्य भात,-
स्तन्यान्यायाध्वगानामसमसमशिवश्रीपदब्रह्म नोऽर्हन् ॥ ६

तीक्ष्णोष्णश्च खर: पिता मदनुज: कीनाशनाम्ना द्विधा,
कृष्णाहं प्लवनागताघ्र (?)निघसैस्तद्रव्यभावेन माम् ।
विश्वस्तुत्य पवित्रयात्मवदिति स्वार्थाप्तये यं श्रयेत्
कालिन्दीवजटाङ्गसन्धृतिरता सोऽर्हन् श्रिये स्तात्सताम् ॥ ७

देवाभासतयावयोरनुचितं स्प्रष्टुं हरादीन् सुरान्
नष्टाऽष्टादशदोषतादिभगवद्भावार्थतेऽष्टैर्गुणै: ।
एषोऽर्हन्नुचितस्तु नाविति हृदास्थायां ससंसज्जटा-
कूटात्किंवरणस्रजे जिनशिवश्रीकान्तयो: स्वप्रभौ ॥ ८

भाग्याभोगतया स्वयं सहवृते ज्ञानादिकश्रीत्रिके
न्यक्षक्षायिकभावगे क्षपककश्रेणीमणीमण्डपे ।
तन्वत्यद्भुतयत्पुरे विधिरिवापूर्वप्रवेशं जटा-
व्याजात्तोरणवल्लरीं व्यरचयत्स श्रीजिन: पातु न: ॥ ९

कर्मोन्मूलननिर्मलाच्छमकलाकेलेर्लयैकालया,-
द्यद्ध्यानाद्बहिरेष किं प्रकटितः साक्षाज्जटालक्षतः ।
सम्यग्ज्ञानसमुत्थनिःस्पृहमतिः सद्वेषरागक्षयो
लक्ष्यः शान्तरसः शिवाय स जिनः पायादपायाज्जनान् ॥१०

पश्यामः किल निर्विकारसरसा निर्णिक्तभक्तीरिताः
सेवन्ते भुवि के स्वनाथमथ तान् सर्वान् वृणीमो वयम् ।
इत्यालोकनहेतुतः किमु जटारूपं विधायाऽध्यगु,-
स्तत्तत्सिद्धिसमृद्धयः स्वयमिनं यं स श्रिये स्ताज्जिनः ॥ ११

पञ्चाचारवसुप्रसूमयमहाहर्म्याश्रमी यत्पुरे
संवेगोपशमव्रतैः परिवृतः श्रीधर्मसम्राट् स्वयम् ।
जग्राह स्वशयद्वयेऽसियुगलीं सर्वाघसेनाभिदे
स्कन्धद्वन्द्वजटानुषङ्गमिषतः सोऽर्हन्नतानन्ददः ॥ १२

ज्ञानं स्यात्सत्क्रियाभिर्विरहितमफलं सत्क्रियाज्ञानशून्या-
स्तद्वद्वन्ध्यास्ततो नावमितचितरसं मैत्र्यमन्योन्यमस्तु ।
सम्यग्ज्ञानक्रियाभ्यामिति हृदयधिया यज्जटाच्छद्मनाभ्यां
सख्याङ्गुल्यो मिथः किं ततयुतविहिते सोऽस्तु देवो मुदे वः ॥१३

साध्यांऽसः शुशुभेऽतिशोभिजटयाः यः कज्जलस्निग्धया
पूर्वं लालनपालनाकलनया सम्भुक्तसर्वस्वया ।
लीलोपेक्षितयाथ राज्यरमया निर्मुक्तबाष्पच्छटा-
श्रेण्येवायतया नतेषु स जिनस्तन्यादमन्दां मुदम् ॥ १४

यत्कल्याणमयाङ्गमेरुशिखरे सच्छायताच्छच्छवि-
र्विश्वे सर्वजनीनतेहितफला स्वर्गापवर्गप्रदा ।

भव्यानन्तसुखाय कल्पलतिका पूर्वावतीर्णेव स,-
द्वन्द्याद्येहजटोपधे: स महिमा सार्व: स सर्वश्रिये ॥ १५

संसारस्फार एष: खलु जलधिरिहानन्तजन्मान्तदु:खा-
न्यर्णांसीहोग्रनक्रा: कटुकफलभवास्तज्जटाकूटतोयम् ।
तत्सर्वोद्धारपूर्वं भविकसुखकरस्तारकस्तारतेज:-
पुञ्जार्य: सेतुबन्ध: किमसितमणिज: प्रादुरासीद्युगादे: ॥ १६

श्रीआदीशसदंससद्मवसतिस्थानन्तवीर्यश्रियो-
द्धर्तुं बाहुलते निजे भवजले मन्ये निमज्जज्जनान् ।
ऊर्ध्वं किं विहिते जटाकपटतस्तत्रैव किं कज्जल-
स्निग्धार्चिश्श्रितिकैतवान्मृगमदश्रीभङ्गिकाविर्बभौ ॥ १७

सर्वश्रेय: श्रियां किं ललनपृथुपथ: सिद्धिवध्वावृतिस्त्रग्
किं मूर्त्तामूर्त्तिमत्यायततरणतरी किं भवाब्धेर्लते द्वे ।
स्कन्धद्वन्द्वे स्थिते शंफलफलनफले किन्नु देवं सदैवो-
त्प्रेक्षादक्षा: समीक्ष्य प्रदधति सुधियां सज्जटामादिभर्तु: ॥१८

अर्हत्कर्णगकुण्डलच्छलधरादित्येन्दुयुग्मं स्वयं
नित्यास्तङ्गततादिदोषकलुषत्वालम्भनायेव किम् ।
शश्वद्वन्द्यतमोदयाय च मुदोपास्त्यालयं सज्जटा-
कूटेनोभयत: प्रभुं शिवलयं रोमालयं लोडयेत् ॥ १९

रागद्वेषभटौ समुत्कटकटुप्राणप्रपञ्चोद्भटौ
मिथ्यात्वाविरतोच्चटौ विघटितौ स्वस्मात्परस्मात्स्वयम् ।
मूलामूलविघात्यदृष्टकुनटौ येनर्षभेणोल्लसे-
चद्द्वयंसोच्चजटोपधेरिव जयश्रीणां पताकोभयी ॥ २०

दिव्यश्रीद्वादशाङ्गीपरमतमरहस्यार्थपाथांसि वर्ष-
त्यत्यन्तैकान्तविश्वोपकृतिसुकृतये सत्यहो त्वद्वचोऽब्दे ।
नीलस्निग्धाङ्कुरालीवदिव सुविरतिः सर्वदेशप्रशस्या
मन्ये मूर्त्ताविरासीदभयद ! सुजटाव्याजतः पार्श्वयुग्मे ॥ २१

नेतस्तेऽत्र पुरे सुवर्णमुकुटप्राकाररेखाङ्किता-
लीकावासनिवासिसर्वविजयिश्रीभाग्यसम्राट् स्वयम् ।
सर्वत्रापि जयं विधाय किमथ त्रैलोक्यलोकोत्तर-
श्रीसिद्ध्यै विदधे जटाकपटतः सौभाग्यमुद्रोन्नतिम् ॥ २२

साम्राज्यप्रदपूज्यहर्षविनयश्रीसूरिताशाशया-
दीशानन्यजराज्यहर्षविनयश्रीसूरितालोकने ।
यच्छातुच्छपथं सहर्षविनयश्रीसूरिपोपापद-
प्राज्याजय्यजयेशहर्षविनयश्रीसूरिसूरीज्य यः ॥ २३

इत्थङ्कारमुदारहर्षविनयश्रीसूरितस्वात्मनः
श्रीशत्रुञ्जयमौलिमण्डनमणिर्भूयात्सदा मे स्तुतः ।
ब्रह्माद्वैतपदैकबोधिविधये श्रीधर्महंसप्रथा-
बीजायाद्भुतधर्महंससरसक्रीडाब्जिनी सम्पदे ॥ २४

पू.मु.श्री विनयहंसगणिविरचितं

चतुर्दशस्वप्नस्तुतिगर्भितम्

# १५. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(उपजाति)

यदङ्गजोऽयं क्रमतश्चतुर्दशो-
ल्लसद्गुणस्थानरसोपभोगभाक् ।
प्राप्स्यत्यनन्तोदय ! शम्पदं सतां
दत्त्वा परेषाममृतं स्वयं ततः ॥ १

यस्यावतारे जननी जहर्ष किं
चतुर्दशस्वप्नगुणेक्षणादिति ।
परोपकारप्रकृतिं तमादिमं
सार्वं सदानन्दपदाय संस्तुवे ॥ २

क्षमाक्षमात्मा शिवदर्शनास्पदं
सर्वंसहः शस्यरमाकरोदयः ।
सुस्कन्धतोपार्जितसौख्यविस्तृतिः
स्निग्धच्छविश्चारुपदप्रयोगगः ॥ ३

स्वप्नागतो गौरिव भाव्यहो गुणैः
सुतोऽस्मदीयोऽयमितीव सञ्ज्ञया ।
पित्रादिभिर्यो वृषभः प्रतिष्ठितः
प्रष्ठः प्रभुः सोऽस्तु विभूतये भुवि ॥ (वृषभः) ४

सदुच्चतोच्चः सुकरस्थविस्तरः
स्फुरद्गतिर्दुर्द्धरवैरिवारकः ।
मुक्ताकरश्रीस्थितिगः सदा जयी
भावी गुणैः स्वैः प्रमदी करीव यः ॥ ५

इतीव यद्गर्भभवे सितं द्विपं
स्वप्ने विशन्तं मुदिता ददर्श किम् ।
स्वास्ये प्रसूर्विष्टपपावनाय स
श्रीआदिदेवः शिवसम्पदेऽस्तु वः ॥ (गजः) ६

महौजसाऽनेकपराजितदुर्म्मदं
भिन्दन्नमन्दां नखविक्रियां दधत् ।
सदाऽवनीशः शिवदर्शनः स्फुर-
ज्जयी सुतस्यानुकृतिं कियद्गुणैः ॥ ७

कर्त्ताऽस्म्यहं तेऽम्ब ! गुणार्णवस्य
तत्संसूचनायेव किमागतो हरिः ।
यस्यावतारे जननी सुसंलये
स्वप्नस्थितौ तं सततं स्तुवे जिनम् ॥ (सिंहः) ८

अप्रत्नरत्नत्रितयेन्दिरादरी
सत्प्रातिहार्यातिशयातिशायि सः ।
चतुस्ततानन्तरमारतीरतः
श्रेयः श्रियां यो भविताङ्गि शम्पदम् ॥ ९

लक्ष्मेत्यदादीवमुखाब्जवेशन-
व्याजाज्जनन्याः सुतभाविभाविना ।
स्वप्नस्थितौ सुस्थितिभावसम्भवा-
वनी स वोऽव्यात् परमेष्ठिपुङ्गवः ॥ (लक्ष्मीः) १०

विश्वं स्वसौरभ्यभरेण भावय-
न्ननिन्द्यतानासुमनोमनोहरः ।

वदन्महानन्दपदं सदोदितः
स्रजेव भावी शिवदो यदङ्गजः ॥ ११

इतीव सद्वाच्यविवेचनाय यद्
गर्भावतारेऽवततार किं स्वयम् ।
स्वप्ने सवित्र्या स्रगियं श्रिता गुणैः
सार्वः स वः सर्वविभूतिभूतये ॥ (दाम) १२

जगत् स्वगोभिर्गुरुतां नयन्नयं
कलालयस्तापतमः स्मयक्षयः ।
सुदक्षजातिप्रियतामृतप्रसू-
र्मत्तोऽप्यनन्तैर्भविताऽधिको गुणैः ॥ १३

तवाङ्गजोऽम्बेति शशंस शीतगु-
र्मातुर्यदुत्पत्तिमहे महायतिम् ।
स्वप्ने किमास्योदयकैतवादिवाऽ-
वताद्भवाद्वः स जिनो भवातिगः ॥ (शशी) १४

भास्वत्स्वरूपप्रकृतिस्तमोहता-
हतं शुचित्वं कमलोदयं तथा ।
चिन्वन्नृणां गोरचनाञ्चितो गुणै-
रीषत्तुलां येन सहाहमादधौ ॥ १५

सर्वात्मनाऽनन्तगुणेन नेति किं
व्यजिज्ञपत् स्वप्नदशास्वहर्प्पतिः ।
मातुः स्वरूपस्य निदर्शनोपधे-
रपाधिराधिं द्यतु वः स सार्वराट् ॥ (दिनकरः) १६

सम्पत्पदं दिव्यमहं यथा तथा
सुधर्म्महर्म्यस्थपथप्रपञ्चनैः ।
उच्चाश्रयस्थायितयोत्तमात्मनां
तवाम्ब ! सूनुर्भवितेत्ययं ध्वजः ॥ १७

स्वप्नप्रकाशे निजरूपभावन-
व्याजादिवाऽसूचयदद्भुतोदयम् ।
यस्यावतारे भुवनोपकारकम्
सुकारकः सोऽस्तु जिनः क्रियोदये ॥ (ध्वजः) १८

सुवर्णवर्ण्यः कमलामलालयः
पूर्णामृतात्मा सुमनोमनोहरः ।
दृष्टोऽपि शिष्टोदयतामितोऽम्ब ! ते
सुतोऽधिकोऽनन्तगुणैर्मदात्मतः ॥ १९

भावीत्यहो पूर्णनिपोऽवदद्यदै-
श्वर्यं प्रसूस्वप्नदशास्वयं स्वयम् ।
तत्साम्प्रतं यद्गुरुताऽखिलोच्चसत्,
पदप्रदा सोऽभयदः श्रियेऽस्तु वः ॥ (पूर्णकुम्भः) २०

सारस्य शस्यं कमलामलालयं
मरीचिरुच्यालिकताकलोज्ज्वलम् ।
तापापहं पुण्यपदं जडात्मकं
यथा भवेयं न भवत्समं मनाक् ॥ २१

तथा विधेहीश ! ममेति गर्भगं
यं विश्वपं पद्मसरः किमु स्वयम् ।

स्वप्नोपधेर्विज्ञपयत्ययं चिदा-
मन्दप्रतिष्ठास्थितिदोऽस्तु सर्ववित् ॥ (पद्मसरः) २२

पृथुप्रथार्थैः प्रथितस्तु संवरां
लावण्यलीलां सकलक्षमावधिम् ।
सन्तः कुतस्त्वामिति मत्समं वद-
न्त्यनन्तमाधुर्यरसोज्ज्वलोऽसि यत् ॥ २३

अहं तु नास्मीश ! तथेति यं विभुं
वक्तुं मुदाब्धिः किमियाय सन्निधौ ।
प्रसूद्भवत्स्वप्नमिषादिवास्तु सः
सार्वः शिवास्वादपदोदयप्रदः ॥ (सागरः) २४

स्वाम्येष सेवास्पदमात्मनां सता-
मेतद्भवे भाव्यमृते पदेऽनुगः ।
तत्राथ यामीनमिमं श्रये पुन,-
र्भवं पुनर्दृक्पथदुर्लभम्भुवि ॥ २५

चित्ते विचिन्त्येत्युचितं दिवीव किं
ततोऽत्र सेवाविधये समागमत् ।
दम्भाद्विभोः स्वप्नमयान्मरुद्गृहं
भूयादसौ वोऽभयदो विभूतये ॥ (विमानम्) २६

रङ्गद्गुणग्राममगुरुर्जगज्जना
नन्दप्रदः पादपदं सदोदितः ।
मुखं सुखानां त्वमितोदयैः समान्,
मनागिहाऽनन्तगुणाधिकोऽसि मत् ॥ २७

ममापि तत्तादृशवैभवं विभो !
देहीति यं स्वप्नदशासु याचितुम् ।
रत्नोत्करो मातृसुखेऽविशन्नु किं
स बोधिदः स्तात्सुधियां ! सुबोधये ॥ (रत्नाकरः) २८

यन्मां बृहद्भानुमहारवं वदा
वदन्ति तत्त्वं परमार्थतादृशः ।
विधेहि मे तत्त्वभवावतारतः
पुण्यं पदं भानुरिहासि यद्बृहत् ॥ २९

इतीव विज्ञप्तिपरः पुरः स्फुरन्
यस्य प्रसूवक्त्रवरेऽगमच्छिखी ।
विधाय किं स्वप्नमिषं सुखाय स
प्रणेमुषां श्रीवृषभप्रभुर्भुवि ॥ (शिखी) ३०

चतुर्दशस्वप्नमवेक्ष्यमेति तद्,
गुणोचितं तं नु जनन्यजीजनत् ।
सुतं गुणानन्त्यपदं तु साम्प्रतं
तद्येन लोकोत्तररूपभृद्विभुः ॥ ३१

एवं श्रीगुरुराजहर्षविनयश्रीसूरितस्त्वं स्तुतिं
स्वामिन् ! मन्त्रपवित्रगोत्रमहिमाम्नातप्रमेयप्रमः ।
सारोदारनिजक्रमाब्जसरसोपास्तिं प्रदेहीश ! मे
पूज्यश्रीगुरुधर्महंसललनस्फारस्फुरन्मानसम् ॥ ३२

पू.मु.श्री विनयहंसगणिविरचितम्

## १६. ॥ श्रीतीर्थराजाधिराजपूजातिशयस्तोत्रम् ॥

यस्यां वश्या विशदविधिना वन्दनप्रत्ययाद्यैः
कायोत्सर्गप्रकटितपटुद्रव्यपूजानुमोदैः ।
भव्याभव्याभिमतसुफलान्याप्नुवन्त्यद्भुतानि
श्रीसर्वानां वपुषि सुषमापोषिपूजां श्रये ताम् ॥(मन्दाक्रान्ता) १

अर्हतामर्हणा गर्हणीया कदा-
प्यस्ति नैवार्हणीयागमैरार्हतैः ।
येन पूजैव पूज्यत्वभावोद्भवे
विद्यते सत्यकल्कस्वभावोद्गमा ॥ (स्रग्विणी) २

द्रव्यभावस्तवद्योतिनी देशतः
सर्वतः सद्भिरत्यादृतिः सङ्गता ।
अन्यथा तथ्यपथ्यप्रथासंस्थिता-
स्ताःक्रिया निष्फलास्तेन पूजा जयेत् ॥ (स्रग्विणी) ३

द्रौपद्याद्या सदयविशदा दर्शनोद्योतदीप्रा,-
स्तत्त्वातत्त्वव्यतिकररसाः स्वादलुब्धस्वचित्ताः ।
भक्तिव्यक्त्या महिमसुभगां जैनचैत्योचितार्चाम्
यामाकार्षुः शिवसुखखनिं तां न कः श्रद्दधीत ॥ (शा.वि.) ४

विद्याजङ्घाचारणश्रीमुनीशै, नित्यस्थानस्थायिचैत्यावलीनाम् ।
सेवां कृत्वा वन्दनादिप्रयोगैः
सौवाचाराश्चारु शौचीक्रियन्ते ॥ (शालिनी) ५

पूजाद्वैतोदारसारानुमोदो–पास्तिभ्यां श्रीआज्ञया सङ्घसङ्घैः ।
श्रीसम्यक्त्वं ज्ञानचारित्ररत्नम्,
मोक्षश्रीदं संविधीयेत शुद्ध्या ॥ (शालिनी) ६

कल्याणाली ललनमभितः सर्वसम्पद्विलासा
निष्प्रत्यूहं महिमपदवीसौख्यपोषप्रकर्षाः ।
स्थाने स्थाने सरससुभगाभोगभोगप्रयोगाः
सम्पद्यन्तेऽभयद ! विशदार्चाप्रचारेण पुंसाम् ॥ (म.क्रा.) ७

श्रीजिनपूजनमद्भुतसम्पत्सौख्यविशेषनिषेचककल्कम् ।
नौमि कलाकलताकलनाभं,
शुद्धविधेः शिवदं विहितं सत् ॥ (दोधक) ८

शासनं द्रव्यभावस्तवालङ्कृतं देशतः सर्वतः संयमोपासनम् ।
साम्प्रतं स्यात्तदैवार्हतार्चोचितो
द्रव्यतोऽङ्गीक्रियेत प्रधानो विधिः ॥ (स्त्रग्विणी) ९

यामाराध्याभ्यधिकविधिना श्रेणिकाद्या नरेन्द्राः
प्रापुः पूज्याभयदपदवीमक्षयक्षायिकाख्याः ।
श्रीदेवार्यक्रमणकमलोपासनावासनाक्ताः
संसेवन्ते सुकृतरसिकाः केऽर्हतामर्हणां ताम् ॥ (म.क्रा.) १०

त्रिशराष्टविधा तथा बहूचितभेदा विविधाधिकारिभिः ।
विहिता सकलांहसां हतिं तनुतेऽर्चाऽभयदेषु सर्वदा ॥ ११
(ललिता)

भुवनत्रयनित्यचैत्यगाः प्रतिमा अप्रतिमप्रभावकाः ।
प्रणमामि मुदार्चनादिभिः करणैर्निर्वृतिशर्म्मसम्पदे ॥ १२
(ललिता)

श्रीवैकुण्ठः सुगुरुयतिनां वन्दनैर्दुर्गतीस्ता-
श्चिच्छेद श्रीजिनबलिविधेरादधौ क्षायिकाद्यम् ।
श्रीश्रेयांसः सरसमनसा पात्रदानं व्यधाद्यत्
तस्य श्रेयः सुखपदमभूत्तत्र पूजानुभावः ॥ (म.क्रा.) १३

श्रीसूर्याभः स्वर्गिमुख्यः सुरद्ध्यां,
वीरस्याग्रे साधुराजीवृतस्य ।
दिव्यं लास्यं भूरिभङ्गीप्रभेदै-
श्चक्रे कारीशेन तस्यैककृत्यम् ॥ (शालिनी) १४

अर्हत्पूजा जयति जयदाबाधमाराध्यसाध्या
नानाभेदोदितविधिधिया शुद्धबोधिप्रबोधा ।
दुष्टादृष्टप्रकृतिविकृतिं प्रत्यहं सङ्क्षिपन्ती
त्रैलोक्यस्थासुरसुरनरैः सर्वदा सेव्यमाना ॥ (म.क्रा.) १५

अर्हणाऽऽर्हतमतेर्हतां द्विधा सङ्गतागमविवेकलोकनैः ।
साधिताधिकृतसज्जनैर्मुदा भुक्तिमुक्तिसुखसम्पदे जयेत् ॥ १६

त्रैलोकयेऽलोकलोकप्रकटसरसतापुष्टिसृष्टिप्रकृष्टा
दिव्यश्रीः सत्यजात्यामृतरसलहरी पापतापोपशान्तौ ।
मुक्तिस्त्रीसन्धिदूतीहितनिखिलसुखाकर्षणस्वर्गिरत्नं
देयादानन्दसम्पत्पदमुदिततमं सा सपर्या जिनानाम् ॥ १७
(स्रग्धरा)

यस्तनोत्युदितसम्पदे मुदा सर्वसार्वचरणार्चमम्बुजैः ।
तन्तनीति सततं ततां श्रियम्,
स्वात्मनीह स नरो भवे भवे ॥ (रथोद्धता) १८

यः श्रीसार्वसपर्ययेति तु तयाऽऽत्मानं पुनात्यार्हता-
नन्ताहेहितसम्पदर्पणतया पूर्वद्युरत्नाभया ।
सेवन्ते तमुदारहर्षविनयश्रीसूरितं सर्वदा
नन्दस्पन्दमहोदयाः समुदिताः श्रीधर्महंसश्रियः ॥(शा.वि.)१९

पू.आ. श्री पद्मचन्द्रसूरिशिष्य

पू.मु.श्री श्रीकर्णविजयविरचिताः

श्री जीरापल्लिपाटक-

## १७. ॥ आदिश्वरजिनस्तुतिः ॥

(अनुष्टुप्)

देवेन्द्रैर्वन्दितं देवं, नाभिभूपतिनन्दनम् ।
वृषभाङ्केन संयुक्तं, तं सार्व्वं प्रणमाम्यहम् ॥ १

मरुदेवाङ्गजन्मानं, साधुवृन्दसुसेवितम् ।
केवलज्ञानभास्वन्तं, तं देवं स्तोमि भावतः ॥ २

सुरासुरनरेन्द्राणां, पूज्यं गुणगणैर्वृतम् ।
तृतीयारनभोदीप्र-दीपं वन्दे मुदा सदा ॥ ३

चतुर्गतिविनिर्मुक्तं, चतुर्गतिनिवारकम् ।
स्वर्गापवर्गदं शान्तं, मारुदेवं जिनं स्तुवे ॥ ४

त्रिषष्टिपूर्वलक्षाणी, भुक्त्वा राज्यश्रियं वराम् ।
त्यक्त्वा भोगान् वरान् देवः, प्राप्तो गतिमनुत्तराम् ॥ ५

विनीतायाः परिकरे, उद्याने शकटाभिधे ।
अधः सुवटवृक्षस्य, संप्राप्तो ज्ञानमुज्ज्वलम् ॥ ६

देशनावसरे रम्ये, सुरासुरनरेश्वराः ।
यस्य वाचामृतम्पीत्वा, ते ययुः परमां मुदम् ॥ ७

तं वन्दे देवदेवेशं, भक्तिसंभृतमानसः ।
भव्याङ्गिभवसंताप-पापवारनिवारकम् ॥ ८

माता मे त्वं पिता मे त्वं, बान्धवः परमो मम ।
त्वं त्राता नायको नूनं, जिनाधीश ! दयानिधे ! ॥ ९

स्वस्तिश्रीदं वृषभं, ऋषभजिनं वृषविराजितं भक्त्या ।
स्तौमि मुदा नौमि सदा, नाभिभवं मुनिपतिं सार्व्वम् ॥(आर्या)१०

(द्रुतविलम्बित)

भविकवृन्दसुसेवितपत्कजं, विबुधसङ्घविराजितसत्सदम् ।
इषुसुसख्य-महद्व्रतसंयुतं, शमदमादिगुणव्रजपूरितम् ॥ ११

विकचवारिजपत्रसुलोचनं, सुजनतापत्रपाप-सुमोचनम् ।
तव नभ्राजि पदद्वयपङ्कजं, सुनयनायकराजिसुसेवितम् ॥ १२

शमरसामृतवारि-सुवर्षणाद् घनघनाघनवृन्दसुराजिवत् ।
त्वमसिनाथमहाजनतापहृत्, वरसुवर्णसुवर्णसुशोभितः ॥ १३

भविकवारिजवृन्दसुबोधने, दिनमणिप्रतिमस्त्वमसि प्रभो ! ।
वृजिनवारविदारणकारकः सुजिनराजभवाम्बुधितारकः ॥ १४

भवमहोदधिमग्नजगज्जनं, त्रिभुवनाधिप ! तारय दुःखितम् ।
करणपञ्चतुरङ्गमपीडितं, तमपि पाहि हेतेप्सितदायक ! ॥ १५

इत्थं स्तुतः सुरनताङ्घ्रियुगो मयेहा-
मुष्मिन् परत्र च विभो ! भुवि जन्मभाजाम् ।

स्वर्ग्गापवर्ग्गसुखपूरसुदायकस्त्वं,
मां पाहि देव ! करुणाकर ! भाग्यदस्त्वम् ॥(वसन्ततिलका)१५

जीरापल्ल्यभिधानपाटकवरे श्रीस्तम्भतीर्थे मुदा,
वर्षे बाहुनभोरसैक (१६०२) सहिते भक्त्या स्तुतस्तीर्थपः ।
श्रीकर्णेन महेन चारु मनसा ध्यातः स्तुतो वाग्भरैः
सोव्यान्मां भववारकाल्लघुवरां बोधिं प्रदेयाः सदा ॥ १७
(शार्दूलविक्रीडित)

पू.मु.श्री सिद्धिसागरविरचितम्

## १८. ॥ श्रीआदिजिन-आभरणास्तवनम् ॥

नत्वा निजगुरुचरणं शरणं प्राणभृतः ।
स्तोतुमनास्त्वामस्मि तव स्मितभक्तिभृतः ॥ १

जिनवर **मुकुट** मनोहरकीर्तिलताजलदम् ।
जित**पुष्पे**षुं परमप्रमदमि-प्रमदम् ॥ २

विश्वत्रय**तिलक**प्रभकं प्रभयालीकः ।
वचनसुधारस**कुण्डल**सद्गात्रोऽ**टीकः** ॥ ३

**बाजूबन्धनबहइरखा**तगुणैर्धनदः ।
हस्तनि**संकलि**तोऽ**वेढ**क्कादिकनिनदः ॥ ४

विश्वर**वीटी**कं ते **कटक**युतौ भवतः ।
**पूतलिया**ऽयुग**डोडी**नभवन्तौ भवतः ॥ ५

चरणौ चा(च?)रणमिहारतऽ**कन्दोरो** समिता: ।
सु**श्रीवत्स**समर्द्धितहारसुकीर्तिलता: ॥ ६

फुल्लित**सीथो राखडि**गतशुचमरिहवर: ।
**बरघलि**तापहतं कुरु **कङ्कणमां** नवरम् ॥ ७

**कं बलि**जित्तव **वालु**नतोसुमतो सुपद: ।
शमिनामीशरणं शरणं प्रशमितविपद: ॥ ८

तनु**कटिमेखल कडला**भयुतस्त्वां भविक: ।
विकसितभद्रवने सुर प्रणमति नो भुवि क: ॥ ९

प्राप्तभवाब्धित**टोपी कडिमर**कीर्तियुत ।
उऽगति(?)याततम: प्रभु**हंसडिया** रहित: ॥ १०

इत्यङ्गाभरणाभिधाविलसितप्रोल्लासितैरीशित: ।
शीतज्योतिरुदारतोन्नतमतिर्नूत: स्तवैर्नूतनै: ।
श्रीमद्वाचकलब्धिसागरगुरो: शिष्येण संसिद्धिना ।
सालङ्कारवचोवचस्विविनुतो देह्यादिदेवप्रभु: ॥ ११

प्रवर्तिनी सा. श्री.मेरुलक्ष्मीगणिनीविरचितम्

## ९९. ॥ श्रीआदिनाथ-स्तवनम् ॥

सकलमङ्गलदं रुचिरच्छविं, दुरितशैलविभेदनसत्पविम् ।
जिनवरं नृपनाभितनूरुहं, विपुलसौख्यकरं प्रणमाम्यहम् ॥ १
(द्रुत.वि.)

स्वर्णाभं गुणभासुरं धृतशमं ज्ञानश्रियालङ्कृतं,
सम्यक्पुण्यपथप्ररूपणपरन्यायव्रतत्यम्बुदम् ।
शक्रव्रातसुसेव्यमानचरणाम्भोजद्वयं सन्ततं,
वन्देऽहं त्रिजगद्गुरुं गुरुतरं मोहान्धकारे रविम् ॥(शा.वि.) २

निखिलसौख्यमहार्णवसद्विधुं, गुणसितच्छदखेलनमानसम् ।
प्रशमसिन्धुरवन्ध्यमहीधरं, जिनपतिं प्रणमामि वृषाङ्कितम् ॥३
(द्रुत. वि.)

यशः श्रिया निर्जितचन्द्रदीधितिं,
ध्यानामलज्वालितकर्मसन्ततिम् ।
नीरागतादूरितभावविद्विषं, सेवे युगादीशजिनं महात्विषम् ॥४
(उपजाति)

वैराग्यमानससरोवरराजहंसं, प्रौढप्रभासुरनरेशशिरोऽवतंसं ।
इक्ष्वाकुवंशतिलकं भुवनाभिरामं,
कामं दधामि हृदये प्रथमं जिनेशम् ॥ (वसन्ततिलका) ५

सन्ततं जलजतायुतमत्र, पङ्कजं च शशिनं च विमुच्य ।
अद्वितीयकमलापदपद्मं, सेवे ते तव विभो ! गतदोषम् ॥ ६
(स्वागता)

एवं श्रीऋषभं गुरूत्तमगुणं यः स्तौति भक्त्यान्वहं,
भव्याम्भोजविकाशनग्रहपतिं स्फारप्रभाशालिनम् ।
तस्यानन्दविधायिनी प्रतिदिनं मेरुस्थितस्थेयसी,
लक्ष्मीर्वेश्मनि रंरमीति जनता पुष्य(ष्प)त्प्रतिष्ठोदया॥(शा.वि.)७

हीरविहारविभूषण-

## १००. ॥ श्रीऋषभदेवस्तवनम् ॥

नत्वा श्रीगुरुचरणौ, स्मृत्वा श्रीशारदां च वरवरदाम् ।
स्तोष्ये हीरविहारं, तदनु च तद्भूषणं वृषभम् ॥ १

(द्रुतविलम्बित)

विमलतोरणगोमटिकायुतं, विहितहीरगणाधिपपादुकम् ।
प्रतिदिनं वरसूरतिबन्दिरो - त्तममहेभ्यजनैः कृतभावनम् ॥२

सकलरत्नसुधाकरवाचकै-विहितवासविधानप्रतिष्ठया ।
सुकृत-लब्धि-सुनेमिसुवाचक-
त्रितयशोभनपादुकयाऽन्वितम् ॥ ३

प्रवरभूषणनागर-नागरी-विहितगीत-गुण-स्तुतिकं जनाः ।
महिमधाम जिनादिममण्डितं, नमत हीरविहारमनुत्तरम् ॥ ४

कमलकोमलकान्तिविराजितं, भविकभावुकसन्ततिकारकम् ।
ऋषभदेवजिनं गतदूषणं, नमत हीरविहारविभूषणम् ॥ ५

मदनतुङ्गमहीरुहवारणं, सकलविष्टपसंस्थितिकारकम् ।
भवपयोधिपतज्जनतारणं, नमत हीरविहारविभूषणम् ॥ ६

सुगुरुहीरमुनीश्वरसेवितं, विजयसेनगुरुत्तमसंस्तुतम् ।
विजयदेवगुरुप्रणतं सदा, नमत हीरविहारविभूषणम् ॥ ७

युगलजन्मिजनावृषवारणं, प्रथमपात्रविहायितसाधनम् ।
प्रथममिक्षुरसाधिकपारणं, नमत हीरविहारविभूषणम् ॥ ८

गजभयादिभयाष्टकवारणं, स्वकविहारपवित्रवसुन्धरम् ।
वरनवीनपुराग्रिमण्डनं, नमत हीरविहारविभूषणम् ॥ ९

भरतभूपतिभूपतिसेवितं, तनुजबाहुबलीश्वरचर्चितम् ।
नववसुप्रमितोद्वहतारणं, नमत हीरविहारविभूषणम् ॥ १०

जयजयारवबन्दिजनैः स्तुतं, सततवैणिकगीत्युपवीणितम् ।
विमलकेवलचारुविलोचनं, नमत हीरविहारविभूषणम् ॥ ११

गणधरादिमुनिव्रजमध्यगं, सकलजातिसुरैः कृतसेवनम् ।
विविधनाट्यविधानसुरञ्जितं, नमत हीरविहार विभूषणम् ॥१२

वरगुणावलिरत्नमहानिधिं, सकलरत्नसुधारुचिना मुदा,
स्तुतिपथं विनयादवतारितं, नमत हीरविहारविभूषणम् ॥ १३

श्री गुर्जरेश्वरमहामात्यवस्तुपालविरचितम्
मनोरथमयं शत्रुञ्जयतीर्थाधिप-

## १०१. ॥ श्री आदिनाथस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

लब्ध्वा मानुषजन्म जातिसुकुलप्रष्ठां प्रतिष्ठामिमां
धृत्वा धर्मधुरीणतामधिगतः सङ्घाधिपत्यश्रियम् ।
तीर्थेशाग्रिम ! वस्तुपालसचिवो विश्वाग्रजाग्रत्पदा-
रोहाय प्रगुणां मनोरथमयीं निःश्रेणिमाशिश्रियत् ॥ १

श्रीनाभेय ! मनोरथाः शतपथा मिथ्याभिमानाम्बुधेः
कल्लोला इव विस्फुरन्ति विषयग्राहग्रहव्यग्रिताः ।
हित्वा तानिति वस्तुपालसचिवः सद्बोधदुग्धोदधे-
र्भेजे वीचिसमानिमान् शमदमप्रव्यक्तमुक्ताफलान् ॥ २

प्रत्याशं प्रसरत्कषायविषयज्वालाकरालादितो
दूरीभूय भयङ्कराद्भवदवाद्व्यामोहधूमान्धितः ।
श्रीशत्रुञ्जयशैलपावनजिन त्वद्वक्त्रचन्द्रातपो-
पास्तिध्वस्ततमाः शमामृतह्रदे दाहं कदाऽहं क्षिपे ॥ ३

एतस्मिन्भववारिधौ निरवधि क्रोधौर्ववह्नेश्च्युत-
स्त्रस्तो लोभतिमिङ्गिलस्य गिलनात्क्लेशाम्भसो निर्गतः ।
स्रस्तस्तात कदा कदाग्रहमहाग्राहाच्च शत्रुञ्जय-
द्वीपं प्राप्य भजेय जेयविजयप्रीतः परां निर्वृतिम् ॥ ४

संसारव्यवहारतो रतिमतिव्यावर्त्त्य कर्त्तव्यता-
वार्त्तामप्यपहाय चिन्मयतया त्रैलोक्यमालोकयन् ।
श्रीशत्रुञ्जयशैलगह्वरगुहामध्ये निबद्धस्थितिः
श्रीनाभेय ! कदा लभेय गलितज्ञेयाभिमानं मनः ॥ ५

स्वामिन्मृत्युहरेरहं हरिणवन्नष्टोऽतिकष्टायुध-
व्याधिव्याधशतैर्वृतः श्रितभवारण्योऽशरण्यो भ्रमन् ।
नाभेय ! त्वमनाकुलः कुलपतिर्यत्रासि तस्मिंल्लभे
श्रीशत्रुञ्जयशैलनामनि कदा पुण्याश्रमे विश्रमम् ? ॥ ६

श्रीगर्वोष्मभिरौष्मलेषु धनिनामीर्ष्यानलज्वालया
जिह्वालेषु मृगीदृशामनुशयाद्धूमायितेषु द्विषाम् ।
वक्रेषु ग्लपितामिमां त्रिजगतीनिस्तन्द्रचन्द्रोदये
देव ! श्रीविमलाद्रिकेतन ! कदा दास्ये त्वदास्ये दृशम् ? ॥७

क्रोधेन ज्वलितो हतोऽहमिषुभिः पञ्चेषुणा पञ्चभिः
बद्धो मोहमहाद्विषा च विषयग्रामं प्रकामं श्रितः ।

तद्ध्वस्तान्तरवैरिवार ! भुवनस्वामिन् ! सनाथे त्वया
दुर्गे श्रीविमलाद्रिनामनि सुखं स्थाताऽस्मि सुस्थः कदा ? ॥८

आस्यं कस्य न वीक्षितं ? क्व न कृता सेवा ? न के वा स्तुताः?
तृष्णापूरपराहतेन विहिता केषां च नाभ्यर्थना ? ।
तत्त्रातः विमलाद्रिनन्दनवनीकल्पैककल्पद्रुम !
त्वामासाद्य कदा कदर्थनमिदं भूयोऽपि नाहं सहे ? ॥ ९

संसारे सुखहेतुवस्तुविषयैरुत्सङ्गितैः सङ्गतै-
र्दत्ता देव ! त्वदन्यदेव तदियं वाञ्छा ममोत्सेकिनी ।
श्रेयोवैभव ! नाभिसम्भव ! भवाकूपारपारङ्गम !
श्रीशत्रुञ्जयमण्डनेन भवता भावी कदा सङ्गमः ॥ १०

एताः शमामृतरसेन हृदालवाले
संवर्द्धिताः पृथुमनोरथवल्लयो मे ।
विश्वैकमित्र ! भगवन् ! भवतः प्रसादा-
ल्लोकोत्तरैः फलभरैः सफलीभवन्तु ॥ (वसन्ततिलका) ११

धर्मध्यानमना मनोरथमयं स्तोत्रं युगादिप्रभो-
श्चक्रे गूर्जरचक्रवर्त्तिसचिवः श्रीवस्तुपालः कविः ।
प्रातः प्रातरधीयमानमनघां यच्चित्तवृत्तिं सता-
माधत्ते विभुतां च ताण्डवयति श्रेयःश्रियं पुष्यति ॥ १२

कविश्री रुपचन्द्रविरचिता

# १०२.॥ श्रीआदिनाथविज्ञप्तिद्वात्रिंशिका ॥

(वियोगनी)

जय देव ! जयाऽऽदिमप्रभो !, जय शत्रुञ्जयभूध्रभूषण ! ।
जय बोधिद ! बोधवारिधे !, जगदाधार ! जयाऽखिलेश्वर ! ॥१

मुकुरप्रतिबिम्बलीलया, निखिला भावततिस्त्वदात्मनि ।
जिननाथ ! यतो विभासते, भवते तत् परमात्मने नमः ॥ २

भगवन्नभिगम्य ते विभो-र्भवभीतेन मया दयालुताम् ।
शुभकृच्छरणं शरीरिणां, विहितं त्वच्चलनावलम्बनम् ॥ ३

अथ यावदरातिवारितो, न लभेऽनन्तसुखास्पदं पदम् ।
मम तावदधीश ! मा स्म भूद्, विरहस्ते चरणाम्बुजार्चनात् ॥४

अवधीरय माऽपराध्ययं, पर(रि)भाव्येति नु मां जगत्पते ! ।
महतां हि महाकृपावतां, प्रकृतिर्वारिदवद् विनिश्चिता ॥ ५

तदभद्रवताऽप्यभूयत, त्वदनाज्ञप्तिम(र)कारि यन्मया ।
न तु मन्तुमवेहि मामकं, ननु दोषोऽस्त्ययमीश ! कर्मणाम् ॥६

तदशर्मदकर्मनोदना-दनुभूता बहुशो निगोदभीः ।
बत तत्समये मर्दतिहा, यदभूद् दूरतरो भवान् प्रभुः ॥ ७

नरकादिगतिव्यथाकथा, अलमुक्त्वा तव नेतुरग्रतः ।
जडबुद्धिरिह प्रबोधितो, यदहं त्वद्वचसैव केवलम् ॥ ८

प्रतिपद्य नु दैवतं पदं, भृशमासं विषयैर्विमोहितः ।
अथ तैः पुनरप्यहं हहा, प्रतिकूले त्वयि तात ! ताडितः ॥ ९

जगदीश ! कथञ्चिदर्जितं, शिववर्त्माऽपि नृजन्म यन्मया ।
निरपाति तदप्यनन्तशो, मुषितोऽहं बत मोहकर्मणा ॥ १०

अमुनैवमिहाऽऽत्मविद्विषा, वशमानाय्य भटैः क्रुधादिभिः ।
अहमेष मुहु[ः] प्लवङ्गमः, प्रतिगेहं बटुनैव नर्तितः ॥ ११

त्वयि सत्यपि मत्पतौ च मां, यदि दुन्वन्ति रुषादयोऽरयः ।
अपनेष्यति तर्ह्यनाथता-ऽपयशो मे सकलाधिनाथ ! कः ?॥१२

उपवेशय तावके क्षमा-वरणे मां त्रिजगच्छिरोमणे ! ।
अशमो मृगराडिवाऽन्यथा, हुडदारं नु हहा ! हरिष्यति ॥ १३

अभिमानरुजा जितं वपु-र्मम सर्वज्ञभिषग्विभूषण ! ।
अथ पायय मार्दवामृतं, त्वरितं येन भवेयमव्यय[ः] ॥ १४

रचितं च मयाऽऽत्मवञ्चनं, छलजालं कृमिणेव कुर्वता ।
लसदार्जवदण्डखण्डितं, मदबन्धाय विधेहि तद् विभो ! ॥१५

अहमस्म्यसमाधिबाधितो, बहुलोभानलतापतापितः ।
जिन ! निर्ममताघनच्छटा-लहरीभिः कुरु मामनाकुलम् ॥१६

पिशुनेन हसेन हास्यतां, गमितोऽहं करुणां दशां गतः ।
दिश तन्महिमास्ति(स्त)ये हि मां, वरवैराग्यरसं जगद्गुरो ! ॥१७

इव गेन्दुकमन्तरागतं, ललता(तो) रत्यरती निहत्य माम् ।
अधुना विधिनाऽपसार्य ते,
कुरु भर्न्तः (र्त्तः !) समताभुवि स्थिरम् ॥ १८

भय-शोचनभावकस्य मे, भय-शोकाभिभवो व्यवर्द्धत ।
मुनिनाथ ! तथा यतस्व तौ, न पुनर्मां स्पृशतो भवान्तरे ॥१९

तनुसम्भवमस्मरन् मुधा, यदबीभत्सत मन्मनोऽशुचिम् ।
अभवं ननु तेन तन्मयः, सदयोद्धारय मां ततोऽधुना ॥ २०

मम चैव मनो मनोभवो, व्यथते हन्त ! मनोभवोऽपि सन् ।
इव वंशजकृष्णवर्त्मनः, कियदाख्यामि ततोऽस्य दो(दौ)ष्ठवम्॥२१

शमयाऽमुमनन्तवीर्यभा-गनुकम्प्यो भवताऽस्मि चेदहम् ।
इयदेव कृपाफलं पुन-र्न च वेदत्रयवेदनोदयः ॥ (यु) २२

अवगाढचरा मुहुर्मया, सह मिथ्यात्वचिरत्नशत्रुणा ।
भवसन्ततिराशु हीयतां, हितकृन्नाथ ! तव प्रसादतः ॥ २३

अयि मोहमयोऽपि रोचते, प्रियतुभ्यं खलु मे त्वदाश्रयः ।
विरसे लवणाम्बुधावपि, स्फुरति स्वादुरसं जलं क्वचित् ॥२४

तव पादतलावलम्बनं, विषया माऽग्रहिषुः कदाऽपि माम् ।
यदमीभिरभीरुमायिभिः, सरलोऽहं बहुशः प्रलोभितः ॥ २५

मनसा सममिन्द्रियाणि ते, स्मरणात् पारग ! वारयन्ति माम् ।
विषयानुकमेव कुर्वते, कुरु यत्नं कमपीह तद् द्रुतम् ॥ २६

ह्रियतेऽप्यथ यत्नरक्षितं, घनसारोपमितं मनोऽस्थिरम् ।
मिरिचैरिव ते गुणस्मृति-प्रतिबन्धैर्विधिवद् बधान तत् ॥२७

अनुकम्प्य निवर्तयाऽऽश्रवान्, जिनप ! ख्यापय संवरीति माम्।
त्वरितं पुनरन्यसङ्गमाद्, विरतं तात ! विधेह्यतः परम् ॥ २८

त्वयि चैव विधाय धारणा-मनुभूयाऽऽत्मगुणान् महारसान् ।
अवदातमवाप्नुयां यथा, वररत्नत्रितयं तथा ननु ॥ २९

अधिकृत्य पदित्रयाङ्किता-न्यथ तत्त्वान्यपरोक्षमानतः ।
प्रतिमः परमेष्ठिना कदा-ऽहमपश्यामिति (?) मे मनोरथः ॥३०

अथ चेत् पृथुलाः प्रतीक्षसे, मम काश्चित् खचिता भवस्थ (स्थि)तीः।
तदपि दृढ (द्रढि) मानमानया-
ऽद्भुतसम्यक्त्वधनं स्वसिद्धये ॥ ३१

सफलीकुरुतान् ममाऽर्थनां, हरतात् पापमथाऽपि दुर्गत(तिम्) ।
दिश देव ! दयापरेप्सितं, परमाधार ! नमो नमोऽस्तु ते ॥३२

इति हृदयगताभिलाषमाख्यत्, प्रथमजिनं विमलाचलं पुनानम् ।
जिनपतिचरणाब्जचञ्चरीकः, कविरचनामुपदाय रूपचन्द्रः ॥३३

श्रीआदिपुराणान्तर्गता श्रीभरतचक्रिकारिता

## १०३. ॥ श्रीऋषभजिनस्तुतिः ॥

(अनुष्टुभ्)

त्वं ब्रह्मा परमज्योतिस्त्वं प्रभूष्णुरजोऽरजाः ।
त्वमादिदेवो देवानामधिदेवो महेश्वरः ॥ १

त्वं स्रष्टा त्वं विधातासि त्वमीशानः पुरुः पुमान् ।
त्वमादिपुरुषो विश्वेट् विश्वराड् विश्वतोमुखः ॥ २

विश्वव्यापी जगद्भर्ता विश्वदृग्विश्वभृद्विभुः ।
विश्वतोऽक्षिमयं ज्योतिर्विश्वयोनिर्वियोनिकः ॥ ३

हिरण्यगर्भो भगवान् वृषभो वृषभध्वजः ।
परमेष्ठी परं तत्त्वं परमात्मात्मभूरसि ॥ ४

त्वमिनस्त्वमधिज्योतिस्त्वमीशस्त्वमयोनिजः ।
अजरस्त्वमनादिस्त्वमनन्तस्त्वं त्वमच्युतः ॥ ५

त्वमक्षरस्त्वमक्षय्यस्तवमनक्षोऽस्यनक्षरः ।
विष्णुर्जिष्णुर्विजिष्णुश्च त्वं स्वयम्भूः स्वयम्प्रभः ॥ ६

त्वं शम्भुः शम्भवः शंयुः शंवदः शङ्करो हरः ।
हरिर्मोहासुरारिश्च तमोऽरिर्भव्यभास्करः ॥ ७

पुराणः कविराद्यस्त्वं योगी योगविदां वरः ।
त्वं शरण्यो वरेण्योऽग्र्यस्त्वं पूतः पुण्यनायकः ॥ ८

त्वं योगात्मा सयोगश्च सिद्धो बुद्धो निरुद्धवः ।
सूक्ष्मो निरञ्जनः कञ्जसञ्जातो जिनकुञ्जरः ॥ ९

छन्दो विच्छन्दसां कर्ता वेदविद्वदतां वरः ।
वाचस्पतिरधर्मारिर्धर्मादिर्धर्मनायकः ॥ १०

त्वं जिनः कामजिज्जेता त्वमर्हन्नरिहाऽरहाः ।
धर्मध्वजो धर्मपतिः कर्मारातिनिशुम्भनः ॥ ११

त्वं ह भव्याब्जिनीबन्धुस्त्वं हविभुक्त्वमध्वरः ।
त्वं मखाङ्गं मखज्येष्ठस्त्वं होता हव्यमेव च ॥ १२

यज्वाज्यं च त्वमिज्या च पुण्यो गण्यो गुणाकरः ।
त्वमपारिरपारश्च त्वममध्योऽपि मध्यमः ॥ १३

उत्तमोऽनुत्तरो ज्येष्ठो गरिष्ठः स्थेष्ठ एव च ।
त्वमणीयान् महीयांश्च स्थवीयान् गरिमास्पदम् ॥ १४

महान् महीयतो मह्यो भूष्णुः स्थास्नुरनश्वरः ।
जित्वरोऽनित्वरो नित्यः शिवः शान्तो भवान्तकः ॥ १५

त्वं हि ब्रह्मविदां ध्येयस्त्वं हि ब्रह्मप्रदेश्वरः ।
त्वां नाममालया देवमित्यभिष्टुमहे वयम् ॥ १६

अष्टोत्तरशतं नाम्नामित्यनुध्याय चेतसा ।
त्वामीडे नीडमीडानां प्रातिहार्याष्टकप्रभुम् ॥ १७

तवायं प्रचलच्छाखस्तुङ्गोऽशोकमहाङ्घ्रिपः ।
स्वच्छायासंश्रितान् पाति त्वत्तः शिक्षामिवाश्रितः ॥ १८

तवामी चामरव्रता यक्षैरुत्क्षिप्य वीजिताः ।
निर्धुनन्तीव निर्व्याजमागोगोमक्षिका नृणाम् ॥ १९

त्वामापतन्ति परितः सुमनोऽञ्जलयो दिवः ।
तुष्टया स्वर्गलक्ष्म्येव मुक्ता हर्षाश्रुबिन्दवः ॥ २०

छत्रत्रितयमाभाति सूच्छ्रितं जिन ! तावकम् ।
मुक्तालम्बनविभ्राजि लक्ष्म्याः क्रीडास्थलायितम् ॥ २१

तव हर्यासनं भाति विश्वभर्तुर्भवद्धरम् ।
कृतयत्नैरिवोद्वोढुं न्यग्भूयोढं मृगाधिपैः ॥ २२

तव देहप्रभोत्सर्पैरिदमाक्रम्यते सदः ।
पुण्याभिषेकसम्भार लम्भयद्भिरिवामितः ॥ २३

तव वाक्प्रसरो दिव्यः पुनाति जगतां मनः ।
मोहान्धतमसं धुन्वन् स्वज्ञानाकांशुकोपमः ॥ २४

प्रातिहार्याण्यहार्याणि तवामूनि चकासति ।
लक्ष्मी हंस्याः समाक्रीडपुलिनानि शुचीनि वा ॥ २५

नमो विश्वात्मने तुभ्यं तुभ्यं विश्वसृजे नमः ।
स्वयम्भुवे नमस्तुभ्यं क्षायिकैर्लब्धिपर्ययैः ॥ २६

ज्ञानदर्शनवीर्याणि विरतिः शुद्धदर्शनम् ।
दानादिलब्धयश्चेति क्षायिक्यस्तव शुद्धयः ॥ २७

ज्ञानमप्रतिधं विश्वं पर्यच्छैत्सीत्तवाक्रमात् ।
त्रयं ह्यावरणादेतद्व्यवधिः करणं क्रमः ॥ २८

चित्रं जगदिदं चित्रं त्वयाबोधि यदक्रमात् ।
अक्रमोऽपि क्वचिच्छ्लाघ्यः प्रभुमाश्रित्य लक्ष्यते ॥ २९

इन्द्रियेषु समग्रेषु तव सत्स्वप्यतीन्द्रियम् ।
ज्ञानमासीदचिन्त्या हि योगिनां प्रभुशक्तयः ॥ ३०

यथा ज्ञानं तवैवाभूत् क्षायिकं तव दर्शनम् ।
ताभ्यां युगपदेवासीदुपयोगस्तवाद्भुतम् ॥ ३१

तेन त्वं विश्वविज्ञेय व्यापिज्ञानगुणाद्भुतः ।
सर्वज्ञः सर्वदर्शी च योगिभिः परिगीयसे ॥ ३२

विश्वं विजानतोऽपीश ! यत्तेनास्ता श्रमक्लमौ ।
अनन्तवीर्यताशक्तेस्तन्माहात्म्यं परिस्फुटम् ॥ ३३

रागादिचित्तकालुष्यव्यपायादुदिता तव ।
विरतिः सुखमात्मोत्थं व्यनक्त्यात्यन्तिकं विभो ! ॥ ३४

विरतिः सुखमिष्टं चेत् सुखं त्वय्येव केवलम् ।
नो चेन्नैवासुखं नाम किञ्चिदत्र जगत्त्रये ॥ ३५

प्रसन्नकलुषं तोयं यथेह स्वच्छतां व्रजेत् ।
मिथ्यात्वकर्दमापायाद्दृक् शुद्धिस्ते तथा मता ॥ ३६

सत्योऽपि लब्धयः शेषास्त्वयि नार्थक्रियाकृतः ।
कृतकृत्ये बहिर्द्रव्यसंबन्धो हि निरर्थकः ॥ ३७

एवं प्राया गुणा नाथ ! भवतोऽनन्तधा मताः ।
तानहं लेशतोऽपीश ! न स्तोतुमलमल्पधीः ॥ ३८

तदास्तां ते गुणस्तोत्रं नाममात्रं च कीर्तितम् ।
पुनाति नस्ततो देव ! त्वन्नामोद्देशतः श्रिताः ॥ ३९

हिरण्यगर्भमाहुस्त्वां यतो वृष्टिर्हिरण्मयी ।
गर्भावतरणे नाथ ! प्रादुरासीत्तदाद्भुता ॥ ४०

वृषभोऽसि सुरैर्वृष्टरत्नवर्षः स्वसम्भवे ।
जन्माभिषिक्तये मेरुं मृष्टवान्वृषभोऽप्यसि ॥ ४१

अशेषज्ञेयसंक्रान्तज्ञानमूर्तिर्यतो भवान् ।
अतः सर्वगतं प्राहुस्त्वां देव ! परमर्षयः ॥ ४२

त्वयीत्यादीनि नामानि विभ्रत्यन्वर्थतां यतः ।
ततोऽसि त्वं जगज्ज्येष्ठः परमेष्ठो सनातनः ॥ ४३

त्वद्भक्तिचोदितामेनां मामिकां धियमक्षमः ।
धर्तुं स्तुतिपथे तेऽद्य प्रवृत्तोऽस्म्येवमक्षर ! ॥ ४४

त्वयोपदर्शितं मार्गमुपास्य शिवमीप्सितः ।
त्वां देवमित्युपासीनान् प्रसीदानुगृहाण नः ॥ ४५

भवन्तमित्यभिष्टुत्य विष्टपातिगवैभवम् ।
त्वय्येव भक्तिकृशां प्रार्थये नान्यदर्थये ॥ ४६

श्रीआदिपुराणान्तर्गता द्वात्रिंशदिन्द्रकारिता

## १०४. ॥ श्रीऋषभजिनस्तुतिः ॥

(प्रतिमाक्षरा)

जिननाथसंस्तवकृतौ भवतो वयमुद्यताः स्म गुणरत्ननिधेः ।
विधियोऽपि मन्दवचसोऽपि ननु
त्वयि भक्तिरेव फलतीष्टफलम् ॥ १

मतिशक्तिसारकृतवाग्विभवस्त्वयि भक्तिमेव वयमातनुमः ।
अमृताम्बुधेर्जलमलं न पुमान्
निखिलं प्रपातुमिति किं न पिबेत् ॥ २

क्व वयं जडाः क्व च गुणाम्बुनिधिस्त्व देव ! पाररहितः परमः।
इति जानतोऽपि जिन ! सम्प्रति
नस्त्वयि भक्तिरेव मुखरीकुरुते ॥ ३

गणभृद्भिरप्यगणितानणूंस्तव सद्गुणान्वयमभीष्टुमहे ।
किल चित्रमेतदथवा प्रभुतां तव संश्रितः किमिव नेशिशिषुः॥४

(द्रुतविलम्बित)

तदियमीडिडिषन् विदधाति नस्त्वयि निरूढतरा जिननिश्चला ।
प्रसृतभक्तिपारगुणोदया स्तुतिपथेऽद्य ततो वयमुद्यताः ॥ ५

त्वमसि विश्वदृगीश्वर ! विश्वसृट् !
त्वमसि विश्वगुणाम्बुधिरक्षयः ।
त्वमसि देव ! जगद्धितशासनः
स्तुतिमतोऽनुगृहाण जिनेश ! नः ॥ ६

तव जिनार्क ! विभान्ति गुणांशवः
सकलकर्मकलङ्कनिविनिःसृताः ।
घनवियोगविनिर्मलमूर्तयो दिनमणेरिव भासुरभानवः ॥ ७

गुणमणींस्त्वमनन्ततयान्वितान् जिन ! समुद्वहसेऽतिविनिर्मलान्।
जलधिरात्मगभीरजलाश्रितानिव मणीनमलाननणुत्विषः ॥ ८

त्वमिनसंसृतिवल्लरिकामिमामतितरामुरुदुःखफलप्रदाम् ।
जननमृत्युजराकुसुमाचितां शमकरैर्भवन्नुदपीपटः ॥ ९

(तामरस)

जिनवरमोहमहापृतनेशान् प्रबलतरांश्चतुरस्तु कषायान् ।
निशिततपोमयतीव्रमहांसि प्रहतिभिराशुतरामजयस्त्वम् ॥ १०

मनसिजशत्रुमजय्यमलक्ष्यं विरतिमयी शितहेतिततिस्ते ।
समरभरे विनिपातयति स्म त्वमसि ततो भुवनैकगरिष्ठः ॥११

जितमदनस्य तवेश ! महत्त्वं वपुरिदमेव हि शास्ति मनोज्ञम् ।
न विकृतिभाग्न कटाक्षनिरीक्षा परमविकारमनाभरणोद्घम् ॥१२

प्रविकुरुते हृदि यस्य मनोजः स विकुरुते स्फुटरागपरागः ।
विकृतिरनङ्गजितस्तव नाभूद् विभवभवान्भुवनैकगुरुस्तत् ॥१३

स किल विनृत्यति गायति वल्गत्यपलापति प्रहसत्यपि मूढः ।
मदनवशो जितमन्मथ ! ते तु प्रशमसुखं वपुरेव निराह ॥ १४

(नवमालिनी)

विरहितमानमत्सर ! तवेदं वपुरपरागमस्तकलिपङ्कम् ।
तव भुवनेश्वरत्वमपरागं प्रकटयति स्फुटं निकृतिहीनम् ॥ १५

तव वपुरामिलत्सकलशोभासमुदयमस्तवस्त्रमपि रम्यम् ।
अतिरुचिरस्य रत्नमणिराशेरपवरणं किमिष्टमुरुदीप्तेः ॥ १६

स्विदिरहितं विहीनमलदोषं सुरभितरं सुलक्ष्मघटितं ते ।
क्षतजवियुक्तमस्ततिमिरौघं व्यपगतधातु वज्रघनसन्धि ॥ १७

समचतुरस्त्रमप्रमितवीर्यं प्रियहितवाग्निमेषपरिहीनम् ।
वपुरिदमच्छदिव्यमणिदीप्रं त्वमसि ततोऽधिदेवपदभागी ॥१८

इदमतिमानुषं तव शरीरं सकलविकारमोहमदहीनम् ।
प्रकटयतीश ! ते भुवनलङ्घि प्रभुतमवैभवं कनककान्ति ॥१९

(प्रमुदितवदना)

स्पृशति न हि भवन्तमागश्च यः किमु दिनपमभिद्रवेत्तामसम् ।
वितिमिर स भवान् जगत्साधने ज्वलदुरुमहसा प्रदीपायते ॥२०

(जलधरमाला)

रैधारा ते द्युसम वतारेऽपसन्नाकेशानां पदविमशेषां रुध्वा ।
स्वर्गादारात् कनकमयीं वा सृष्टिं
तन्वानसौ भुवनकुटीरस्यान्तः ॥ २१

रैधारैरावतकरदीर्घा रेजे रे जेतारं भजत जना इत्येवम् ।
मूर्तीभूता तव जिनलक्ष्मीर्लोके
संबोधं वा सपदि समातन्वाना ॥ २२

त्वत्संभूतौ सुरकरमुक्ता व्योम्नि पौष्पी वृष्टिः सुरभितरा संरेजे ।
मत्तालीनां कलरुतमातन्वाना
नाकस्त्रीणां नयनततिर्वा यान्ती ॥ २३

मेरोः शृङ्गे समजनि दुग्धाम्भोधेः
स्वच्छाम्भोभिः कनकघटैर्गम्भीरैः ।
माहात्म्यं ते जगति वितन्वन्भावि
स्वधौरेयैर्गुरुरभिषेकः पूतः ॥ २४

त्वां निष्क्रान्तौ मणिमययानारूढं
वोढुं सज्जा वयमिति नैतच्चित्रम् ।
आनिर्वाणान्नियतममी गीर्वाणाः
किंकुर्वाणा ननु जिन कल्याणे ते ॥ २५

त्वं धातासि त्रिभुवनभर्ताद्यत्वे कैवल्यार्के स्फुटमुदितेऽस्मिन्दीप्रे।
तस्माद्देवं जननजरातङ्कारिं त्वां नन्नमो गुणविधिमग्र्यं लोके ॥२६

(प्रहर्षिणी)

त्वं मित्रं त्वमसि गुरुस्त्वमेव भर्ता
त्वं स्रष्टा भुवनपितामहस्त्वमेव ।
त्वां ध्यायन्नमृतिसुखं प्रयाति जन्तु-
स्त्रायस्व त्रिजगदिदं त्वमद्य पातात् ॥ २७

(रुचिरा)

परं पदं परमसुखोदयास्पदं विवित्सवश्चिरमहि योगिनोऽक्षरम् ।
त्वयोदितं जिन ! परमागमाक्षरं
विचिन्वते भवविलयाय सद्धियः ॥ २८

त्वयोदिते पथि जिन ! ये वितन्वते परां धृतिं प्रमदपरम्परायुजः।
त एव संसृतिलत्तिकां प्रतायिनीं
दहत्यलं स्मृतिदहनार्चिषा भृशम् ॥ २९

(मत्तमयूर)

वातोद्धूताः क्षीरपयोधेरिव वीचीरुत्-
प्रेक्ष्यामूश्चामरपङ्क्तीर्भवदीयाः ।
पीयूषांशोर्दीप्तिसमे तीरिव शुभ्रा
मोमुच्यन्ते संसृतिभाजो भवबन्धात् ॥ ३०

सैंहं पीठं स्वां द्युतिमिद्धामतिभानुं
तन्वानं तद्भाति विभोस्ते पृथु तुङ्गम् ।
मेरोः शृङ्गं वा मणिनद्धं सुरसेव्यं
न्यक्कुर्वाणं लोकमशेषं स्वमहिम्ना ॥ ३१

(मञ्जुभाषिणी)

महितोदयस्य शिवमार्गदेशिनः सुरशिल्पनिर्मितमदोऽर्हतस्तव ।
प्रथते सितातपनिवारणत्रयं
शरदिन्दुबिम्बमिव कान्तिमत्तया ॥ ३२

( )

वृक्षोऽशोको मरकतरुचिरस्कन्धो
भाति श्रीमानयमतिरुचिराः शाखाः ।
बाहूकृत्य स्फुटमिव नटितं तन्वन्-
वातोद्धूतः कलरुतमधुकृन्मालः ॥ ३३

पुष्पाकीर्णो नृसुरमुनिवरैः कान्तो मन्दं मन्दं मृदुतरपवना धूतः।
सच्छायोऽयं विहत नृशुगशोकोऽगो
भाति श्रीमांस्त्वमिव हि जगतां श्रेयः ॥ ३४

(असम्बाधा)

व्याप्ताकाशां वृष्टिमलिकुलरुतोद्गीतां
पौष्पीं देवास्त्वां प्रतिभुवनगृहस्याग्रात् ।
मुञ्चत्येते दुन्दुभिमधुरदैः सार्द्धं
प्रावृड्जीमूतान् स्तनितमुखरिताञ्जित्वा ॥ ३५

(अपराजिता)

त्वदमरपटहैर्विशङ्क्य घनागमं पटुजलदघटानिरुद्धनभोङ्गणम्।
विरचितरुचिमत्कलापसुमन्थरा
मदकलमधुना रुवन्ति शिखाबलाः ॥ ३६

(प्रहरणकलिका)

तव जिन ! ततदेहरुचिशरवण चमररुहततिः सितविहगरुचिम्।
इयमनुतनुते रुचिरतरतनुर्मणिमुकुटसमिद्धरुचिरसुरधुता ॥ ३७

(वसन्ततिलका)

त्वद्दिव्यवागियमशेषपदार्थगर्भा
भाषान्तराणि सकलानि निदर्शयन्ती ।
तत्त्वावबोधमचिरात् कुरुते बुधानां
स्याद्वादनीति विहतान्धमतान्धकारा ॥ ३८

प्रक्षालयत्यखिलमेव मनोमलं
नस्त्वद्भारतीमयमिदं शुचिपुण्यमम्बु ।
तीर्थं तदेव हि विनेयजनाजवञ्ज
वावारसन्तरणवर्त्म भवत्प्रणीतम् ॥ ३९

त्वं सर्वगः सकलवस्तुगतावबोध-
स्त्वं सर्ववित्प्रमितविश्वपदार्थसार्थः ।
त्वं सर्वजिद्विदितमन्मथमोहशत्रु-
स्त्वं सर्वदृङ्निखिलभावविशेषदर्शी ॥ ४०

त्वं तीर्थकृत्सकलपापमलापहारि-
सद्धर्मतीर्थविमलीकरणैकनिष्ठः ।
त्वं मन्त्रकृन्निखिलपापविषापहारि-
पुण्यश्रुति प्रवरमन्त्रविधानचुञ्चुः ॥ ४१

त्वामामनन्ति मुनयः पुरुषं पुराणं
त्वां प्राहुरच्युतमृषीश्वरमक्षयर्द्धिम् ।
तस्माद्भवान्तक भवन्तमचिन्त्ययोगं
योगीश्वरं जगदुपास्यमुपास्महे स्म ॥ ४२

तुभ्यं नमः सकलघातिमलव्यपाय-
संभूतकेवलमयामललोचनाय ।
तुभ्यं नमो दुरितबन्धनशृङ्खलानां
छेत्त्रे भवार्गलमिदे जिनकुञ्जराय ॥ ४३

तुभ्यं नमस्त्रिभुवनैकपितामहाय
तुभ्यं नमः परमनिर्वृतिकारणाय ।
तुभ्यं नमोऽधिगुरवे गुरवे गुणौघैः-
स्तुभ्यं नमो विदितविश्वजगत्त्रयाय ॥ ४४

इत्युच्चकैः स्तुतिमुदारगुणानुरागा-
दस्माभिरीश ! रचितां त्वयि चित्रवर्णाम् ।

देव ! प्रसीद परमेश्वर ! भक्तिपूतां
पादार्पितां स्रजमिवानुगृहाण चार्वीम् ॥ ४५

त्वामीड्महे जिन ! भवन्तमनुस्मराम-
स्त्वां कुड्मलीकृतकरा वयमानमामः ।
त्वत्संस्तुतावुपचितं यदिहाद्य पुण्यं
तेनास्तु भक्तिरमला त्वयि नः प्रसन्ना ॥ ४६

पञ्चस्तूपान्वयि-भगवज्जिनसेनविनिर्मिता
श्रीआदिपुराणान्तर्गता

## १०५. ॥ शताष्टोत्तरनामा श्रीऋषभजिनस्तुतिः ॥

(अनुष्टुभ्)

जगत्स्रष्टारमीशानमभीष्टफलदायिनम् ।
त्वामनिष्टविघाताय समभिष्टुमहे वयम् ॥ १

गुणास्ते गणनातीताः स्तूयन्तेऽस्मद्विधैः कथम् ।
भक्त्या तथापि तद्व्याजात्तन्मः(न्नः)प्रोन्नतिमात्मनः ॥ २

बहिरन्तमलापायात् स्फुरन्तीश ! गुणास्तव ।
घनोपरोधनिर्मुक्तमूर्तेरिव रवेः कराः ॥ ३

त्रिलोकपावनीं पुण्यां जैनीं श्रुतिमिवामलाम् ।
प्रव्रज्यां दधते तुभ्यं नमः सार्वाय शंभवे ॥ ४

विध्यापितजगत्तापा जगतामेकपावनी ।
स्वर्धुनीव पुनीयान्नो दीक्षेयं पारमेश्वरी ॥ ५

सु वर्णा रुचिरा हृद्या रत्नैर्दीप्तैरलङ्कृता ।
रैधारेवाभिनिष्क्रान्तिः यौष्माकीया धिनोति नः ॥ ६

मुक्तावुत्तिष्ठमानस्त्वं तत्कालोपनतैः सितैः ।
प्रबुद्धः परिणामैः प्राक् पश्चाल्लौकान्तिकामरैः ॥ ७

परिनिष्क्रमणे योऽयमभिप्रायो जगत्सृजः ।
स ते यतः स्वतो जातः स्वयं बुद्धोऽस्यतो मुने: ॥ ८

राज्यलक्ष्मीमसम्भोग्यामाकलय्य चलामिमाम् ।
क्लेशहानाय निर्वाणदीक्षां त्वं प्रत्यपद्यथाः ॥ ९

स्नेहालानकमुन्मूल्य विशतोऽद्य वनं तव ।
न कश्चित् प्रतिरोधोऽभून्मदान्धस्येव दन्तिनः ॥ १०

स्वप्नसम्भोगनिर्भासा भोगाः संपत्प्रणश्वरी ।
जीवितं चलमित्याधास्त्वं मनः शाश्वते पथि ॥ ११

अवधूय चलां लक्ष्मीं निर्धूय स्नेहबन्धनम् ।
धनं रज इवोद्धूय मुक्त्या संगंस्यते भवान् ॥ १२

राज्यलक्ष्म्याः परिम्लानिं मुक्तिलक्ष्म्याः परां मुदम् ।
प्रव्यञ्जयंस्तपोलक्ष्म्यामासजस्त्वं विना रतेः ॥ १३

राज्यश्रियां विरक्तोऽसि संरक्तोऽसि तपःश्रियाम् ।
मुक्तिश्रियां च सोत्कण्ठो गतैवं ते विरागता ॥ १४

ज्ञात्वा हेयमुपेयं च हित्वा हेयमिवाखिलम् ।
उपादेयमुपादित्सोः कथं ते समदर्शिता ॥ १५

पराधीनं सुखं हित्वा सुखं स्वाधीनमीप्सतः ।
त्यक्त्वाल्पां विपुलां चर्द्धिं वाञ्छतो विरतिः क्व ते ॥ १६

आमनन्त्यात्मविज्ञानं योगिनां हृदयं परम् ।
कीदृक् तवात्मविज्ञानमात्मवत्पश्यतः परान् ॥ १७

तथा परिचरन्त्ये यथापूर्वं सुरासुराः ।
त्वामुपास्ते च गूढं श्रीः कुतस्त्यस्ते तपःस्मयः ॥ १८

नैस्संगीमास्थितश्चर्यां सुखानुशयमप्यहन् ।
सुखीति कृतिभिर्देव ! त्वं तथाप्यभिलप्यसे ॥ १९

ज्ञानशक्तित्रयीमूढ्वा बिभित्सोः कर्मसाधनम् ।
जिगीषुवृत्तमद्यापि तपोराज्ये तवास्त्यदः ॥ २०

मोहान्धतमसध्वंसे बोधितां ज्ञानदीपिकाम् ।
त्वमादायचरो नैव क्लेशापातेऽवसीदसि ॥ २१

भट्टारकबरीभृष्टिः कर्मणोऽष्टतयस्य या ।
तां प्रति प्रज्वलत्येषा त्वद्ध्यानाग्निशिखोच्छिखा ॥ २२

दृष्टतत्त्ववरीवृष्टिः कर्माष्टकवनस्य या ।
तत्रोत्क्षिप्ता कुठारीयं रत्नत्रयमयी त्वया ॥ २३

ज्ञानवैराग्यसंपत्तिस्तवैषानन्यगोचरा ।
विमुक्तिसाधनायालं भक्तानां च भवोच्छिदे ॥ २४

इति स्वार्थां परार्थां च बोधसंपदमूर्तिजाम् ।
दधतेऽपि नमस्तुभ्यं विरागाय गरीयसे ॥ २५

कुल्यपाकपुरमण्डन-

## १०६. ॥ श्रीमाणिक्यदेवस्तवनम् ॥

(वसन्ततिलका)

श्रीकुल्पपाकपुरभूमिमृगाक्षिवक्षः-
शृङ्गारतारतरहारसमं शमीशम् ।
'माणिक्यदेव' इति विश्रुतमादिदेवं
भक्तेरहं जिनपतिं स्तवितुं यतिष्ये ॥ १

स्तोतुं महेन्द्रमहनीयमहीयसस्ते
लोकम्पृणान् गुणगणान् मनुजः क ईष्टे ?
विज्ञोऽपि किन्तु गगनाङ्गणसंस्थतारा-
स्तारा इमा अजगणद्गणनाद्यतीताः ॥ २

नीलद्युतिं मरकतोत्तमसाररूपां
स्फूर्जज्जटायुगलमांसलितांऽसदेशाम् ।
भक्त्या भदन्त ! भरतेश्वरसार्वभौमो
मूर्त्तिं विभो ! निरुपमां निरमीमपँस्ते ॥ ३

औदार्यतस्त्वमिह विश्वनमस्य ! शङ्के
जेजीयथाः प्रथमनाथ ! कुबेरयक्षम् ।
तत्पाणिलक्षणमिषादुपदां स तुभ्यं
प्राजेघयीन्निजनिधी किमु पद्मशङ्खौ ? ॥ ४

माहेश्वरास्त्रिजगदीश ! महेश्वरं च
विष्णुं च वैष्णवजना जिनपं च जैनाः ।
हैरण्यगर्भमनुजाश्च हिरण्यगर्भं
त्वां सौगताश्च सुगतं जिनमामनन्ति ॥ ५

स्थानं ममाम्बरमपि प्रविजेजितेया-
द्वैपुल्यतस्तदिह कीदृशमस्ति नूनम् ।
एवं विचिन्त्य भवतो हृदयं दिदृक्षु-
र्भानुस्त्वदीयचिबुके समुपेयिवान् किम् ? ॥ ६

(शार्दुलविक्रिडीतम्)

शून्यं भे सदनं नभस्तलमिदं तत्रापि चास्तक्षयौ
भ्रान्तिश्रान्तिकृता च तान्तिरपरा राहोश्च भीतिः परा ।
तेन स्थातुमिहोचितं नहि ममेत्यालोच्य किं तावकं
सर्वोत्कृष्टललाटपट्टममलं सोमः समाशेश्रयीत् ? ॥ ७

ऐश्वर्येण च विश्वशङ्करतया जाने जिनेश ! त्वया
जेजायि त्रिजगत्पते ! पशुपतिस्तस्माद् ध्वजव्याजतः ।
यानं स्वं वृषभं विमुच्य भवतः पादारविन्दादधो
नाभिस्थः किमु सेसयोनि सततं त्वां लिङ्गरूपेण सः ॥ ८

पूर्वं त्वां भरतादिभूपतिवरा देवाश्च देवेश्वरा
आनर्चुस्तदनन्तरं जिनवराराध्यामरं सुस्थितम् ।
आनीयाम्बुधिमध्यतः क्षितिपतिः श्रीशङ्करोऽतास्थपद्
विश्वाधीश ! तिलङ्गदेशमुकुटे श्रीकुल्पपाके पुरे ॥ ९

स्वामिंस्त्वत्स्नपनाम्भसाऽपि रभसा दीपः प्रदेदीप्यते
चैत्यान्तः क्षरदम्बुशीकरभरैर्वासश्च चेक्लिद्यते ।
त्वद्यात्रागतभाग्यभासुरनरस्येत्यादिरद्यापि ते
पोस्फूर्ज्जत्त्रिजगत्यमेयमहीमा कं कं न चित्रीयते ? ॥ १०

एवं माणिक्यदेवं त्रिभुवनजनताचिन्तितामर्त्यवृक्षम्
सार्वश्रीकुल्पपाकप्रवरपुरमहीमण्डनं नाभिसूनुम् ।

नोनूयन्ते भदन्तं भुवि भविकजना भूयसी भक्तयो ये
बोभूयन्ते द्रुतं ते विशदतमचिदानन्दसन्दोहगेहम् ॥(स्रग्धरा)११

श्रीमण्डपाऽचलमण्डन-

## १०७. ॥ श्रीआदिदेवस्तवः ॥

श्रीनाभिसम्भव ! विभो ! भुवनप्रसिद्ध-
श्रीमण्डपाऽचलमहीतलमण्डन ! त्वाम् ।
भक्त्या विनम्रजनमानसचिन्तिताऽर्थ-
सम्पत्तिकल्पतरुतुल्यमहं स्तवीमि ॥ (वसन्ततिलका) १

लोकत्रयाऽलङ्कृतिसल्ललाम !
स्वामिंस्त्वदीयेन गुणस्तवेन ।
गच्छन्ति पापान्यखिलानि शोषं
ग्रीष्माऽर्कतापेन यथा सरांसि ॥ (इन्द्रवज्रा) २

प्रापोल्लासं मेऽद्य कल्याणवल्लि-
र्विश्वाऽधीश ! श्रद्धया सार्धमुच्चैः ।
दिष्ट्या दृष्टः स्पष्टपीयूषवृष्टि-
प्रायः प्राञ्चत्पुण्ययोगेन यत् त्वम् ॥ (शालिनी) ३

यस्य जनस्य जिनेश ! निवासं
त्वं हृदये कुरुषे सविलासम् ।
यान्ति ततो विपदो हि सदर्पा
मन्त्रविदः पुरुषादिव सर्पाः ॥ (दोधकम्) ४

देव ! भव्यनयनाऽमृताञ्जनं
त्वां शशाङ्कमिव सौम्यदर्शनम् ।
सच्चकोर इव चारुचेतनः
प्रेक्ष्य हृष्यति न कः कृती जनः ॥ (रथोद्धता) ५

देव ! तावकपदाऽम्बुजसेवा
चाऽऽप्यते यदि ततः कथमन्यः ।
सेव्यते हि वरिवस्यति कश्चित्
कल्पपादपमपास्य करीरम् ॥ (स्वागता) ६

विश्वत्रयभालविशालमणे !
भव्याऽम्बुजबोधविधिद्युमणे ! ।
त्वं तिष्ठसि यस्य मनोगगने
तिष्ठन्ति न तत्र तमांसि जने ॥ (मुखमोटनकम्) ७

जिनराज ! सुराऽसुरेश्वरा-
स्तव पादाऽम्बुरुहं श्रिया श्रितम् ।
भ्रमरा इव पर्युपासते स्तुतिझङ्कारपराः प्रमोदतः ॥
(प्रबोधिता) ८

तव संस्तवने जिनेश ! यस्य प्रसरति वागनिशं जगन्नमस्य ! ।
किल तस्य गुणावली न केषां
मणिमालेव करोति कण्ठभूषाम् ॥ (अपछन्दसिकम्) ९

प्रभो ! भवन्तं स्तुतिभिः स्तुवन्ति ये
सुबुद्धिभिर्भूवलये विभान्ति ते ।
निशीथिनीनाथविभाऽवभासिता-
महौषधीभिर्निशि भूधरा इव ॥ (वंशस्थम्) १०

धन्यं कृतार्थोऽस्मि जिनेश ! यन्मया
त्वं वीक्षितः क्षीणकषायकश्मलः ।
जज्ञेऽद्य मे जीवितजन्मनोः फलं
प्रापं प्रभोऽद्याऽहमनुत्तरां श्रियम् ॥ (इन्द्रवंशा) ११

त्वं महाभाग्यसम्भारलभ्यः प्रभो !
भव्यराजीवराजीवनाऽहःप्रभो ! ।
कौशिकानामिवाऽपुण्यभाजां दृशां
गोचरं यासि नो देव ! देहस्पृशाम् ॥ (स्राग्विणी) १२

न सम्भावयेऽहं विभो ! स्वर्गलोके
सुधा श्रद्दधे नाऽपि पाताललोके ।
न चेदेवमत्रेत्य तद्गीःसुधां ते
कथं ? देवदैत्या मुदाऽऽस्वादयन्ते ॥ (भुजङ्गप्रयातम्) १३

स्वा वा स्वर्गादावस्ति चेत्तत्तया किं स्वामिन् !
सत्यां ते गीःसुधायां बुधानाम् ।
हित्वा हंसाः किं मानसं स्वच्छनीरं
कुर्वन्ति प्रीतिं पङ्किलाऽम्भःसरस्याम् ॥ (वैश्वदेवी) १४

जिन ! भवन्तमनन्तफलप्रदं सुरनिषेवित ! यः परिषेवते ।
सुरगवी-सुररत्न-सुरद्रुमा-
नपि तृणाय नरः स न मन्यते ॥ (द्रुतविलम्बितम्) १५

त्रिजगत्कमलाकलकेलिगृहं
तव वीक्ष्य मुखेन्दुममन्दमहम् ।
समवाप जिनेश्वर ! हर्षभरं
परितो जलराशिरिव प्रसरम् ॥ (तोटकम्) १६

मदमदनकदाग्रहादिदोषा-
स्त्वयि हृदये सति यान्ति नाशमीश ! ।
स्थितवति विपिने मृगाऽधिनाथे
किमु करिणः प्रसरन्ति वीतशङ्काः ॥ (पुष्पिताग्रा) १७

सर्वज्ञ ! प्रसृमरचन्द्रचारुकीर्त्ति-
प्रासारैर्धवलितविष्टपत्रयाऽद्य ।
निर्वाणादधिकतरामधीश ! धात्रीं
मन्येऽहं भवति समीक्षिते समक्षम् ॥ (प्रहर्षिणी) १८

करुणासुधारससमुद्र ! मुद्रित-
प्रणताङ्गिदुःखमुख ! विश्ववत्सल ! ।
प्रबलाऽन्तराऽरिविशरेण वेष्टितं
शरणोज्झितं झगिति मोचयेश माम् ॥ (नन्दिनी) १९

परिपूर्णपीयूषमयूखवन्मुखं वचनं च सच्चन्दनबिन्दुशीतलम् ।
नयनद्वयं तेऽमृतकुण्डसन्निभं
हरतेऽघतापं जिन ! कस्य कस्य न ? ॥ (नन्दिनी) २०

आपत्तापप्रशमनघन ! प्रत्यहं त्वां
संसेवन्ते मुदितहृदया ये जिनेन्द्र ! ।
आश्रीयन्ते तरव इव सद् वल्लिभिस्ते
चञ्चच्चन्द्रोज्ज्वलगुणगणश्रेणिभिः श्राक् ॥(शरभललितम्) २१

व्यपगतगणनानां तावकानां गुणानां
मतिविशदतमानां केन लभ्येत सङ्ख्या ? ।
गगनतलगतानां तारकाणामिवोच्चै-
र्जलधितलगतानां वा वसूनामिवेश ! ॥ (मालिनी) २२

सकलाऽर्थसिद्धिदमधीशमवाप्य यस्त्वा-
मभिवाञ्छति त्रिदशमानवराज्यलक्ष्मीम् ।
समवाप्य कल्पतरूनल्पमतिर्दुरापं
बदरादितुच्छफलमर्थयते स नूनम् ॥ (ऋषभः) २३

अपूर्वं विज्ञानं जगति तव यन्नो सहायः
प्रभो ! पाणौ वीणा न तव तव नो कोऽपि रागः ।
तथाऽप्येते देवाः सुरखचरमुख्याः स्वगीता-
दिकं हित्वा यान्ति ध्वनिमिह तव श्रोतुकामाः ॥ २४
(जयाऽऽनन्दः)

अशोकाऽऽख्यं वृक्षं सुरविरचितं पुष्पनिकरं
ध्वनिं दिव्यं श्रव्यं रुचिरचमरानाऽऽसनवरम् ।
वपुर्भासम्भारं समधुररवं दुन्दुभिमथ
प्रभो ! प्रेक्ष्य छत्रत्रयमधिमनः कस्य न मुदः ॥(शिखरिणी)२५

निखिलमगलन् मिथ्यात्वं मे सुदर्शनमुज्ज्वलं
समजनि तथा तीर्णस्तूर्णं मयाऽद्य भवाऽर्णवः ।
शिवपदसुखाऽऽस्वादः सद्योऽन्वभूयत यत्प्रभो !
तव शममयी रम्या मूर्त्तिर्निरैक्षि निरञ्जना ॥ (हरिणी) २६

दृशोः पथि जिन ! स्थिते त्वयि ममाऽद्य माद्यन्-
महापदः सपदि दारुणा क्षयमगुः समं कर्मभिः ।
श्रियः सकलमङ्गलैः सह मां शिश्रियुः समं
च तमसाऽगमन् मम समस्तमंहः क्षितिम् ॥ (पृथ्वी) २७

स्मारं स्मारं तव शिवकरं नाम नाथाऽऽत्मचित्तं
कारं कारं गुणगणनुतिं ते जिन ! स्वां च वाचम् ।

सेवं सेवं चलननलिनं तावकं स्वीयकायं
मर्त्त्याऽमर्त्त्याऽधिपतिपटलीपूजिताऽहं पुनीयाम् ॥ २८

(मन्दाक्रान्ता)

स्वामिन् ! मेरुः किमयमवनिभृद्यत्र जन्माऽभिषेक-
श्चक्रे शक्रैः प्रमुदितहृदयैः किं नु कैलाशशैलः ।
यस्मिन्मुक्तिः समजनि जिन ! ते किं नु शत्रुञ्जयो वा
स्थास्नुर्यत्र त्रिभुवनजनतां त्वं पुनीषेऽधुनाऽपि ॥ २९

(चन्द्रलेखा)

औन्नत्यं नयनप्रसादजनकप्रासादशृङ्गश्रिया
चञ्चच्चन्द्रमरीचिसञ्चयशुचिप्रस्तारिकीर्त्तिश्रिया ।
त्वत्संयोगजया जिनेश ! महिमामुच्चैःस्तरां चाऽऽश्रये-
न्नेकः क्षोणिधरः करोति कृतिनामेवंविधं विस्मयम् ॥ ३०

(शा.वि.)

परिस्फूर्जत्कीर्त्तिव्रततिपरिवृतं तापनिर्व्यापहेतुं
श्रमं च छिन्दन्तं सुखसदनमिमं त्वत्पदाऽम्भोजपूतम् ।
सुबुद्धिः श्रद्धालुः श्रयति हि जिन ! यो मण्डपं वृण्वते तं
यशःस्वनिर्वाणद्रविणमतिरतिप्रीतिपुण्यश्रियः स्राक् ॥ ३१

(शोभा)

एवं देवाऽधिदेव ! प्रथमजिनपते ! मण्डपोर्वीधरोर्वी-
चूडाचूडामणे ! त्वां गतगणनगुणं स्तौति यः स्वस्तिकामः ।
तस्याऽपास्याऽऽधिजालं दलय कलिमलं कर्ममर्माणि भिन्द्धि
छिन्द्धि व्याधिं समाधिं वितनु चिनु शुभं निर्वृतिं सन्निधेहि॥३२

(स्रग्धरा)

झगडियातीर्थमण्डन-

## १०८. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(वसन्ततिलका)

श्रीमत्पदाम्बुजलुठद् भवभीरुवृन्दैः,
संनादितं प्रवरसद्म यदीयमच्छम् ।
देशान्तरागतसुभव्यगणैः प्रकीर्ण-,
मादीश्वरं झगडिया विलसन्तमीडे ॥ १

भूत्या प्रसन्नमनसो विधिवद् यदीयां,
पूजां प्रफुल्लकुसुमोत्करतो विधाय ।
अक्षीणवित्तविभवाः सुरलोकपूज्या-,
आदीश्वरं झगडिया विलसन्तमीडे ॥ २

दिव्यर्द्धिसिद्धिसमलङ्कृतचारुचैत्यं,
विभ्राजते प्रखरघण्टनिनादघुष्टम् ।
यस्य प्रधानपुरुषोपचितान्तरालं,
आदीश्वरं झगडिया विलसन्तमीडे ॥ ३

देवाऽसुरेन्द्रनरलायकवन्दिताङ्घ्रिं,
सद् भक्तिभावितजनार्चितदिव्यमूर्तिम् ।
हृद्गोचरीकृतमलं समतां वहद्भिः,
आदीश्वरं झगडिया विलसन्तमीडे ॥ ४

संसारकूपपततां सुदृढं विशाल-
मालम्बनं सुहिततत्त्वविवेचितारम् ।

रागान्धिताऽक्षमनुजोष्णकरोपमान-,
मादीश्वरं झगडिया-विलसन्तमीडे ॥ ५

संतारकं निजपदाब्जनतप्रजानां,
भास्वच्चराऽचरगणं प्रविलोकितारम् ।
सृष्टारमक्षयदयाञ्चितधर्मबोधं-
मादीश्वरं झगडिया-विलसन्तमीडे ॥ ६

नुन्नोनयेन विनयोज्झितदेहिवर्गः,
संस्थापितो मुनिगणः सुदयाप्रधानः ।
सम्बोधितो जगति येन कलाकलाप-
मादीश्वरं झगडिया-विलसन्तमीडे ॥ ७

को नाम यस्य महिमानमनन्तगेयम्,
विस्तारतः कथयितुं विभुरस्ति लोके ।
लोकत्रयप्रथितकीर्तिवितानकं त-
मादीश्वरं झगडिया-विलसन्तमीडे ॥ ८

झगडियातीर्थमण्डन-

## १०९. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(मन्दाक्रान्ता)

यो विश्वेषामभयजनकः सत्यवाणीविलासो-
यः सत्त्वानां विधुरमखिलं नाशयत्वात्मभावात् ।
यः पारोक्ष्यं परगतमजो-ध्यात एव च्छिनोति,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ १

सद्यः शान्तिर्भवति मनना-द्यद्विभूतेर्जनाना-,
मात्मानन्दः प्रभवति परोत्कर्षतादानदक्षः ।

बाह्यो भावस्त्यजति हृदयं शुद्धशान्त-स्वरूप-,
मादीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ २

सोपानालिर्विलसति महाचैत्यसम्बन्धिनी या,
तामाश्रित्याऽक्षयसुखगता भव्यजीवा भवन्ति ।
मूर्त्तिं यस्य प्रवरविभया भ्राजमानां विलोक्य,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ३

मूर्तिं यावत्तव विषहरां शुद्धधर्मानुरक्ता,
नो वीक्षन्ते परजनकृपाकाङ्क्षिणो वीतमोहाः ।
पापच्यन्तेऽभयदभुवने तावदक्षीणपापा,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ४

मोक्षाकाङ्क्षा गतभवभयाः सिद्ध्यति त्वत्प्रणामात्,
दुष्प्राप्योऽसौ परमविभवाद् दुष्टकर्मारिमूलात् ।
सिद्धिः साध्या गुरुमुखतया सर्वथा मानवाना-,
मादीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ५

यस्याऽधीनं जगति विशदोद्धारकं धर्मवर्त्म,
यस्याऽधीनं जगदभिमतां शर्म्मसन्तानमिद्धम् ।
यस्याऽधीनं कलिगुणगणोद्भेदकं मुख्यतत्त्व-,
मादीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ६

पारावारे जननमरणक्लेशवित्ते भवेऽस्मिन्,
पीड्यन्त-स्त्वच्चरणवनमनावमासाद्य सद्यः ।
तीरोत्तीर्णाः सुखमनुभवन्तो न खिन्नाः परत्र,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ७

हृद्ये तत्त्वे परिणतमतिस्तावकीने महीने,
भव्यो नव्योऽनवरतमसौ संसृते-र्याति पारम् ।
स्मारं स्मारं यदि तव पदं ध्यानमग्ना (अन्तरात्मा) जनास्ते(?)
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥ ८

केसरीयातीर्थमण्डन-

## ११०. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(पञ्चचामर)

प्रकृष्ट-कृष्ट-लोकवृन्दसन्नतक्रमाम्बुज !
प्रशान्तशान्त देहि कामदाह वारिदानन ! ।
प्रभात-भात-भानु-भासमान-पिङ्गल-प्रभ !
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ १

विदेशदेश-वासिनो जना अनेकधा-रता,
निवृत्ति वृत्ति शालिनोऽदराः समेत्य पुञ्जतः ।
सुकुङ्कुमस्य पूजयन्त्यहो वपुस्त्वदीभयम्,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ २

प्रकृष्टनीलनीलरत्न-सुन्दर-द्युतिव्रज-
स्त्वदीय देहजः सुजातपुण्यपुञ्जशालिनाम् ।
विराजते विशिष्ट-पाप-हारकः सदोज्ज्वलो,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ३

समृद्धि-सिद्ध-दानद-क्षेयक्षल क्ष-सेवित !,
प्रचण्ड-लोक-संस्थिताऽरि वृन्द-कष्ट-नाशन ! ।

मुधा धराधिपाऽधरी-कृताऽखिलाङ्गि धारिणे,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ४

विचित्र चित्र मण्डकत्रयाङ्गि ते सुमन्दिरे,
विराजमानराजराज चर्चित-क्रमाम्बुज !
सराग-राग-हारिणे विहारि-वृन्द-तायिने,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ५

चमत्कृतिः सदा त्वदीयपादपङ्कजश्रिता,
प्रमादकारिमोदधारिणां सुलोचनाम्बुज ।
विशिष्टशिष्टनैकधा स्वरुपदीप्तिदायिने,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ६

विशाल शालशालमान धाम धारिणे महा-,
धराधर प्रधान दुर्ग मार्ग भीति हारिणे ।
सदा नदत्यहो यदीय तूर्य वृन्द मद्भुपं,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ७

अमन्द मन्द भावना मरूप्रदेश पाविने,
कलौ मलौ ध हारिणेऽघ हारिणे सुदेहिनाम् ।
विभिन्न भिन्न चेतसा मुखण्डितोग्र दीप्तये
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ८

स्वभाव भाविताऽऽत्मना सुपुण्यशालिनाऽङ्गिना,
प्रभातकाल उत्तमं हे केसरप्रियाऽष्टकम् ।
सुखपदं सुभण्यते सदैक भावतो हृदि,
तदा क्रमेण शैव सम्पदं श्रयेत्स मानवः ॥ ९

सोपारकमण्डन–

# १११. ॥ श्रीनाभेयजिनस्तवनम् ॥

श्रीसोपारकपत्तनावनी वामाक्षीकरकङ्कणप्रभम् ।
हृद्भक्त्या नतनाकिनायकं श्रीनाभेयजिनं स्तवीम्यहम् ॥ १
(शुद्धविराट्)

गङ्गानदीप्रौढतटस्थितं यः सङ्ख्याति दक्षः सिकतासमूहम् ।
सङ्ख्यातिगान् सोऽपि गुणांस्त्वदीयान्
वक्तुं न शक्नोति मनागपीह (इन्द्रवज्रा) ॥ २

तथाप्यहं जाड्यतमोभरेण स्वामिन् ! निरुद्धान्तरलोचनश्रीः ।
त्वत्स्तोत्रनिर्माणपथे प्रवृत्तिं कुर्वेऽन्धयष्ट्याभविशिष्टभक्त्या ॥३

विमलाचलमेखलावनीस्थितसोपारकपत्तने पुरा ।
त्वयि जीवति भूरिराजभिः प्रतिमैषा तव पूजिता प्रभो ! ॥ ४
(प्रबोधिता)

आद्यतीर्थकर ! भाग्यमद्य मे मेदुरं किल बभूव सत्त्वरम् ।
येन लोचनचकोरचन्द्रमा वीक्षितोऽसि भुवनाधिपो मया ॥ ५
(रथोद्धता)

नाभिमहीपतिवंशविशालाकाशविभासनभानुसमान ! ।
त्वं विधृतोऽसि विभो ! हृदये यैर्नाशमगादशिवं जिन ! तेषाम्॥६
(दोधकम्)

आदिदेव ! तव दर्शनमात्रात् पातकानि सकलानि जनानाम् ।
यान्ति शोषमिव गाढनिदाघादित्यतापविसरेण सरांसि ॥ ७
(स्वागता)

स्वामिन् ! पूजां विदधति तव ये भास्वद्भक्त्या नवनवकुसुमैः ।
आश्रीयन्ते त्रिभुवनविभवैस्ते पुष्पौघैरिव तरुनिवहाः ॥ ८
(भ्रमरविलसितम्)

संसारविकारविनाशविधौ हृद्यौषधसोदरवाक्यभरः ।
जीयाज्जिननायक ! विश्वविभो ! त्रैलोक्यजनावलिवन्द्यपदः ॥९
(मुखमोटनकम्)

ध्यायन्ति त्वां नाभिसूनो ! नरा ये श्रीसोपाराधीश्वरं भक्तियुक्ताः।
तेषां न स्यान्मानवानां कदाचिद्-
दुःखं तिर्यङ् नारकाणां भवोत्थम् ॥ (शालिनी) १०

शिवसौख्यरमावर ! नाभिनृपोज्ज्वलवंशविभूषण ! पापहर ! ।
संवीक्ष्य तवाननशीतकरं मुमुदे जननेत्रचकोरगणः ॥ ११
(तोटकम्)

त्वच्चैत्याद्भुतपादपस्य चरितं वृन्दारुदेवासुर-
श्रेणीमानवतिर्यगातपभरप्रध्वंसरूपं प्रभो ! ।
श्रुत्वा किं तरवोऽधुनाऽपि कदलीसन्नालिकेर्यादयः
पार्श्वे ते प्रथयन्ति सङ्घजनतातापापनोदं सदा ! ॥(शा.वि.)१२

चम्पकाशोककुन्दादयः पादपा नाथ ! नाकिप्रमुक्तप्रसूनावलिम् ।
वीक्ष्य किं पुष्पवृष्टिं वितन्वन्ति ते
सर्वतः सारसौरभ्यविभ्राजिताम् ॥ (स्राग्विणी) १३

चैत्याद्भुतप्रतिरवं तव सेवनाविधौ
सम्प्राप्तनिर्जरनरादिकशब्दसम्भवम् ।

श्रुत्वेतितर्कमनिशं रचयन्ति केऽप्यहो
स्वामी किमेष वदति स्फुटसर्वभाषया ॥ (मृदङ्कम्) १४

यदर्चा दरीदृश्यते श्वेतवर्णा विभो !
तावकीनाऽपि हेमाङ्गकान्ते ! ।
मृगाङ्कोज्ज्वलानां महाचामराणां
प्रभामण्डलं केवलं तत्र हेतुः ॥ (भुजङ्गप्रयातम्) १५

तव जिनेन्द्र ! मृगाधिपविष्टरं
मणिमयं त्रिदशैर्विहितं यदा ।
इह तदा जलधिः किल भक्तितो
निजवसून्यपि दातुमुपाययौ ॥ (द्रुतविलम्बितम्) १६

दिवसोद्गमे च तव पृष्ठिगतं
रविमण्डलं जिनपते ! विमलम् ।
अधुनाऽपि मुग्धमनुजेष्वनिशं
द्युतिमण्डलभ्रममिहातनुते ॥ (प्रमिताक्षमा) १७

वलानकस्थैरधुनाऽपि मानवैः
समुद्रकल्लोलसमुद्भवं रवम् ।
निशम्य शङ्का क्रियते जगद्विभो !
परिस्फुरद्दुन्दुभिनादसम्भवा ॥ (वंशस्थम्) १८

जिनेन्द्र ! विश्वत्रयवत्सलत्वात् किल त्वया दूरितदण्डमीश ! ।
त्रिमण्डपस्य च्छलतः पवित्रं तवाऽऽतपत्रत्रितयं चकास्ति ॥१९
(उपेन्द्रवज्रा)

श्रीकुङ्कणप्रवरदेशविभूषणेऽस्मिन्
सोपारकाह्वनगरे तव वीतराग !
इत्थं सदापि विबुधैः परिगीयमाना
सत्प्रातिहार्यकमला वरिवर्त्ति सर्वा ॥ (सिंहोद्धवा) २०

जिनवर ! भवदग्रे मन्त्रिभण्डारिकस्य
त्रिदशपथविलग्नप्रौढचैत्यच्छलेन ।
गुरुमणिमयकेतुः स्वीयचञ्चत्प्रभाभिः
प्रतिहतदिननाथः किं विराराष्टि शश्वत् ॥ (मालिनी) २१

नागेन्द्रप्रमुखगणेशमूर्त्तिदम्भात्
श्रीदानप्रभृतिवृषाणि मूर्त्तिमन्ति ।
श्रीनाभिक्षितिपसुत ! प्रभो ! पुरस्ते
प्रासादे ऋषभ ! विभो ! विभान्ति किन्तु ॥ (प्रहर्षिणी) २२

प्रभो ! षड्गव्यूतप्रपतितमहज्जीवशटित-
प्रभूताङ्गश्रेण्यां पतति न कदाचित् कृमिकुलम् ।
तथा विण्मूत्राऽम्भश्छगणनिचये जीवनिवहः
प्रभावात् स्वामिंस्ते सकलजनताचित्रकरतः ॥(शिखरिणी)२३

भविककमलवनदिनकरकरणे प्रसृमरशमरसविनिभृतहृदयः ।
हिमकरसममुखविदलितमदनो
भवदवनवघन ! जय जय जिनप ! ॥ (मणिगुणनिकरः) २४

प्रथमजिनेश्वरः प्रथममेदिनीपतिस्त्वं,
प्रथममहाव्रती प्रथमलब्धकेवलश्रीः ।
ऋषभ ! मुदा नतत्रिदशनाथसेव्यमानो
जय विजितेन्द्रियोत्कटहयेन्दुमण्डलास्यः ॥ (वाणिनी) २५

जिनेन्द्र ! तव शासनं भविककोकमालारविं
भवाब्धितरणे तरिं भजति यो जनः सादरम् ।
मनोरमरमाततिः श्रयति तं समुत्कण्ठिता
द्रुतं जलनिधिं यथा सकलमेदिनीसिन्धवः ॥ (पृथ्वी) २६

शमरससुधामग्ने नेत्रे सुधाकरसन्निभं
वदनममलं शस्त्रैर्हीनौ करौ वरविग्रहम् ।
अपरमपि ते सौम्याकारं विलोक्य जनावली
त्यजति सकलं मिथ्यात्वं श्रीजिनेन्द्र ! कुदेवजम् ॥(हरिणी)२७

प्रभो ! त्वत्पूजार्थं विरचयति विधिः कुङ्कुणाह्वानदेशे
सदाऽप्यस्मिन् जातीकुमुदकजलसत्केतकीचम्पकाद्यैः ।
प्रसूनैः सम्पूर्णां विपुलवनततिं ते तथा ढौकनार्थं
महाभक्त्या युक्तो विविधफलभरं दुर्लभं विश्वमध्ये ॥ २८
(शोभा)

देव ! त्वां ये त्रिसन्ध्यं परिमलबहुलैर्जात्यादिकुसुमै-
र्भक्त्या कुर्वन्ति पूजां प्रथमजिनपते ! कारुण्यजलधे ! ।
आश्रीयन्ते सदा ते धृतिमतिकमलासौभाग्यविभवै-
र्हस्तीन्द्रा दानमत्ता इव बहुमधुपैर्झङ्कारसुभगैः ॥(सुवदना) २९

रागद्वेषप्रभवमपहरेत् पापपूरं समस्तं
भव्यानां ते पदकमलयुगप्रेक्षणं देव ! सद्यः ।
श्रीमन्नाभिक्षितिपकुलरमाभालभूषाललामा
दित्या लोकः किमु तिमिरभरं नाशयेन्न क्षमायाम् ? ॥ ३०
(चन्द्रलेखा)

याचे स्वामिन्न धननिकरं नैव भूमीपतित्वं
नो चक्रित्वं न सुरपतितां नो महानन्दलक्ष्मीम् ।
आसंसारं तव पदकमलासेवनं किन्तु नित्यं
दद्यास्त्वं मे त्रिभुवनविभो ! त्वामिति प्रार्थयेऽहम् ॥ ३१
(मन्दाक्रान्ता)

एवं श्रीकुङ्कुणाख्यप्रवरतरमहादेशमध्यप्रतिष्ठ-
श्रीमत्सोपारकाह्वाऽद्भुतनगररमाकण्ठहारोपमं त्वाम् ।
सद्भक्त्या ये स्तुवन्ति प्रथमजिनपते ! ते रयात् प्राप्नुवन्ति
प्रौढं षट्खण्डराज्यं सुरपतिविभवं मोक्षलक्ष्मीं क्रमेण ॥ ३२
(स्रग्धरा)

अष्टमहाप्रातिहार्यमयम्

## ११२. ॥ श्रीऋषभदेवस्तोत्रम् ॥

(भुजङ्गप्रयात)

महानन्दलीलासरो राजहंसं
जगल्लोचनानन्द-राकानीशेशम् ।
मुनिध्येय-नाभेय-देवाधिदेवं,
स्तुवे लाभवन्तं भदन्तं भवन्ति ॥ १

अशोकोऽपि लोकं सशोकं क्षणेना-
करोद्वीतशोकं भवत्सन्निधिस्तम् ।
तथा मारुदेवो त्वदाराधकानां,
विलीयेत शोकेऽभ किं नाम चित्रम् ॥ २

न देवो भवन्तः परो वीतरागा-
दिति व्याहरत्युद्भटं दुन्दुम्भीकम् ।

निपीयेव दिव्यध्वनी तावकीनं,
तथा नाद्रीयन्ते सुधामा दितेया ॥ ३

महासेवते त्वामिदं किं परेभ्यः
परिम्भ्रंस भामण्डल सत्थतेन ।
त्रिलोकी मनस्ताप हारी त्वमेवा-
वदातातपत्रत्रयीति व्यनक्ति ॥ ४

भविष्यत् भवत् पाद-संस्पर्श-योग्या,
सुरैः पूज्यते पुष्पपुञ्जैरलापी ।
जगन्नाथ ! तच्चामरैर्वीजयत्यो,
भवन्तं सुराः किं न पूज्या भवेयुः ॥ ५

सितध्यान निस्तंस धारा विदीर्णा,
तरङ्गारताराहि नित्या जयश्री ।
तवैव त्रिलोकीशितुः स्वर्णसिंहा-
सनस्थस्य जागर्ति नैवापरस्य ॥ ६

इति प्रातिहार्यश्रिया स्फीतकीर्त्तिः,
प्रभुर्नाभिभूपाल-वंशार्णवेन्दु ।
शुचि-क्षायिकं दर्शनं मे वितीर्यात्,
स्तुतो दर्शनो स्फुरद्दर्शनश्रीः ॥ ७

## ११३. ॥ श्रीआदिनाथस्तवनम् ॥

(शार्दूलविक्रीडितम्)

श्रीमद् देववरानतोत्तमपदाऽम्भोजद्वयः सिद्धिदः,
श्रीसर्वार्थविमानतो वृतसुखश्च्युत्वाऽऽगतो भूतले ।

श्रद्धाध्याननिदानमानवगुणः, शर्म्मावली सद्गृहम्,
श्रीनाभेयजिनेश्वरोऽस्तु सुखदो, धर्मार्थिनां प्राणिनाम् ॥ १

त्रैलोक्यं कलयन्करामलकव-द्योनिं श्रितो नाकुलीम्,
सर्वज्ञः पुरुषोत्तमो जिनवरः, शान्तः समाधिस्थितः ।
सद्बोधाञ्चितहृद्यहृत्सरसिजः, सत्प्रेमराजन्मना,
भव्याम्भोजविभावसुर्विजयतां, श्रीमारुदेवप्रभुः ॥ २

सम्यग्ज्ञानकलान्विता विदधता, प्रौढप्रतापश्रियो,
येनाऽज्ञानतमस्ततिर्विनिहता, चेतःस्थिता प्राणिनाम् ।
सोऽयं मानसभूमिजार्त्तिविरुधां, सङ्घातमुन्मूलयन्,
माङ्गल्यं धनराशिमाँस्तनुमतां, कुर्याद्युगादीश्वरः ॥ ३

सर्वज्ञानमयो जगत्त्रयगुरुर्यः, संश्रिता यं जनाः,
येन श्री-रचला वृताऽमरगणा, यस्मै नमस्कुर्वते ।
यस्माद् दूरगतं विमोहतिमिरं, यस्याऽस्ति सेव्यं वचो,
यस्मिन् गौरवता स्थिता जिनवरे, वन्दे तमादीश्वरम् ॥ ४

श्रीसिद्धाचलसानुरत्नविलसन्मूर्त्ते ! कृपावारिधे !
भव्याम्भोजविबोधनैकतरणे, राजत्प्रभाभास्वर ! ।
दुर्ध्यानाऽनलतप्तमेघपटल ! ग्लानार्त्तिहानिप्रिय !
त्वं क्रीडस्व मदीयमानसवराऽऽरामे युगादीश्वर ! ॥ ५

## ११४. ॥ गुरुनामगुप्तश्रीआदिनाथस्तोत्रम् ॥

(अनुष्टुप्)

श्रीसर्वज्ञ जगच्चन्द्र, श्रीदेवेन्द्रगणस्तुतः ।
विद्यानन्दमय स्वामिन् ! जय त्वं वृषभध्वजः ॥ १

सद्धर्मघोषमातन्वन्, नृदेवासुरपर्षदि ।
सच्चकोरजनोल्लास-सोमप्रभ प्रभो ! जय ॥ २

सिद्धिसीमन्तिनीभाले, त्वं सोमतिलकोपमः ।
परमानन्दकन्दात्मा, देहि मे पदमव्ययम् ॥ ३

श्रीपद्मतिलका-दङ्ग, जगत्त्रितयसम्पदः ।
विमलाचलशृङ्गारं, वन्दे त्वां विमलप्रभम् ॥ ४

कामनिर्नामनाशाय, चन्द्रशेखर-सन्निभः ।
श्रेयसे भूयसे भूयात्, श्रीजयानन्दमन्दिरः ॥ ५

श्रीदेवसुन्दरा धीश-नत त्वं ज्ञानसागरः ।
जय सद्गुणरत्नाढ्य !, श्रीनाभिकुलमण्डन ! ॥ ६

ईक्ष्वाकुवंशपाथोधि-श्रीसोमसुन्दरद्युतिः ।
सम्पन्मयं विभो ! सर्वं, कुर्वन् कुवलयं जय ॥ ७

श्रीसाधुरत्नसूरीश, स्तूयमानं स्तवं जनः ।
लभते त्रिजगत्पूज्य, मुनिसुन्दर सम्पदम् ॥ ८

श्रीनाभेय कृताराति-जय चन्द्र गुरुप्रभः ।
दृष्टस्त्वं भाग्ययोगेन, मया भुवनसुन्दर ! ॥ ९

जिनसुन्दर सौभाग्य-विद्यासागर तात मे ।
आगमे कुशलां बोधिं, देहि मे जिनकीर्त्तिते ॥ १०

श्रीमत्तपोगणगुरूत्तमनाममन्त्र-
स्तोत्रं पवित्रमति यः पठते प्रभाते ।
श्रीआदिदेवजिनहर्षमहोदयाढ्यं,
श्रीसोमसुन्दरपदं कुरु तस्य नाथ ! ॥ ११

## ११५. ॥ श्रीयुगादिजिनस्तवनम् ॥

(शार्दूलविक्रीडितम्)

आनन्दद्रुमकन्दलीसुचरितश्रेणीपताकाञ्चलाः
क्षुद्रोपद्रवतान्तिशान्तिकविधिव्यापारवारिच्छटाः ।
ब्रह्मज्ञानमहःस्फुलिङ्गततयः श्रीवल्लरीपल्लवाः
श्रीनाभिप्रभवप्रभुक्रमनखज्योत्स्नाङ्कुराः पान्तु वः ॥ १

आद्यः सम्प्रति सर्ववेदिषु जितस्त्वेकाङ्कपङ्क्ताविव
स्थानं तद्गुणिनो ददाति हृदये तद्देहिनां सन्ततम् ।
यश्चित्रं किल वृत्तवान् शतगुणां वृद्धिं ददौ सान्वये
स श्रीमान् वृषभः शुभाय जगतां चिन्तामणिश्चिन्तितम् ॥ २

(वसन्ततिलका)

आद्यो नृपेषु सकृपेषु जिनाधिपेषु
लोकेऽप्यनल्पपरिकल्पितशिल्पमार्गः ।
देवाधिदेवऋषभो वृषभोपयुक्तः
स्वर्णच्छविः सपदि यच्छतु वाञ्छितानि ॥ ३

(द्रुतविलम्बितम्)

अवतु वो धरणीन्द्रफणावलीप्रतिफलद्विमलाकृतिसप्तकः ।
सकलकर्मजयार्थमिवाऽष्टधाकृततनुः प्रथमो जिनपुङ्गवः ॥ ४

(शार्दूलविक्रीडितम्)

उद्वाहे प्रथमोदरः किल कलाशिल्पादिके यो गुरु-
र्भूपश्च प्रथमो यतिः प्रथमकस्तीर्थङ्करश्चादिमः ।
दाताऽऽद्यः परिपात्रमाद्यमपरं सिद्धो यदम्बादिमः
सच्चक्री प्रथमश्च यस्य तनयः सोऽस्त्वादिनाथः श्रिये ॥ ५

(मन्दाक्रान्ता)

कौ पार्श्वस्थौ वनभुवि युवां सेवकौ नाभिसूनोः ?
किं निःसङ्गः फलतु युवयोः ? गच्छतं गच्छ न त्वम् ।
इत्थं ऋद्ध्यन्नमिविनमिवाग् लज्जया नागभर्तुः
किञ्चिन्मौनस्मितसवलितं वीक्षितं पातु युष्मान् ॥ ६

(स्रग्धरा)

भङ्क्तुं पञ्चाऽऽशु पञ्चाशुगसुभटशरान् पञ्चमुख्यव्रतश्री-
क्रीडासौख्यान्यवाप्तुं सममिव समितीः पञ्च संसेवितुं वा ।
आसीद् यः पञ्चमूर्तिर्नमिविनमिधृतोर्ध्वासिधाराचतुष्क-
क्रोडान्सः कान्तकायः स हरतु दुरितान्यादितीर्थङ्करो वः ॥ ७

(शार्दूलविक्रीडितम्)

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं श्रीनाभिसूनुर्जिनः ॥ ८

(उपजाति)

दद्यान्मुदं सर्वसमानबुद्धिर्जगद्गुरुर्नाभिनरेन्द्रसूनुः ।
उपार्जितं ज्ञानमहानिधानं दत्तं कुटुम्बाय विभज्य येन ॥ ९

(शार्दूलविक्रीडितम्)

धन्या त्वं मरुदेवि ! तीर्थकृदयं यस्याः सुतस्त्वीदृशो
निन्द्याः स्मः सुरनायिका अपि वयं यासामपत्यं नहि ।
एनं देहि यथाऽमृतैर्निजवपुः संश्लिष्य सिञ्चाम इ-
त्यात्तः स्मेरमुखः सुरीभिरभितः श्रीआदिनाथः श्रिये ॥ १०

नव्योद्वाहविधौ वधूद्वययुतं पुत्रं सवित्री रति-
प्रीत्यासन्नमिव स्मरं किल ददौ यं विज्यसत्याशिषम् ।
कल्पद्रुः किल जङ्गमः किमधुना पत्रद्वयेनोद्गत-
स्तत् त्वं स्याः शतशाख इत्यनुदिनं स श्रेयसे नाभिभूः ॥ ११

## ११६. ॥ श्रीऋषभकुन्तल-अष्टकम् ॥

(वसन्ततिलका)

देवः स वः शिवमसौ तनुतां युगाद्यो
यस्यांसपीठलुलिता शितिकुन्तलाली ।
दोःस्तम्भयोरुपरि मन्मथ-मोह-दर्प-
जैत्रप्रशस्तिफलकश्रियमाश्रयेताम् ॥ १

आदिप्रभोरनिशमंसतटीनिषण्ण-
केशच्छलेन परितो वदनारविन्दम् ।
किं नीलिकादलमिदन्तउपेयुषा वा
सद्गन्धलुब्धमधुपावलिराविभाति ॥ २

निष्कासिताऽविरतियोषितबाहुदम्भ(ड)
स्तम्भोपरिस्थकिशलोपमकेशकान्तिः ।

श्रीनाभिजस्य हृदयावसथे विशन्त्या[न्ती]:
++++स्फुरति वन्दनमालिकेव ॥ ३

एषा यदादिमजिनस्य शिरोरुहश्री-
रुद्धूतधूमलहरीव विभौ विभाति ।
सद्ब्रह्मरूपमनुमेयमथेन्धनेद्ध-
मन्तः स्फुरत्तदिह नूनमनूनमर्चिः ॥ ४

शङ्के पुरः स्फुरति कोमलकुन्तलश्री-
दम्भादमुष्य वृषभस्य विभोरभीक्ष्णम् ।
स्कन्धाधिरूढदृढसंयमभूरिभार-
व्यक्तीभवत्किणगणोल्बणकालिकेयम् ॥ ५

सैष प्रभुः कनकभङ्गनिभाङ्गयष्टि-
र्लोकम्पृणो न कथमस्तु यदंसदेशे ।
मेरोरुपान्तविलसद्घनराजगर्व-
सर्वंकषा स्फुरति पेशल-केशलक्ष्मीः ॥ ६

मन्ये विशोध्य विधिरैन्दवमेव बिम्बं
श्रीनाभिपार्थिवभुवो मुखमुच्चकार ।
तस्य ध्रुवं तदियमन्तः निवेश-केश-
छायाच्छलादपतदङ्क-कलङ्क-लेखा ॥ ७

अंसस्थली चिकुर-कञ्चुकिता युगादि-
देवस्य विग्रहग्रहे विहिताश्रयायाः ।
क्रीडाकृते मरकतोपलबद्धभूमि-
शोभां दधाति गुरुसंयमराज्यलक्ष्मीः (लक्ष्म्याः) ॥ ८

## ११७. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(अनुष्टुप्)

आदिदेवेषु या भक्ति,-रादिदेवेषु या नतिः ।
आदिदेवेषु या पूजा, सा सा मुक्तिप्रदायिका ॥ १

आदिदेवेषु यद्ध्यानं, आदिदेवस्य पूजनम् ।
आदिदेवस्य यन् मन्त्रं, तत्तन्मुक्तिप्रदायकम् ॥ २

आदिदेवः सदा ध्येय, आदिदेवस्य निश्चयः ।
आदिदेवो हि भगवान्, स स मुक्तिप्रदायकः ॥ ३

आदिदेवो महान्देवो, जैनर्षीणां परा गतिः ।
आदिदेवः सदा नित्यो, भवेत् मुक्तिफलप्रदः ॥ ४

आदिदेवस्तु को देवो, जैनर्षे ! संशयो मम ।
भक्तत्वं विद्धि वृषभ-देवं जन्तोः परं पदम् ॥ ५

पठन्ति य इदं स्तोत्र-मादिदेवादिनामकम् ।
आदिदेवप्रसादेन, सद्गतिं यान्ति मानवाः ॥ ६

जीवन्मुक्तस्य जैनर्षे-रादिदेवो गतिर्मम ।
जीवात्मनां मुक्तिदाता सर्वेषामीप्सितप्रदः ॥ ७

अर्बुदाचलमण्डन-

## ११८. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(वसन्ततिलका)

भक्तार्त्तिनाशनकरं विशदप्रभावं,
भक्तामरसुरनरेन्द्रनतक्रमाब्जम् ।
संसारसिन्धुतरणोत्तमपोतकल्पम्,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ १

ध्यानस्थितं मुनिवरा वचनं त्वदीयं,
हृद्गोचरं प्रविदधुः समशीलवन्तः ।
ते मोक्षसिद्धिवशगा वशिनो बभूवुः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ २

विघ्नानि यान्ति विततानि तव प्रभावा-
न्नाशं विभो ! जगदनन्यहितानुबन्धिन् ।
सर्वार्थदाननिपुणो न विभुत्वदन्यः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ३

स्तोत्रप्रिया नरगणा भवशान्तिकारम्,
सौम्यं प्रभो ! तव महागुणराशिमाशु ।
चित्ते विभाव्य भवभीतिपराङ्मुखाः स्युः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ४

संसारतापविधुराः परिणामसिद्धा-,
स्तद्धेतुरत्र भवतश्चरणानुपातः ।
कस्त्वत्प्रभावविमुखो गुरुसङ्गरक्तः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ५

को बुद्धिमान्विदितभूरिगुणप्रतापम्,
कल्याणधाम विभवं जुषते विहाय ।
कालान्तकक्रमगतोऽपि भवान्तकारिन् !
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ६

भव्या जना-स्तव विभो ! शरणं प्रपन्ना-
स्तीर्त्वाऽपमृत्यु-मनघाः शिवशर्म्मभाजः ।
रेजुः समस्तधरणीधवपूज्यपादः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ७

आदिप्रभो ! तव पदाब्जमहं प्रणम्य,
मुक्तोऽस्मि संसृतिभयाद् अखिलात् सुखेन ।
नाऽतः परं मम भयं भवजातदुःखा-
च्छ्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥ ८

अर्बुदगिरिभूषण-

## ११९. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

शान्ताकारतया मुखाम्बुजविभा, विभ्राजते भासुरा,
भव्यानां शमदायिनी शशिनिभा, यस्याऽक्षयार्थ-प्रदा ।
तं भक्ताऽभय-दायकाऽमरतरु, देवाऽसुरैः संस्तुमो,
भूभूषाऽर्बुद-भूषणं भवभिदं, नौम्यादिनाथं मुदा ॥ १

तीर्थानां प्रथम-प्रवृत्तिजनकं, भूभामिनीस्वामिनं,
आद्यं विश्व-विकासकारणधुरां, वोढारमादि-क्षणे ।
दिव्याऽऽनन्दविभाविता धरधरा-नामानमुच्चश्रियं,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ २

धन्योऽयं गिरिरर्बुदो गिरिगणे, यत्पाद-पङ्केरुहे-
द्वन्द्वेनाऽङ्कित-सानुरुत्तमजन, ध्यानाधिरूढश्रिया ।
तं तीर्थीकृतभूतलं भुवि नृणामुद्धारकं भाविनां,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ३

विभ्राजन्मुकुट-प्रभा-भरनमन्नाकीश्वर-प्रार्थितं,
भव्यर्द्धिप्रमिते सुधा-धवलिते, धाम्नि स्वयं संस्थितम् ।
वन्दारु-प्रथु-कर्म-कन्द-दलने, दत्तैक-दृष्टि-क्षणं,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ४

निर्मायं निरयक्षिति-क्षयकरं, निर्माननिर्मत्सरं,
निष्कामं कमनीय-कान्ति-कलितं, निर्धूतकर्म्मावलीम् ।
निर्दोष-निररि-प्रकाण्डममलं, निर्नाथ-नाथोपमं,
भूभूषाऽर्बुद-भूषणं भवभिदं, नौम्यादिनाथं मुदा ॥ ५

यो ध्यानं शुभमानसौकसि शुभं, विस्तारयत्यञ्जसा,
दासत्वं दलयत्यनल्प-भयदं, शान्तिं सदा यच्छति ।
तं भूरिश्रियमातनोति विपदं, निर्मूलयत्यङ्गिनां,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ६

यं देवाऽसुर-मानवेन्द्र-निकरा भक्त्योल्लसन्मानसा,
दृष्ट्वाऽनन्तकृपा-मयं शिवसुखं, संसाधयाञ्चक्रिरे ।
द्वन्द्वातीतमहर्निशं समतया तं तस्थिवासं प्रभुं,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ७

यः सन्ध्याऽभ्रसमं निरक्ष्य विभवं, सांसारिकं सत्त्वरं,
जग्राहाऽशिवशान्तये शिवपथ-प्रख्यापनेऽदुर्बलाम् ।
दीक्षां भागवतीं तमद्भूतयशो,-राशिं कृपावैभवम्,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ८

# १२०. ॥ श्रीऋषभजिनेन्द्रस्तोत्रम् ॥

(शार्दूलविक्रिडितम्)

भव्याम्भोज-विकास-वासरमणिं चिन्तार्थ-चिन्तामणिं,
श्रीमन्नाभिनरेन्द्र-वंश-विमलाऽलङ्कारमुक्ताफलम् ।
कल्याणाऽऽवलि-वल्लि-पल्लव-घनं, पापोष्मसच्चन्दनं,
स्तोष्ये भक्तियुतोऽहमादिम-जिनं मोहेभ-पञ्चाननम् ॥ १

संसाराम्बुधि-मज्जतां भवभृतां, पोतस्त्वमेव प्रभो !
त्वं कारुण्यनिधिर्भवाचलपविः कल्पद्रुमो देहिनाम् ।
त्वं दुःखौघविनाशकः शमसुधा, धारो धरित्रीविभुः,
प्रोद्यद्भावयुतो ममाऽसि भगवन् ! भूयास्सदा प्रीतये ॥ २

त्वं माता जनकस्त्वमेव सुगुरु-र्बन्धुस्तथा त्वं मम,
त्वं स्वामी किल दुःखिताऽखिलजने, वात्सल्यदस्त्वं जिन !
त्वं संसारसमुद्रतारणतरी, प्रायः प्रियः प्राणिनां,
त्वं श्रीसिद्धिवधू वरो मयि जने दुःखक्षयं त्वं कुरु ॥ ३

रागद्वेषमहारिभिः प्रमथितो मायामहा धूर्तितः,
स्वामिंस्त्वां शरणाश्रितोऽस्मि जनता, हर्षप्रकर्ष-प्रद ! ।
तन्मे देहि धियं यथा न भवति त्वद्वैरिणां सङ्गम-
स्तेन स्यां शिवसौख्यभाजनमहं त्वत्तः प्रसादात् सदा ॥ ४

नाथ ! त्वं प्रथमो नृपः समभवो भिक्षाचरोऽपि क्रमात्,
तीर्थेशः प्रथमो विभुश्च भविनां मोक्षैकसंसाधकः ।
यत्पुत्रो भरताधिपः प्रथमतः सच्चक्रवर्त्तिस्तथा,
यन्माता प्रथमं गता शिवपदं, सोऽस्तु प्रभुर्भूतये ॥ ५

श्रीमंस्त्वत्पदपद्मयोर्मम मनो भृङ्गे भ्रमन् स्वेच्छया,
श्रीसर्वज्ञ ! कदा रमिष्यति सदा, रामारमा-निस्पृहः ।
तत्त्वं नाथ ! सनाथतां मयि कुरु प्रक्षीणपापोदये,
त्रायन्ते किल वत्सलाः श्रितजने स्वामिन् ! महान्तौ क्षितौ ॥६

धन्यः कोऽपि स वासरो शुभमयो, यामः स एव क्षणः,
सोऽपि सौख्यकरो स्वभावमधुरो, यस्मिन्मुदा दृश्यते ।
जानेऽहं तव पादपद्म पुरतो तिष्ठेत् चिदानन्दभाक्,
नासान्यस्तसुलोचनः करयुगं संयोज्य सौख्यं श्रितः ॥ ७

विघ्नव्रात-महेभ-दर्प्पदलनो मुक्त्यङ्गनाकामुकः,
शुद्धध्यानविधाननिर्जितमहा, मोहान्धकारावलिः ।
विश्वव्यापिमहाप्रभावभवनं भव्यैः समासादितं,
श्रीमनादिजिनेश्वरः प्रकुरुतां सौख्यं मनोवाञ्छितम् ॥ ८

(स्त्रग्धरा)

इत्थं दुष्टाष्टकर्माऽपगतकलिमलः केवलाऽऽलोक-युक्तः,
कारुण्याम्बुप्रवाहः प्रवर-गुणगणाऽऽधोर-धौरेयमुख्यः ।
श्रीमत्स्याद्वादविद्या जलधिशशिकरो ज्ञात-तत्त्व-प्रमेयः,
प्राज्यं सौख्यं करोतु प्रथमजिनपतिः संस्तुतः शुद्धभक्त्या ॥ ९

श्रीशत्रुञ्जयमण्डन-

# १२१. ॥ श्रीआदिनाथस्तवनम् ॥

(शार्दूलविक्रीडितम्)

श्रीशत्रुञ्जयशैलभासुरशिरःशृङ्गारचूडामणे !,
श्रीनाभेय ! जगन्मनोऽम्बुजवनप्रह्लादनाहर्मणे ! ।
रम्यां सिद्धिवधूं वुवूर्षुरखिलं पापं जिहीर्षुर्निजं,
त्वामज्ञोऽपि निनीषुरस्मि भगवन् ! मार्गे गिरां किञ्चन ॥ १

भाग्यैरुत्पलमण्डलैरिव जगद्भर्त्तः ! समुन्मीलितम्,
प्रौढप्राच्यभवार्जितैर्मुकुलितं पापैः सरोजैरिव ।
आनन्दाम्बुधिना च मेऽद्य भगवन् । कल्लोललीलायितम्,
त्वद्वक्त्रामलचन्द्रमण्डललसद्भामण्डलेक्षोत्सवे ॥ २

त्वद्यात्रागत-देहिनां गजपतेः स्कन्धाधिरूढा सती,
त्वन्मातेव समग्रपापपटलं बेभिद्यते प्रागपि ।
तेन त्वं जगतां पते ! किल कलप्रासादमध्यस्थितो,
ध्यानासीन इवेक्ष्यसे विगततच्चिन्ताचयः प्राणिभिः ॥ ३

चेतश्चिन्तितदानदैवततरुः श्रीश्रीकपर्दीश्वर-
स्त्वद्यक्षाधिप एव देव ! सकलान् विघ्नान्निजेघ्नीयते ।
यत्प्रागेव समग्रयात्रिकजनव्रातस्य रात्रिन्दिवं,
तद्व्यापारविधौ समस्तु भगवंस्तत्ते कुतस्त्यः श्रमः ? ॥ ४

त्वत्प्रासादशिरोऽधिरुह्य भगवन् ! दौकूल एष ध्वजः
प्रान्तालिङ्गितकिङ्किणीक्वणनिभाद् ब्रूते किलैतद्वचः ।
हे लोका ! यदि सिद्धिनामकपुरीं द्रष्टुं समुत्कण्ठते
चेतस्तत्तदधीश्वरं जिनममुं सेवध्वमत्यादरात् ॥ ५

स्वामिंस्ते गगनाग्रलग्नशिखरः प्रासाद एव ध्रुवम्,
हन्तुं पापभटानतीव विकटान् यद् गाढबद्धोद्यमः ।
दण्डं चण्डममुं बिभर्ति तदयं तत्खण्डनायोत्कटं,
तद्बन्धाय च पाशमप्यतिलसल्लम्बध्वजव्याजतः ॥ ६

देव ! त्वन्मुखवीक्षणक्षणभवद्रोमाञ्चसंवर्मित-
स्त्रैलोक्योत्कटरागमुख्यसुभटान् शत्रून् यदत्राङ्गभृत् ।
ध्यानास्त्रेण जयत्यर्हनिशमतः शत्रुञ्जयेत्याख्यया
विख्यातस्तव भूधरोऽपि भगवन् ! लोकाग्रचूडामणे ! ॥ ७

श्रीधर्मोज्ज्वलनैकमण्डलमिलन्मानातिग प्राणिनां,
माद्यद्दुष्कृतमण्डलकुलमिव क्रीडत्कुरङ्गावले: ।
मन्ये त्रासयितुं त्वदीयभवनद्वाराङ्गणे रङ्गतो,
व्याघ्रीयं स्थितिमादधाति सकलप्राचीनबर्हिःस्तुत ! ॥ ८

राष्ट्राणि प्रचुराण्यपीह भुवने जाग्रत्युदग्रश्रिया,
नैकस्यापि परं सुशब्दघटना प्राग् जाघटीति प्रभो ! ।
किन्त्वेतज्जगदद्भुतां सुभगतालक्ष्मी समासीसदत्,
त्रैलोक्याभरणेन देव ! भवता ख्यातं सुराष्ट्रेत्यतः ॥ ९

स्वामिंस्त्वन्मुखमण्डलोल्लसितरुक्पूरैः प्रभातोदये,
स्पृष्टा ये नहि दुर्गतिं स्पृशति तान् वन्दारुजन्तूनिह ।
येवोद्यत्प्रबल-प्रतापतपनोदीप्रप्रभाचक्रकैः
श्लिष्टाः श्लिष्यति तान् किमञ्जनघनश्यामा तमिस्त्रावली ॥१०

मन्ये सिद्धरसः प्रसिद्धमहिमा स्वामिंस्त्वदीयोल्लस-
त्पादाम्भोरुहसम्भवद्दृशनखप्रेङ्खत्त्विषां मण्डलम् ।

यत्स्पृष्टाः किल कोटिशोऽपि मनुजाःकल्याणलक्ष्मीं नवा-
मासाद्याभरणीभवन्ति भगवन् । सिद्ध्यङ्गनाया यतः ॥ ११

पीयूषद्रववर्षणं नयनयोस्त्वद्वक्त्रसंवीक्षणं,
सञ्जातं प्रकरोति देव ! भगवन् ! भाग्योत्तमत्वं मयि ।
किं नोल्लासयति प्रकाशितजगच्चित्तो वसन्तोत्सवः,
क्रीडत्कोकिलमण्डलीषु मधुरारावस्य लीलायितम् ॥ १२

नान्यो रत्नमहीधरोऽस्ति भुवने सोऽप्यस्तु वा किं सता,
तेन प्रस्तरखण्डमण्डितभुवा रत्नाचलः किन्त्वयम् ।
ख्यातस्ते धरणीधरः प्रविलसन् यत्रैष चिन्तामणि-
स्त्वं नाथ ! प्रथयस्यभीष्टमखिलं कालेऽधुनाप्यङ्गिनाम् ॥१३

कीर्त्तिस्तम्भयुगं पदौ विजयिनौ धर्मस्य कल्पद्रुमौ,
पाणी तत्सरलाङ्गुलीततिरियं स्वःशाखिनां पल्लवाः ।
स्कन्धौ बन्धुरशातकुम्भकलशौ सौवर्णपट्टो हि हृत्,
कण्ठः कम्बुरयं स्वशब्दविधिना विश्वस्य कल्याणकृत् ॥ १४

चन्द्रः सान्द्ररुचिर्मुखं नयनयोर्युग्मं नवाम्भोरुहं,
कर्णौ काञ्चन शुक्तिके मुकुरयोर्द्वन्द्वं कपोलस्थली ।
नाशाम्भोरुहनालमद्भुतमिति त्वद्रूपलक्ष्मीं प्रभो !
प्रातर्मङ्गलकारिणीं प्रतिदिनं पश्यन्ति धन्या जनाः ॥ १५

कालेऽस्मिन् भवसम्भवश्रमभरैरापीड्यमानाङ्गिनां,
स्वामिंस्त्वं निजदर्शनामृतरसैरानन्दनिस्यन्दिभिः ।
तापव्यापमपाकरोषि सकलं वीक्ष्येति भूमण्डलात्
स्वः पातालतले सुधाप्यचकलन्नितुर्हैकावस्थितिम् ॥ १६

त्वं भक्तिप्रणमन्नरासुरसुराधीशार्च्यमानः प्रभो !
तापं खण्डयसि प्रचण्डमपि यज्जाड्यं च जन्मस्पृशाम् ।
तस्मात् तद्घटने पटुत्वकमलामालिङ्गमाना विभौ
सूर्याचन्द्रमसौ त्वदीयतुलनामासादयेतां कथम् ॥ १७

रत्नालङ्कृतिभारिणी नयनयोर्नव्यामृतो-द्गारिणी
माद्यन्मोहविदारिणी स्फुरदुरुज्योतिः कलाधारिणी ।
स्फूर्जन्मङ्गलकारिणी त्रिजगतामानन्द-विस्तारिणी
मूर्तिस्तेऽघनिवारिणि जिनपते ! दत्ते मनोवाञ्छितम् ॥ १८

रम्योऽशोकतरुः स्फुरत्परिमलाकृष्टालिमाला-कुला
वृष्टिः सौमनसी सुरैर्विरचिता दिव्यो ध्वनिर्बन्धुरः ।
चञ्चच्चामरमण्डलं स्फुरदुरुश्वेतातपत्रत्रयी
भास्वद्रत्नगणाऽनणुद्युतिभरैराभासि सिंहासनम् ॥ १९

व्योमन्यब्द इवातिमन्द्रमधुरध्वानो नदन् दुन्दुभि-
मार्तण्डद्युतिमण्डलाभममलं भामण्डलं चाद्भुतम् ।
इत्येतां भुवनेषु विस्मयकरीं त्वत्प्रातिहार्यश्रियं
दृष्ट्वा कस्य जगन्नमस्य ! न भवेत् प्रौढप्रमोदोदयः ॥ २०

श्रीमन्नाभेयदेव ! प्रथमजिन ! जगन्माम(न?)साम्भोजहंस !
प्रौढश्रीपुण्डरीकाचलविमलतरोत्तुङ्गशृङ्गावतंस ! ।
एतां यस्तावकीनस्तुतिकुसुमस्रजं स्थापयेत् कण्ठपीठे
सोत्कण्ठा सम्पदस्तं त्रिजगदधिपते ! वृण्वते विश्वशस्याः ॥२१

## १२२. ॥ श्रीऋषभजिन-स्तवनम् ॥

(राग भैरवी त्रिताल)

ऋषभजिनेश ! महासुखदायक ! दीनदयाकर ! दीव्यतनो ! ।
परमानन्दनिकेतन ! भक्तोद्धारक हे गुणरत्ननिधे ध्रुव ! ॥ऋ.१

नौमि सदा भवभेदक ! छेदक ! कर्मकलङ्कवृतेः शिव हे ।
दुर्गतिदारक ! शान्तिसुधाकर ! भवजलतारक ! शुद्धगते ! ॥२

जगदाधार ! जगज्जनवल्लभ ! सुरगणसेवितभव्यरुचे ! ।
हे कर्मारिनिवारक ! सारक ! दीर्घसुखस्य निरञ्जन हे ! ॥ ३

सिद्धसनातन ! धामविराजक ! शरणागतजनवत्सल हे ! ।
दान्त ! सुशान्तमनोजविकार ! क्षेमविधान विशालमते ! ॥ ४

भवभयभञ्जन निर्जररञ्जन ! सज्जनसद्गतिदायक हे ! ।
दुरितमहाद्रुमकुञ्जरपञ्जर, पुण्यशुकस्य सुराधिपते ! ॥ ५

## १२३. ॥ श्रीआदिनाथजिनादिस्तवः ॥

(उपजाति)

शत्रुञ्जयक्षोणिधरावतंसः श्रीआदिनाथः सुरराजसेव्यः ।
लोकत्रयीवाञ्छितकल्पवृक्षः कुलेऽस्मदीये शिवतातिरस्तु ॥१

शत्रुञ्जये श्रीजिनमादिदेवं सुरासुरालीकृतपादसेवम् ।
कल्याणमालाकरणैकदक्षं भो वर्ण[यामी] हितकल्पवृक्षम् ॥२

श्रीमत्तपागणनभोऽङ्गणसूर्यकल्पा
विश्वोत्तमैर्गुणगणैः सकलैरनल्पाः ।
श्रीदेवसुन्दरमुनीश्वरनामधेया
वर्ण्यास्त्वया सपदि सूरिवरा मदीयाः ॥ (वसन्ततिलका) ३

मन्त्राधिराजं प्रवरप्रभावं संसारवारांनिधिवर्यनावम् ।
सिद्धान्तसारं परमेष्ठिमन्त्रं त्वं वर्णयोज्जासितकर्मतन्त्रम् ॥ ४

श्रीचन्द्रगच्छगुरुमानसराजहंस ! चारित्रपात्र ! वरसूरिशिरोवतंस!।
श्रीसोमसुन्दरगुरुः कलिकालसर्व-
विद्यास्पदं विजयते जितवादिदेवम् ॥ (वसन्ततिलका) ५

नरेन्द्रदेवेन्द्रकृतांह्रिसेवः संवर्ण्यतां श्रीजिन एव देवः ।
विभूषितो योऽतिशयैरशेषै-र्विवर्जितोऽष्टादशभिश्च दोषः ॥६

विमलकेवलकेलिनिकेतनं परमनिर्वृतिशर्मनिबन्धनम् ।
नमत तीर्थकरं जिननायकं विपुलमङ्गलकामितदायकम् ॥ ७
(द्रुतविलम्बित)

कल्याणवल्लिजलवाहसुनामधेया
लोकोत्तरोल(ल्ल)सदभुं(भ)ङ्गुरु(र)भागधेयाः ।
श्रीसोमसुन्दरयतिप्रथिताभिधाना
अस्मत्कुले किल जयन्ति युगप्रधानाः ॥ (वसन्ततिलका) ८

वरतुरङ्गमहस्तिघटाविभुः सुभटकोटिनिषेव(वि)तसन्निधिः ।
ऋषभदेव-सुमङ्गलयोः सुतो विजयते भरतेश्वरभूपतिः ॥ ९
(द्रुतविलम्बित)

असङ्ख्यदुःखोपशमैकहेतु-रपारसंसारपयोधिसेतुः ।
मन्त्राधिराजोऽस्तु जनेष्टकामा-वाप्तेः करः श्रीपरमेष्ठिनामा॥१०

शत्रुञ्जयक्षोणिधरावतंसः समस्तयोगीन्द्रकृतप्रशंसः ।
विश्वत्रयीमानसराजहंसः श्रीनाभिसूनुस्तनुतां शिवं वः ॥ ११

कल्याणमालाकरणैकदक्षः श्रीपार्श्वनाथः कृति(त) विश्वरक्षः ।
विशुद्धसद्धर्मपथप्रणेता नन्द्यात् स देवो दुरितापनेता ॥ १२

कल्याणकारी महिमावतारी सिद्धान्तचारी दुरितापहारी ।
संस्मर्यते श्रीपरमेष्ठिनामा मन्त्राधिराजः कुलयस्मदीये ॥ १३

अतुलमङ्गलमण्डलदायकः सकललब्धिनदीजलदायकः ।
जयति गौतमसर्वगणाधिपः प्रबलविघ्नतमिश्रदिनाधिपः ॥१४
(द्रुतविलम्बित)

श्रीमत्तपागणनभोऽङ्गणभासुकल्पाः
सिद्धान्ततर्कसुविचारणचारुजल्पाः ।
वैराग्यमुख्यगुणलक्षधरा धरायां
श्रीसोमसुन्दरवरा गुरवो जयन्ति ॥ (वसन्ततिलका) १५

गजैस्तुरङ्गैश्च पदातिवृन्दैः षट्त्रिंशता राजकुलैश्च सेव्यः ।
पाता प्रजानां विजयी विभाति भूपः सुरत्राणमहम्मदाह्वः ॥१६

अज्ञातकर्तृकम्

## १२४. ॥ श्रीऋषभजिनस्तवनम् ॥

(अनुष्टुप्)

विजयस्व जगन्नाथ ! परमात्मन् ! वृषध्वज ! ।
कृतकर्मारिसंहार ! त्रिदोषत्रिपुरान्तिक ! ॥ १

विजयस्व परब्रह्मन् ! परमेष्ठिन् ! पितामह ! ।
जगत्त्रयीज्ञानमह्यां सृष्टौ स्रष्टा त्वमेव हि ॥ २

विजयस्व केवलिश्रीविभागशुभग ! प्रभो ! ।
विश्वरक्षाभयधृतोच्चैः स्कन्दपुरुषोत्तम ! ॥ ३

सर्वविद्यामन्त्रबीजाक्षरनामाक्षर ! प्रभो ! ।
श्रीवीतराग ! मे ध्येयः स्यात्त्वमेव भवे भवे ॥ ४

## १२५. ॥ श्रीआदिनाथचैत्यवन्दनम् ॥

(अनुष्टुप्)

आदिनाथ ! जगन्नाथ ! विमलाचलमण्डन ! ।
जय नाभिकुलाकाश-प्रकाशनदिवाकर ! ॥ १

तव देव ! पदाम्भोज-सेवापि दुर्ल्लभा भवेत् ।
पुण्यसम्भारहीनानां, कल्पवल्लीव देहिनाम् ॥ २

ते धन्या मानवा देव ! यैरापि तव शासनम् ।
वन्दनीया विभो ! ते ये वन्दन्ते भवतः पदौ ॥ ३

मम प्रचण्ड-रागादिरिपुसन्ततिघातकम् ।
श्रीयुगादिजिनाधीशं, देवं वन्दे मुदा सदा ॥ ४

श्रीशत्रुञ्जयकोटीर ! कृतं राज्यश्रिया विभो ! ।
सर्वाघनाशनं मेऽस्तु, शासनं ते भवे भवे ॥ ५

## १२६. ॥ श्रीआदिनाथस्तुतिः ॥

सुवर्णवर्णं गजराजगामिनं, प्रलंबबाहुं सुविशाललोचनम् ।
नरामरेन्द्रैः स्तुतपादपङ्कजं,
नमामि भक्त्या वृषभं जिनोत्तमम् ॥ (उपेन्द्रवज्रा) १

जयति कनकावदात, कृष्णजटामुकुटमण्डितो वृषभः ।
इक्ष्वाकुवंशतिलक-स्त्रिभुवनचूडामणिर्भगवान् ॥ (आर्या) ३

## १२७. ॥ श्रीयुगादिदेवचैत्यवन्दनम् ॥

(अनुष्टुप्)

प्रगे युगादौ देवेश ! सूरस्त्वमुदितो नवः ।
तमोध्वंसं वितन्वानो दर्शयन्नर्थसंपदः ॥ १

नमस्ते विश्वनाथाय, विश्वहर्षप्रदायिने ।
विश्वोत्तरचरित्राय, विश्वताताय हे प्रभो ! ॥ २

तवावतारे भरतक्षेत्रं-स्वर्गाद्विशिष्यते ।
